66 Ñ1 illeg. for 66 ( cf. v.l. 49 ). Ñ2 B D6 om. 66 ( cf. v.l. 65 ).—$^{b}$) Ś1 मेघाद् ( for मेघ- ). D5 T2.3 G3 निसृतः ; D7–9 निर्गतः ( for निःसृतः ).—$^{c}$) Ś1 D2.10.11 मेघ- (for भीम-). D1.3 -संकाशं; D7–9 -निर्ह्रादं (for -निर्घोषं).

67 Ñ1 illeg. up to तरङ्गा in $^{d}$ ( cf. v.l. 49 ). Ś1 Ñ2 B D6 om. 67 ( for all except Ś1, cf. v.l. 65 ). D9 om. $67^{ab}$. T1 resumes from 67 ( cf. vl. 1 ).—$^{b}$) T3 वेगेन ( for बृहन्ति ). D1.3 G2 लवणांभसः.—After $67^{ab}$, D1–3.5.7.8.10.11 S ins.; whereas D9 ins. l. 2 only before $67^{cd}$ :

37* पुप्लुवे कपिशार्दूलो विकिरन्निव रोदसी ।
मेरुमन्दरसंकाशानुद्धतान्स महार्णवे ।

[ (l. 1) D1–3.10.11 G1.2 विकर्षन्; Ct as above ( for °किरन् ). D2.3.11 रोदसीं ( sic ).—(l. 2) D1.3 उद्धृतान्स; D2 भूतान्सह ( sic ); D7.9 T2 उद्गतान्स- ( T2 °न्स ); D10 उद्ध°; D11 उद्ध्र°; G2.3 उत्थि° ( for उद्धतान्स ). T3 महाकपिः ( for °र्णवे ). ]

—$^{c}$) D2.5.10.11 M1.3 Cv.r अतिक्रामन्. D5 महाभागम् ( for °वेगस् ). D1 अवक्रामन्महावेगम्. ❈ Cv.g : अतिक्रामदत्यक्रामत्. ❈ —$^{d}$) D1 उरगान्; D10 *sup. lin.* ( for तरङ्गान् ). D11 तरंगा मृगयान्निव ( sic ).—After 67, Ñ1 D1–3.5.7–11 S ins. :

38* तस्य वेगसमुद्धुष्टं जलं सजलदं तदा ।
अम्बरस्थं विबभ्राज शारदाभ्रमिवाततम् ।
तिमिनक्रझषाः कूर्मा दृश्यन्ते विवृतास्तदा ।
वस्त्रापकर्षणेनेव शरीराणि शरीरिणाम् ।

[ (l. 1) D10 मेघ- ; Cr.m.g.k.t as above ( for वेग- ). Ñ1 T3 G2.3 M3 Cm*p*.g -समुद्ध( Ñ1 Cm*p* °द्ध )तं; D1–3.11 -समुत्कृष्ट( D11 °ष्ट ); D10 -समुत्कुष्टं ( sic ); Cm.k.t as above ( for -समुद्धुष्टं ). D8 आसीन्महत्; M1 सुविमलं; Cr.m.g.k.t as above ( for सजलदं ). D5 T3 यथा ( for तदा ). Ñ1 D1.3 जलं स्फटिकसंनिभं; D7.10.11 जलं स जलदो यथा ( for the post. half ). ❈ Cr : तस्य वेगसमुद्धूत इति पाठः ; Ck : तस्य वेगसमुद्धुष्टमूर्ध्वं क्षिप्तमत एव सजलदं जलदसंनिवेशबन्धसहितमम्बरस्थं च । एवंभूतं जलमाततं विततं शारदाभ्रं शरन्मेघ इव बभौ । अन्यस्तु सजलदं जलदसहितं जलदैकीभूतमित्यर्थः इत्याह, तदसङ्गतम् । एतज्जलस्यापि जलदसङ्गतत्वेन शारदाभ्रदृष्टान्तस्यासङ्गतत्वात्. ❈ —(l. 2) D2.10 अंबरस्थो. D7–9 T1 M2 वि( D8 च )बभ्राजे; M1 हि ब°; Cm as above ( for विबभ्राज ). D11 अंबरस्थोनिविभ्राज ( for the prior half ).—Ñ1 illeg. from the post. half up to $72^{a}$. D7.9 T1 G1 Ct शरदभ्रम्; Cm.k शारदाभ्रम् ( as above ). M3 ( before corr.; after corr. as above ) यथा; Cm.k.t as above ( for इव ). D10 [आ]ततं; Ck.t as above ( for [आ]ततम् ).—(l. 3) D2.11 -नक्रा ( for -नक्र- ). D2 कुब्जा ( sic ); D10 कुब्धा; D11 रंजा ( sic ) ( for कूर्मा ). D5 T3 G3 तथा ( for तदा ). D2.8.10.11 T2 विविधास्तथा( T2 °दा ) ( for विवृतास्तदा ).—D2.10.11 om. l. 4. ]

68 Ñ1 illeg. for 68 ( cf. v.l. 38* ). Ś1 D2.10.11

G. 5. 5. 30
B. 5. 1. 74
L. 4. 61. 0

दशयोजनविस्तीर्णा त्रिंशद्योजनमायता ।
छाया वानरसिंहस्य जले चारुतराभवत् ॥ ६९
श्वेताभ्रघनराजीव वायुपुत्रानुगामिनी ।
तस्य सा शुशुभे छाया वितता लवणाम्भसि ॥ ७०
प्लवमानं तु तं दृष्ट्वा प्लवगं त्वरितं तदा ।
ववृषुः पुष्पवर्षाणि देवगन्धर्वदानवाः ॥ ७१
तताप न हि तं सूर्यः प्लवन्तं वानरेश्वरम् ।
सिषेवे च तदा वायू रामकार्यार्थसिद्धये ॥ ७२

read 68 after 64. —$^{a}$) D2 प्लवमाणः ( sic ); D7–9 क्रममाणं. Ś1 D10 समालक्ष्य; D2.11 समालंब्य ( for समीक्ष्याथ ). —$^{b}$) S1 Ñ2 B D1.2.6.7.9–11 T2 G1 M2 भुजगाः. D7.9 सागरंगमाः ( for °रालयाः ). —$^{c}$) D2.10.11 हरिशार्दूलं. —$^{d}$) D11 समुद्रम् ( sic ); G2 भुजंगम् ( for सुपर्णम् ). Ś1 Ñ2 B D1–3.5–11 T इव ( for इति ). G3 सुपर्ण ****रे. —After 68, D1.3 ins.:

39* महानागाश्च वित्रस्ताश्छायां दृष्ट्वा हनूमतः ।
सुपर्ण इति विज्ञाय पातालं विविशुस्तदा ।

69 Ñ1 illeg. for 69 (cf. v.l. 38*). Ś1 om. 69–70. D2.10.11 om. 69$^{ab}$. —$^{a}$) G2 शत- ( for दश- ). Ñ2 B D6 -विस्तीर्णां. —$^{b}$) Ñ2 B D6 दृष्ट्वा त्रि( B3 द्वि )गुणमायतां. —$^{cd}$) D1.5 वानरराजस्य. D7.9 जवे ( for जले ). D11 चारुतया; T3 °मता (sic) ( for °तरा ). Ñ2 B D6 छायां वानरराजस्य जलजा( Ñ2 D6 चारणा ) विस्मयं गताः.

70 Ñ1 illeg for 70 (cf. v.l. 38*). Ś1 om. 70 (cf. v.l. 69). —$^{a}$) Ñ2 B2.4 श्वेताभ्रे. Ñ2 B D6 -मेघ-; D1 -नर- (sic); D3 -वन- ( for -घन- ). —$^{b}$) G2 -[ अ ]-नुसारिणी ( for °गामिनी ). —$^{c}$) D10 सा तस्य ( by transp. ). B1( marg. as in text; orig. ) [ ऽ ]तीव ( for छाया ). —$^{d}$) Ñ2 B D6 प्रवृद्धा; D7–9 पतिता; T1 पततो ( for वितता ). —After 70, Ñ2 B D6 ins.:

40* खे पुरा वैनतेयस्य हरिष्यत इवामृतम् ।

[ B3 हरिष्यति ( with hiatus ) ( for °ष्यत ). ]

—Thereafter all the above MSS. ins. an addl. colophon.

[ *Sarga name*: Ñ2 B2.3 D6 हनुमत्प्लवनं; B1 हनूमंतलंकागमनं; B4 हनूमदुत्प्लवनं. —*Sarga no.* ( figures, words or both ) : B1 om.; Ñ2 B2–4 D6 5. ]

—Then they read st. 157, 130–156 ( including omissions and star passages ).

—After 70, D1–3.5.7–11 S ins.; while Ñ2 B D6 subst. for 121:

41* शुशुभे स महातेजा महाकायो महाकपिः ।
वायुमार्गे निरालम्बे पक्षवानिव पर्वतः ।

[ ( l. 1 ) D10 om. ( hapl. ) महाकायो. Ñ2 B D6 महाबलः; T3 G3 महामतिः; M1 महा** ( for °कपिः ). —( l. 2 ) D3 G2 निरालंबः. ]

—Thereafter D1–3.5.7–11 S cont.; Ñ2 B D6 ins. l. 3 after 162$^{ab}$ and l. 5 after 161$^{ab}$:

42* येनासौ याति बलवान्वेगेन कपिकुञ्जरः ।
तेन मार्गेण सहसा द्रोणीकृत इवार्णवः ।
आपाते पक्षिसंघानां पक्षिराज इव व्रजन् ।
हनुमान्मेघजालानि प्रकर्षन्मारुतो यथा ।
पाण्डुरारुणवर्णानि नीलमाञ्जिष्ठकानि च । [5]

[ ( l. 1 ) D1–3.10.11 यतः स ( for येनासौ ). —After l. 2, D1.3 ins. the lines of 157:

[ ( l. 1 ) D1.3 वेगेन कपिसत्तमः ( for the post. half ). —( l. 2 ) D1.3 रंहसा गरुडो यथा ( for the post. half ). ]

—( l. 3 ) B1.2 D6 आयाते; B3 आप्लुते; B4 प्रयाते; T2 M1 आकाशे ( for आपाते ). D2.3.10.11 T2 M1 इवाव्रजन्. Ñ2 B1.2.4 D6 पक्षि( B4 °क्ष )राडिव सोऽव्रजत्; B3 damaged ( for the post. half ). ❀ Cm: आपात इति । आपतन्ति संचरन्त्यस्मिन्नित्यापातो मार्गः । ; so also Ck.t ❀ —( l. 4 ) D1.3.7.9 G2.3 M1.3 हनूमान्. D2.5.10 M2 प्राकर्षन्; Ct as above ( for प्रक° ). —T1 reads l. 5 and the line of 164$^{cd}$ after 165$^{cd}$. —( l. 5 ) B1.3 D5 T1 G M पांडर-. B3 D7.9 G -मंजिष्ठकानि. ]

—Thereafter D1–3.5.7–11 S ins. the lines of 164$^{c}$–165:

[ ( l. 1 ) G3 गृह्यमाणानि; Ck.t as above ( for [ आ ]कृष्य° ). D2.11 महार्हाणि ( for °भ्राणि ). —( l. 2 ) D2.3 निःपतंश्च; D10.11 निपतंश्च ( for निष्प° ). —( l. 3 ) D2.7–9 दृश्यते ( for लक्ष्यते ). ]

71 Ñ1 illeg. for 71 ( cf. v.l. 38* ). Ñ2 B D6 om. 71–74. —$^{a}$) G3 च ( for तु ). —$^{b}$) M3 प्लवंगं ( for प्लवगं ). D5 यथा; T3 यदा; G1.2 तथा ( for तदा ). Ś1 D1–3.10.11 समुद्रे( D1 प्लवगं; D3 त्वरितं; D11 समूहे ) प्लवगर्षभं. —$^{c}$) Ś1 D2.10.11 मुमुचुः ( for ववृषुः ). D5.7–9 T2 M2 Ct तत्र पुष्पाणि ( for पुष्पवर्षाणि ). —$^{d}$) G3 -चारणाः ( for -दानवाः ). Ś1 D1–3.10.11 देवतास्तस्य मूर्धनि.

72 Ñ2 B D6.9 om. 72 ( for all except D9, cf. v.l. 71 ). Ñ1 illeg. for 72$^{a}$ ( cf. v.l. 38* ). —$^{a}$) G1 हरिं ( for हि तं ). Ś1 D1–3.10 11 न तताप( D11 पपात ) तदा( D1 महा ) सूर्यः; Ck.t तताप न हि तं सूर्यः ( as in text ). —$^{b}$) Ś1 D2.10.11 प्रयातं( D11 °ते ) ( for प्लवन्तं ). Ś1 D1–3.10.11 वानरर्षभं( D11 °भे ); Ñ1 M3 वानरोत्तमं ( for वानरेश्वरम् ). —$^{c}$) Ś1 Ñ1 D1–3.10 11 सुखो; T3 यदा ( for तदा ). Ś1 Ñ1 D1–3.10.11 वातो; Ct as in text ( for वायू ).

ऋषयस्तुष्टुवुश्चैनं प्लवमानं विहायसा ।
जगुश्च देवगन्धर्वाः प्रशंसन्तो महौजसम् ॥ ७३
नागाश्च तुष्टुवुर्यक्षा रक्षांसि विबुधाः खगाः ।
प्रेक्ष्याकाशे कपिवरं सहसा विगतक्लमम् ॥ ७४
तस्मिन्प्लवगशार्दूले प्लवमाने हनूमति ।
इक्ष्वाकुकुलमानार्थी चिन्तयामास सागरः ॥ ७५
साहाय्यं वानरेन्द्रस्य यदि नाहं हनूमतः ।
करिष्यामि भविष्यामि सर्ववाच्यो विवक्षताम् ॥ ७६
अहमिक्ष्वाकुनाथेन सगरेण विवर्धितः ।
इक्ष्वाकुसचिवश्चायं नावसीदितुमर्हति ॥ ७७
तथा मया विधातव्यं विश्रमेत यथा कपिः ।
शेषं च मयि विश्रान्तः सुखेनातिपतिष्यति ॥ ७८
इति कृत्वा मतिं साध्वीं समुद्रश्छन्नमम्भसि ।
हिरण्यनाभं मैनाकमुवाच गिरिसत्तमम् ॥ ७९
त्वमिहासुरसंघानां पातालतलवासिनाम् ।
देवराज्ञा गिरिश्रेष्ठ परिघः संनिवेशितः ॥ ८०
त्वमेषां ज्ञातवीर्याणां पुनरेवोत्पातिष्यताम् ।
पातालस्याप्रमेयस्य द्वारमावृत्य तिष्ठसि ॥ ८१
तिर्यगूर्ध्वमधश्चैव शक्तिस्ते शैल वर्धितुम् ।
तस्मात्संचोदयामि त्वामुत्तिष्ठ नगसत्तम ॥ ८२

G. 5. 7. 8
B. 5. 1. 92
L. 4. 61. 98

---

73 Ñ2 B D6 om. 73 (cf. v.l. 71). —a) Ś1 D10 [ए]तं (for [ए]नं). —b) Ś1 D2.10.11 G3 M1 विहायसि; Ñ1 महाकपिं; T1 G2 M2 (after corr. as in text) °यसं (for विहायसा). —c) D2.10 जग्मुश् (for जगुश्). —d) Ś1 D2.10.11 प्रशशंसुः (for प्रशंसन्तो). Ś1 D1–3.10.11 प्लवंगमं; Ñ1 विहायसि; D7–9 वनौकसं; T3 महौजसः; G3 महाजवं (for महौजसम्).

74 Ñ2 B D6 T3 G1 M2 om. 74 (for Ñ2 B D6, cf. v.l. 71). —a) Ś1 Ñ1 D1–3.10.11 नागा यक्षाः सुपर्णाश्च. —b) Ñ1 D1.3 M1 राक्षसा; Cg as in text (for रक्षांसि). Ś1 Ñ1 D2.8 M1 विविधाः (for विबुधाः). D5 तथा; T2 तदा (for खगाः). D7.9 रक्षांसि विविधानि च. —Ñ1 illeg. from कपिवरं in c up to चिन्तया in 75d. —c) Ś1 Ñ1 D2.10.11 प्रेक्षकास्ते; D5.7–9 T2 M3 प्रेक्ष्य सर्वे (for प्रेक्ष्याकाशे). —d) Ś1 D10 चोपचक्रमुः; D1.2.11 व्यु(D1 व्य)पचक्रमुः; D3 तेभ्युपाचरन् (for विगतक्लमम्).

75 Ñ1 illeg. up to चिन्तया in d (cf. v.l. 74). —a) B3 वानर- (for प्लवग-). —b) Ś1 D2.10.11 विहायसि (for हनूमति). —c) B1 (marg. also as in text) इक्ष्वाकुनंदनस्यार्थी.

76 B3 om. 76–77. —b) Ś1 D2.10.11 [अ]हं वै (for नाहं). —cd) Ś1 D2.10.11 न च वाच्यो; D1.3 वाच्यः सर्व- (by transp.); Ck.t as in text (for सर्ववाच्यो). D2.3.5 G3 विवक्षि(D2 °क्ष्य)तां (for विवक्षताम्). Ñ2 B1.2.4 D6 करोमि क्रममाणस्य लोके वाच्यो(B1 [marg. also लोकवाच्यो] मित्रद्रोही) भवाम्यहं.

77 B3 om. 77 (cf. v.l. 76). —b) Ñ B4 D3.7.9.11 T1 G M2 सागरेण (for सग°). —Ñ1 illeg. from कु in c up to 78c. —c) Ś1 D10 ऐक्ष्वाकु- (for इक्ष्वाकु-). —d) B4 न विषीदितुम् (for नावसीदि°). Ñ2 B1.2 D6 नावमान(B1 °मंतु)मिहार्हति; B1 (marg. *sec. m.*) मा मंत्रयितुमर्हति; D5.7–9 T2 G1.2 M1.2 तत्रार्हत्यवसा(D3 T3 °सी)दितुं. ❀ Cr : नावसीदतुमर्हतीति पाठः. ❀

78 Ñ1 illeg. for abc (cf. v.l. 77). —a) T3 तदा; G2 तस्मान् (for तथा). —b) Ś1 D2.10.11 विश्राम्येत; Ñ2 B D1.3.6 विश्राम्यति (for विश्रमेत). —c) B2 भृशं; B4 सोयं; D10 शेषे (for शेषं). Ñ2 B2–4 D1.3.6 हि (for च). —d) D3 -**ष्यति. Ś1 D2.10.11 सुखेनाधि(D2 °ति)गमिष्यति; Ñ1 सुखं वीरो गमिष्यति; Ñ2 B D6 सुखेनाभिपतिष्यति; D7–9 T2 सुखी सो(T2 °खेना)तितरिष्यति.

79 a) G3 मत्वा (for कृत्वा). —b) Ñ2 B2.4 D6 स्थितम् (for छन्नम्). Ś1 D2.10 T3 अंभसा (for °सि). D11 सुवर्णछन्नमंभसा. ❀ Cr.m.t : हिरण्यनाभं हिरण्यप्रधानम्। हिरण्मयमित्यर्थः (Ct °ण्यप्रधानं तन्मयमिति यावत्)। "नाभिः प्रधाने कस्तूर्याम्" इति विश्वः।: Cg : हिरण्यनाभं हिरण्यशृङ्गम्। नाभिशब्दो ह्यध्यक्षवाची। शृङ्गं च पर्वतस्याध्यक्षमेव। नाभिरध्यक्षकस्तूर्योरिति दर्पणः. ❀ —d) Ñ2 B D6 समुद्रो गिरि(B3 वाक्य)मब्रवीत्.

80 M2 om. 80–82. —b) D7.9 T2.3 देवराज्ञा महात्मना. —Ñ1 illeg. for 80c–81b. —c) Ś1 D5.10 G1 गिरिश्रेष्ठः; D3 नगश्रेष्ठ (for गिरि°). Ñ2 B D6 देवराजेन मैनाक; D1 देवेंद्रेण नगश्रेष्ठ; D7.9 T2.3 पातालनिलयानां हि. ❀ Cr : देवराज्ञेत्यत्र समासान्तस्यानित्यत्वादजभावः. ❀ —d) Ś1 प्रतिष्ठां; D2.11 प्रतिघः; D10 प्रतिज्ञा (sic); G2 M3 परिखः (for परिघः).

81 M2 om. 81; Ñ1 illeg. for 81ab (for both, cf. v.l. 80). —a) Ś1 D2.10.11 ह्येषां; Ñ2 B D6 चैव; D1.3 एव (for एषां). Ś1 D7 ज्ञाति- (sic); Ñ2 D6 [अ]द्भुत-; B1.2 (marg. also as in Ñ2).3 [अ]ज्ञात-; D1.3 T1 G2 M3 जात-; Ct as in text (for ज्ञात-). —b) Ś1 D2.10.11 स महीतलचारिणां; B2 (marg. also as in text) प्लवनैरुत्पतिष्यतां. —d) D3 आश्रित्य (for आवृत्य). B3 द्वारमाक्रेदयिष्यसि.

82 M2 om. 82 (cf. v.l. 80). —b) B1 वर्तितुं; T2

G. 5. 7. 9
B. 5. 1. 93
L. 4. 61. 99

स एष कपिशार्दूलस्त्वामुपर्येति वीर्यवान् ।
हनूमान्रामकार्यार्थं भीमकर्मा खमाप्लुतः ॥ ८३
तस्य साह्यं मया कार्यमिक्ष्वाकुकुलवर्तिनः ।
मम इक्ष्वाकवः पूज्याः परं पूज्यतमास्तव ॥ ८४
कुरु साचिव्यमस्माकं न नः कार्यमतिक्रमेत् ।
कर्तव्यमकृतं कार्यं सतां मन्युमुदीरयेत् ॥ ८५
सलिलादूर्ध्वमुत्तिष्ठ तिष्ठत्वेष कपिस्त्वयि ।
अस्माकमतिथिश्चैव पूज्यश्च प्लवतां वरः ॥ ८६
चामीकरमहानाभ देवगन्धर्वसेवित ।
हनूमांस्त्वयि विश्रान्तस्ततः शेषं गमिष्यति ॥ ८७
काकुत्स्थस्यानृशंस्यं च मैथिल्याश्च विवासनम् ।
श्रमं च प्लवगेन्द्रस्य समीक्ष्योत्थातुमर्हसि ॥ ८८

---

वेदितुं; Cr.m as in text (for वर्धितुम्). G1 शक्तः शैल विवर्धितुं. —c) Ś1 D2.10.11 संदेशयामि; D1 संवेद°; D3 संनोद°; D8 संबोध° (for संचोद°). B2 [अ]स्माद्; D10 T3 त्वम् (for त्वाम्). Ñ2 B1.3.4 D6 तस्मात्त्वां चो(B3 °त्वं नो)दयाम्यस्माद्. —d) D5.7.9 T2.3 M3 गिरिसत्तम; T1 त्वं नगोत्तम (for नगसत्तम).

83 T1 G3 M1.3 repeat $83^{ab}$ after 87. —a) Ś1 Ñ B D1-3.6.10.11 य (for स). T3 गिरिशार्दूल (for कपिशार्दूलस). —b) Ñ1 माम् (for त्वाम्). T1 G3 (both second time) उपेष्यति (for उपर्येति). Ś1 D2.10.11 मामुपेष्यति वेगवान्; Ñ2 B1.2.4 D3.6 ममोपर्येति वीर्यवान्; B3 दयितोति ममात्मनः; D1 मामायात्यभि वीर्यवान्. —B3 om. $83^{c}-84^{b}$. Ñ1 illeg. for $83^{c}$. —c) Ś1 Ñ2 B1.2.4 D2.6.7.9-11 -कार्यार्थी; D1.3 -कार्यार्थे; D8 -कामार्थं (for -कार्यार्थं). —d) Ñ2 सहप्रभः; B1(m. *sec. m.* मया श्रुतः) D1 समाप्लुतः; B4 स मारुतिः; D6 महाप्रभः (for खमाप्लुतः). B2 भीमकर्मार्थमाश्रितः (*sup. lin.* also °मारुतिः). ❀ Cr.m : त्वामुपरि तवोपरि । (Cr उपर्यध्यधसः सामीप्य इति द्वितीया) ।; Ck : त्वामुपर्येतीति। तवोपरिप्रदेशं प्राप्नोति । तस्मात्त्वमुत्तिष्ठ नगसत्तम तद्विश्रमायेति पूर्वेणान्वयः । "हनुमान्रामकार्यार्थी भीमकर्मा खमाप्लुतः। श्रमं च प्लवगेन्द्रस्य समीक्ष्योत्थातुमर्हसीति" पाङ्कः पाठः। अत्राप्लुत इत्यनन्तरमतिचतुरः सम्यक्प्रक्षेपस्थलदर्शी कश्चित्पञ्चषाञ्श्लोकान्प्राक्षिपत् । श्रमं चेति । यस्माद्रामकार्यार्थी यतश्च श्राम्यति ततस्तस्य प्लवगेन्द्रस्य श्रमं समीक्ष्योत्थातुमर्हसि ।; Ct : उपर्येति तवोपरिप्रदेशं प्राप्नोति। तस्माद्विश्रामाय त्वमुत्तिष्ठेति पूर्वेणान्वयः । एतदुत्तरम्, 'हनूमान्रामकार्यार्थी भीमकर्मा खमाप्लुतः । श्रमं च प्लवगेन्द्रस्य समीक्ष्योत्थातुमर्हसी'ति प्राचीनः पाङ्कः पाठः । अत्र 'खमाप्लुतः' इत्यनन्तरं केचिच्छ्लोकाः प्रक्षिप्ताः परैरिति कतकः । यतो रामकार्यार्थी यतश्च श्राम्यति ततस्तस्य श्रमं समीक्ष्योत्थातुमर्हसि. ❀

84 B3 om. $84^{ab}$ (cf. v.l. 83). D7.9 M2 om. $84-88^{b}$. —a) B4 तस्य स्थानं; D2 ससाहाय्यं (sic); D8.10.11 M3 Cg अस्य साह्यं; Cr as in text (for तस्य साह्यं). Ś1 Ñ B1.2 D1-3.6.10.11 देयम् (for कार्यम्). B4 समादेयम्. D5 transp. साह्यं and कार्यम्. M1 साहाय्यं तस्य कर्तव्यम्. —b) Ñ2 B1.2.4 D6 -हितकाम्यया; D1.3 T3 -हितवर्तिनः; G2 -वशवर्तिनः (for -कुलवर्तिनः). —c) Ś1 Ñ1 D1-3.8.10.11 T1 G M1.3 हीक्ष्वाकवः; Ñ2 B D6 चेक्ष्वा°; T2.3 त्विक्ष्वा° (all to avoid hiatus). —d) D3 प्रति-; M1 पूज्य (for परं). Ś1 D2.10.11 ततः (for तव). Ñ2 BD6 गिरे पूज्यतरास्तव; D1 परिपूज्यसमास्तथा.—After 84, M1 reads $87^{ab}$.

85 D7.9 M2 om. 85 (cf. v.l. 84). —a) Ñ2 B D6 साहाय्यम् (for साचिव्यम्). —Ñ1 illeg. from यम in $^{b}$ up to कार्यं in $^{c}$. —b) D3 ततः; T3 न तु (for न नः). Ś1 D2.10.11 न नः कालात्ययो भवेत्(D2 महान्); Ñ2 B1.2.4 D5.6 नातः(B1 °त्र) कार्यं त्वयान्यथा(D5 °र्यमतिक्रमं); B3 नात्र कार्या विचारणा. —c) Ś1 D2.3.10.11 ह्यकृतं; Ñ2 B D6 सुहृदां; D1 ह्यक्षयं; D5.8 T2.3 M1 नकृतं; Cm as in text (for अकृतं). —d) Ñ2 B D6 त्वयाद्य वचनान्मम(B3 D5 °नं मम).

86 D7.9 M2 om. 86 (cf. v.l. 84). —a) B3 तूर्णम् (for ऊर्ध्वम्). —b) Ñ2 B2 तिष्ठत्येष; B1 विश्राम्येष; B3 तिष्ठत्वेव; D5 विष** (for तिष्ठत्वेष). Ś1 D2.10.11 विश्रमेत यथा कपिः. —Ñ1 illeg. for $86^{c}-87^{b}$. —c) Ñ2 B D1-3.5.6.11 T2.3 M1 ह्येषः (for चैव). Ś1 D10 अस्माकमपि चैवेष. —d) Ñ2 B2.3 D6 पततां (for प्लवतां).

87 D7.9 M2 om. 87 (cf. v.l. 84). Ñ1 illeg. for $^{ab}$ (cf. v.l. 86). B2 reads $87-88^{b}$ in marg. M1 reads $87^{ab}$ after 84. —a) Ś1 D10 इवाभाति; V1 B3 -महाशृंग; B1.2(marg. also as in text) D1.2.11 G1.2 -महाभाग; B4 -मयाभास; T3 °नाग (for -महानाभ). —b) Ñ3 सुर-; B3 नाग-; D6 वसु- (for देव-). Ś1 D2.10.11 -पूजितः; Ñ2 B4 D1.3.5.6 -सेवितः(B4 °ते) (for -सेवित). ❀ Cr: चामीकरो हिरण्यात्मकः । महानागदेवगन्धर्वसेवितेत्येकमामन्त्रितम्. ❀ —c) D11 तव (for त्वयि). B3 विश्राम्य (for विश्रान्तस्). —Ñ1 mostly illeg. for $87^{d}$. —d) Ś1 D2.10.11 पुनः; D5 तमः (for ततः). D10 प्रयास्यति (for गमि°). Ñ2 B1.2.4 D6 मम शेषं क्रमिष्यति; B3 शेषं सागरमेष्यति; T1 G2 शेषं वै संतरिष्यति; M1 शेषं संक्रमयिष्यति. —After 87, T1 G3 M1.3 repeat $83^{ab}$.

88 D7.9 M2 om. $88^{ab}$ (cf. v.l. 84). B2 reads $88^{ab}$ in marg. (cf. v.l. 87). —a) Ś1 Ñ2 B D2.3.6.8.10.11 T2.3 [अ]नृशंसस्य; Cm as in text (for [आ]नृशंस्यं च). —b) Ñ1 मैथिल्याश्चापि वासनं. —c) B3 शरं (corrupt) (for श्रमं). T3 वानरेंद्रस्य (for

हिरण्यनाभो मैनाको निशम्य लवणाम्भसः ।
उत्पपात जलात्तूर्णं महाद्रुमलतायुतः ॥ ८९
स सागरजलं भित्त्वा बभूवात्युत्थितस्तदा ।
यथा जलधरं भित्त्वा दीप्तरश्मिर्दिवाकरः ॥ ९०
शातकुम्भमयैः शृङ्गैः सकिंनरमहोरगैः ।
आदित्योदयसंकाशैरालिखद्भिरिवाम्बरम् ॥ ९१
तस्य जाम्बूनदैः शृङ्गैः पर्वतस्य समुत्थितैः ।
आकाशं शस्त्रसंकाशमभवत्काञ्चनप्रभम् ॥ ९२
जातरूपमयैः शृङ्गैर्भ्राजमानैः स्वयंप्रभैः ।
आदित्यशतसंकाशः सोऽभवद्गिरिसत्तमः ॥ ९३
तमुत्थितमसंगेन हनूमानग्रतः स्थितम् ।
मध्ये लवणतोयस्य विघ्नोऽयमिति निश्चितः ॥ ९४

G. 5. 7. 21
B. 5. 1. 100
L. 4. 61. 111

प्लवगे°).—B1.2 read $^{d}$ in marg. —$^{d}$) D1.3 संवीक्ष्य (for समीक्ष्य). Ś1 B1 (after corr. as in text) D2.10.11 [उ]त्थितुम्; B3 [उ]द्धर्तुम् (for [उ]त्थातुम्). B4 समीक्ष्य स्थातुमर्हसि.

89 B2 reads 89 in marg. —$^{a}$) D7.9 T2 हिरण्यगर्भो; Cr.m.g.k.t as in text (for °नाभो). Ñ2 D6 स्त्वालापं; V1 B3.4 D1.3 स्त्वचलो; B1 तद्वचो; B2 तु वचो (for मैनाको). —After 89$^{ab}$, D1 ins.:

43* एवमस्त्वित्यथोवाच समुद्रं सरितां पतिम् ।

—Ñ1 illeg. from ला in $^{c}$ up to 90$^{b}$. —$^{c}$) B3 जलात्पूर्णं (for जलात्तूर्णं). —$^{d}$) Ś1 D2.10.11 नाना- (for महा-). Ś1 Ñ B D3.6.7.9.10 T3 -वृत: (for -युत:). —After 89, Ñ2 B D6 ins.:

44* ततो नीलात्समुद्रस्य सलिलात्प्रज्वलन्निव ।
उत्पपात महातेजाः पर्वतः सूर्यसंनिभः ।

[(l. 1) B4 यत्नात् (for नीलात्).]

—B2 cont.:

45* पूजार्थं च हनुमतः विश्रामस्यापि हेतवे ।

90 Ñ1 illeg. for $^{ab}$ (cf. v.l. 89). —$^{a}$) D8 G1 M1 सागरस्य (for स सागर-). Ñ2 B2 D1.6 -तलं (for -जलं). —D6 G2 om. (hapl.) 90$^{bc}$. —$^{b}$) Ñ2 B2 D1.7.9 T3 [अ]त्युच्छ्रितस्; D2.3.5.8.10.11 T1.2 G1.3 M1.3 [अ]भ्युत्थितस् (for [अ]त्यु°). D1.5 G3 तथा (for तदा). —D10 om. from 90$^{c}$ up to l. 1 of 46*. D5 om. 90$^{cd}$. —$^{c}$) B1 यथा च तिमिरं भित्त्वा. —After 90, Ś1 Ñ1 (illeg. up to शृङ्गैः in 91$^{a}$) D1–3.5.7–11 (D5.10 after 90$^{ab}$ owing to om.) S ins.:

46* स महात्मा मुहूर्तेन पर्वतः सलिलावृतः ।
दर्शयामास शृङ्गाणि सागरेण नियोजितः ।

[D10 om. l. 1. —(l. 1) Ś1 D2.11 (with hiatus) उत्थितः (for पर्वतः). Ś1 -[आ]श्रितः (for -[आ]वृतः).]

91 Ñ1 illeg. for $^{a}$ (cf. v.l. 90). —$^{a}$) Ś1 D2.10.11 -कौंभ- (for -कुम्भ-). —Ñ2 illeg. from शृङ्गैः up to आलिख in $^{d}$. —$^{b}$) Ś1 D8.10 M1 भ्राजमानैः स्वयंप्रभैः; D2.11 शुशुभे स महागिरिः. ❀ Cv : शातकुम्भमयैरित्यादावित्थंभूतलक्षण इति तृतीया । पूर्वेण च संबन्धः ।; Cr : स महात्मेत्यादिश्लोकद्वयमेकं वाक्यम् । पर्वतः सलिलावृत इति पाठः । शातकुम्भमयैर्दिव्यैः शृङ्गैरित्युपलक्षणे तृतीया ।; Cm : शातकुम्भमयैः शृङ्गैरुपलक्षितः ।; Cg : शातकुम्भनिभैः स्वर्णसदृशैः । आदित्योदयसंकाशैरादित्योदयतुल्यैरित्यर्थः । शृङ्गैरुपलक्षितः शृङ्गाणि दर्शयामासेति योजना ।; Ck : 'सागरेण नियोजितः' इत्यनन्तरम्, शातकुम्भमयैः शृङ्गैरिति पाठः । इदमपि प्रक्षेपसुस्थलम् । अत्रापि 'नियोजितः' इत्यनन्तरं द्वित्राः श्लोकाः प्रक्षिप्ताः । हिरण्यनाभो हिरण्यशृङ्गोऽपीति प्रदर्श्यते शातकुम्भमयैरित्यादि ।; Ct : शातकुम्भमयैरित्यादि । अत्रापि द्वित्रश्लोकप्रक्षेपः परेषाम् । हिरण्यनाभत्वविवरणं शातकुम्भमयैरिति । आदित्योदयसंकाशैरित्युपलक्षित इति शेषः. ❀ —$^{c}$) Ś1 -शत-; B3 -रश्मि- (for -[उ]दय-). —$^{d}$) Ś1 Ñ1 B1–3 D1–3.5–11 T G1 उल्लिखद्भिर् (for आलि°). B4 भ्राजमानैः स्वयंप्रभैः (=93$^{b}$).

92 B4 om. 92–93. D2.11 om. (hapl.) 92$^{b}$–93$^{a}$. D5 transp. 92 and 93. —$^{ab}$) D5 T2 M3 तप्त- (for तस्य). Ñ2 B1–3 D1.3.6 G1.3 समुच्छ्रितैः (for °त्थितैः). T1 G2 तस्य जांबूनदमयैः शृंगैः सद्यः समुत्थितैः. —Ś1 om. 92$^{c}$–93$^{b}$. Ñ1 illeg. from संकाशम् in $^{c}$ up to 94$^{b}$. D9 illeg. for $^{c}$. —$^{c}$) Ñ2 B2 रत्न-; B1 वर्म-; B3 अर्क- (for शस्त्र-).

93 B4 D8 om. 93; Ś1 D10 om. 93$^{ab}$; D2.11 om. 93$^{a}$; Ñ1 illeg. for 93 (for Ś1 Ñ1 B4 D2.11, cf. v.l. 92). D5 transp. 92 and 93. —$^{a}$) D5 तप्तजांबूनदैः शृंगैर्; G2 जांबूनदमयैः शृंगैर्. —Ñ2 B1–3 D6 transp. $^{b}$ and $^{d}$. —$^{b}$) D11 वार्यमाणैः (for भ्राजमानैः). D7.9 महाप्रभैः; T1 स्वलंकृतैः (for स्वयंप्रभैः). —$^{c}$) Ñ2 B1.2 T1.3 G M1.2 -[उ]दय-; B3 -[उ]पल- (for -शत-). Ñ2 B1–3 T3 G1.3 M1 -संकाशैः (for -संकाशः). —$^{d}$) G1 अभवद् (for सोऽभवद्).

94 Ñ1 illeg. for 94$^{ab}$ (cf. v.l. 92). D2.11 om. (hapl.) 94–96$^{b}$. —$^{a}$) Ś1 Ñ2 B1.2.4 D1.6.7.9.10 T2.3 सम्- (for तम्). Ś1 अकस्मात्तं; D1 महाशृंगैर्; T3 अनारम्भ्यं (for असंगेन). B3 समुत्थिताप्रसंगेन. —$^{b}$) B3 D5.6 M2 स्थितः (for स्थितम्). —$^{d}$) Ś1 D1.10 [अ]मन्यत; Ñ1 [अ]चिंतयत्; Ñ2 बुद्धिमान्; B D6 बुद्धवान्; M3 निश्चयः (for निश्चितः). D3 विघ्नोसावित्यमन्यत. ❀ Cv : तमित्यस्य 'निश्चितः' इत्यनेन संबन्धः । कर्तरि च निष्ठा । निश्चितवानिति यावत् ।; so also Cr.g. ❀

G. 5. 7. 22
B. 5. 1. 101
L. 4. 61. 112

स तमुच्छ्रितमत्यर्थं महावेगो महाकपिः ।
उरसा पातयामास जीमूतमिव मारुतः ॥ ९५
स तदा पातितस्तेन कपिना पर्वतोत्तमः ।
बुद्ध्वा तस्य कपेर्वेगं जहर्ष च ननन्द च ॥ ९६
तमाकाशगतं वीरमाकाशे समवस्थितम् ।
प्रीतो हृष्टमना वाक्यमब्रवीत्पर्वतः कपिम् ।
मानुषं धारयन्रूपमात्मनः शिखरे स्थितः ॥ ९७
दुष्करं कृतवान्कर्म त्वमिदं वानरोत्तम ।
निपत्य मम शृङ्गेषु विश्रमस्व यथासुखम् ॥ ९८
राघवस्य कुले जातैरुदधिः परिवर्धितः ।
स त्वां रामहिते युक्तं प्रत्यर्चयति सागरः ॥ ९९

95 $D_{2.11}$ om. 95 (cf. v.l. 94). —$^{a}$) $\tilde{N}_1$ $D_{1.3.10}$ $G_2$ उत्थितम् (for उच्छ्रितम्). $D_1$ अत्युच्चं (for अत्यर्थं). $\tilde{N}_2$ B $D_6$ तमभ्युत्थितमत्यर्थं. —$^{b}$) $B_4$ महाद्युतिः (for °कपिः). —$^{c}$) $B_{1-3}$ $D_{3.6}$ तरसा (for उरसा). $Ś_1$ $B_{1.4}$ [आ]च्छादयामास; $B_{2.3}$ $D_{6.10}$ छाद°; $D_{1.3}$ साद°; $G_2$ ताड° (for पात°). —$\tilde{N}_1$ illeg. for $95^{d}$ – 97. —$^{d}$) $Ś_1$ $\tilde{N}_2$ B $D_{6.10}$ मारुतिः.

96 $D_{2.11}$ om. $96^{ab}$ (cf. v.l. 94). $\tilde{N}_1$ illeg. for 96 (cf. v.l. 95). —$^{a}$) $\tilde{N}_2$ $B_{1.2}$ $D_6$ $G_{1.3}$ $M_{1.2}$ तथा (for तदा). $Ś_1$ $\tilde{N}_2$ B $D_{6.10}$ [आ]च्छादितस्; $D_{1.3.5.7-9}$ $T_2$ $M_2$ Ck.t सादि°; $G_2$ ताडि° (for पाति°). —$^{b}$) $G_2$ नगसत्तमः (for पर्वतोत्तमः). —$^{c}$) $D_6$ बुद्ध्या (for बुद्ध्वा). $D_{7.9}$ $G_3$ हरेर् (for कपेर्). $Ś_1$ $D_{2.10.11}$ दृष्ट्वा तस्योरुवेगं च ($D_{11}$ °गेन); $D_8$ बुद्ध्वास्य च महावेगं. —$^{d}$) $Ś_1$ $D_{2.10.11}$ जहृषे (for जहर्ष). $\tilde{N}_2$ $B_{1.3.4}$ $D_{1.3.6-9}$ $T_3$ $G_1$ $M_{1.2}$ ननाद (for ननन्द). $B_2$ जहर्ष पर्वतोत्तमः. ❀ Cv: जहर्ष विसिष्मिये।; Cr.m: जहर्ष च ननाद (Cm °नन्द) च। (Cr °चेति पाठः।) 'च' इत्यनेन कायमनसोर्विकृतिरुच्यते।; Ck: 'जहर्ष च ननाद चेति पाठः। बलवैभवं दृष्ट्वा जहर्ष। अथ स्वोत्थानप्रयोजनावेदनाय ननाद च शब्दं च कृतवान्।; Ct: 'जहर्ष च ननाद च' इति प्राचीनः पाठः। बलवैभवं दृष्ट्वा जहर्ष स्वोत्थानप्रयोजनावेदनाय ननाद शब्दं कृतवान्। 'ननन्द' इति त्वाधुनिककल्पितः पाठः. ❀

97 $\tilde{N}_1$ illeg. for 97 (cf. v.l. 95). —$^{a}$) $Ś_1$ $\tilde{N}_2$ B $D_{1-3.6.10.11}$ स तमाकाशगंभीरम् ($B_3$ °गमनम्). —$^{b}$) $D_3$ $T_3$ आकाश- (for °शे). $Ś_1$ $D_{11}$ च समुत्थितं; $\tilde{N}_2$ $D_{2.5.7.9.10}$ $M_3$ समुपस्थितं ($D_{5.7.9}$ $M_3$ °तः); T $M_2$ समवस्थितः; $G_2$ पर्यवस्थितः (for समवस्थितम्). $B_{1.2.4}$ आकाशस्थमभि ($B_1$ °व)स्थितं; $B_3$ दर्शनीयं व्यवस्थितं. —$D_3$ transp. $^{cd}$ and $^{ef}$. —$^{c}$) $Ś_1$ $D_{2.10.11}$ स्थितो हृष्टमना; $\tilde{N}_2$ B $D_6$ हृष्टः ($B_3$ दृष्ट्वा) प्रीतियुतं; $D_{1.3}$ सं ($D_1$ स)प्रहृष्टमना; $D_5$ प्रीतो तुष्टमना (for प्रीतो हृष्टमना). —$^{d}$) $B_3$ हरिं (for कपिम्). $D_8$ पर्वतः कपिमब्रवीत् (by transp.). —After $97^{cd}$, $Ś_1$ $D_{1-3.10.11}$ ins., while $D_5$ ins. after 97:

47* हिरण्यनाभो नाम्नाहं काञ्चनः पर्वतः कपे।
मयि विश्रम भद्रं ते त्वदर्थमहमुद्यतः।
अब्रवीच्च हनूमन्तं काञ्चनः पर्वतोत्तमः।

[(l. 1) $Ś_1$ $D_{10.11}$ om. (hapl.) from पर्वतः up to काञ्चनः in l. 3. —After l. 1, $D_{1.3}$ ins.:

47(A)* मा वीर भूयः प्रहर नास्मि यत्ते मनोगतम्।
विघ्नो विघ्नजितोऽहं हि पितुः प्रियसखस्तव।

[(l. 2) $D_1$ नाहं (for [ऽ]हं हि).]

—(l. 2) $D_3$ अत्र (for मयि). $D_2$ विश्रम्य; $D_{11}$ विश्राम्य (for विश्रम). $D_{2.11}$ उत्थितः (for उद्यतः). $D_5$ जलधेर्गर्भमागतः (for the post. half). —$D_5$ om. l. 3. —(l. 3) $D_{2.11}$ तं (for च).]

—$^{e}$) $B_3$ मानुष्यं. $Ś_1$ $D_{2.10.11}$ धारयन्मानुषं (by transp.). —$^{f}$) $Ś_1$ $D_{10}$ रमस्व; $D_{2.11}$ स्वीये च (for आत्मनः). $B_2$ शिखर- (for °रे). —After 97, $D_8$ ins.:

48* उवाच हरिशार्दूलं मैनाकः पवनात्मजम्।

98 $\tilde{N}_2$ B $D_6$ read 98 after 101. —$^{a}$) $\tilde{N}_1$ illeg.; $D_{5.11}$ दुष्कृतं; Cr as in text (for दुष्करं). $B_3$ करिष्यसि महत्कर्म. —$^{b}$) $D_{11}$ अहं (sic) (for इदं). $\tilde{N}_2$ B $D_6$ वानरेश्वर; $D_{1.11}$ वानरोत्तमः. —$\tilde{N}_1$ illeg. from शृङ्गेषु in $^{c}$ up to यथा in $^{d}$. —$^{c}$) $\tilde{N}_2$ B निष्पत्य; $D_3$ तिष्ठात्र (for निपत्य). $B_1$ कूटेषु (for शृङ्गेषु). —$^{d}$) $Ś_1$ $D_{2.10}$ विश्राम्य त्वं; $\tilde{N}_2$ $B_{1.2.4}$ $D_6$ विश्रम्येह; $B_3$ विश्रामय; $D_8$ विश्रम त्वं; $D_{11}$ °म्य त्वं (for °मस्व). $D_{7.9}$ सुखं विश्रम्य गम्यतां. ❀ Cv: विश्राम्यस्व यथासुखमिति पाठः।; Cr: विश्रमस्वेति। श्रमिरात्मनेपदी भावादिकः कश्चिदस्ति। तथाचोक्तं भट्टमल्लेन विश्राम्यतीति विश्रान्तौ तथा विश्रमते मतमिति. ❀ —After 98, $D_1$ ins.:

49* त्वां वीरं लङ्घने दक्षं सागरस्य महीयसः।
मध्यागतं त्वामुदधिः प्रहृष्टेनान्तरात्मना।
स मामाह सुतो ह्येष वायोः प्रियसखस्य ते।
राघवार्थे प्लुतोऽभ्येति लङ्कां रावणपालिताम्।
सीतां द्रक्ष्यसि दुर्धर्षो रामस्य महिषीं प्रियाम्। [5]
रावणस्य विनाशाय राघवस्यार्थसिद्धये।
देवानां च प्रहर्षाय विनाशाय च रक्षसाम्।
क्रमतस्तस्य वीरस्य कपिसिंहस्य पर्वत।
मारुतस्य प्रियं कुर्वन्नुत्तिष्ठस्व नगोत्तम।
त्वया च कृतविश्रान्तः ससुखं च तरिष्यति। [10]
सागरस्य परं पारं हनुमान्कपिसत्तमः।
कृतं हि पूर्वं पित्रास्य तव पर्वतसत्तम।

99 $\tilde{N}_1$ illeg. up to रुदधिः in $^{b}$. —$^{ab}$) $Ś_1$ मुदा च

कृते च प्रतिकर्तव्यमेष धर्मः सनातनः ।
सोऽयं तत्प्रतिकारार्थी त्वत्तः संमानमर्हति ॥ १००
त्वन्निमित्तमनेनाहं बहुमानात्प्रचोदितः ।
योजनानां शतं चापि कपिरेष समाप्लुतः ।
तव सानुषु विश्रान्तः शेषं प्रक्रमतामिति ॥ १०१
तिष्ठ त्वं हरिशार्दूल मयि विश्रम्य गम्यताम् ।
तदिदं गन्धवत्स्वादु कन्दमूलफलं बहु ।
तदास्वाद्य हरिश्रेष्ठ विश्रान्तोऽनुगमिष्यसि ॥ १०२
अस्माकमपि संबन्धः कपिमुख्य त्वयास्ति वै ।
प्रख्यातस्त्रिषु लोकेषु महागुणपरिग्रहः ॥ १०३
वेगवन्तः प्लवन्तो ये प्लवगा मारुतात्मज ।
तेषां मुख्यतमं मन्ये त्वामहं कपिकुञ्जर ॥ १०४

G. 5. 7. 33
B. 5. 1. 111
L. 4. 61. 124

---

( for उदधिः ). Ś1 D9-11 G1 परिवर्तितः ( for परिवर्धितः ). Ñ2 B D6 पूर्वजै( Ñ2 B3 D6 °कै ) राघवस्यायमुदधिः सं( B4 सु )प्रवर्धि( B1 °र्ति )तः. —$^{c}$ ) Ś1 त्वं; D1 T1 G3 M2 त्वा ( for त्वां ). D6 युक्तः ( for युक्तं ). —$^{d}$ ) Ś1 D2.10.11 M1 प्रत्यर्थ( D11 °र्ध; M1 °र्प )यति ( for प्रत्यर्चयति ). Ñ2 B D6 प्रत्य( B2 अभ्य )र्चयितु( Ñ2 ***** [ illeg. ] )मिच्छति ( B3 °मर्हसि ).

100 $^{a}$ ) Ś1 D10 वृत्यैव; Ñ B1.2.4 D3.6 कृते हि; B3 भूते हि; D1 कृतं हि; Cm as in text ( for कृते च ). D10 G1 परिकर्तव्यम् ( for प्रति° ). —$^{b}$ ) Ś1 Ñ1 D1-3.10.11 एषा तात स( D1 तावत्स )तां( Ś1 °दा ) ग( D3 म )तिः. —B1 reads $^{cd}$ in marg. —$^{c}$ ) Ś1 D10 यो ( for सो ). Ś1 D1-3.10.11 प्रत्युपकारार्थी; T3 Cg त्वत्प्रति°; Cr.m as in text ( for तत्प्रति° ). Ñ2 B D6 सोयं( B3 अहं ) त्वत्प्रि( B1 मत्प्रि; B2 त्वं प्रि; B4 तत्प्रि )यकामार्थी. —$^{d}$ ) Ś1 D10 त्वं नः; Ñ2 तत्त्वं ( for त्वत्तः ). Ś1 D10 अर्हसि; Cr.m.g अर्हति ( as in text ). B1 त्वं तु संमंतुमर्हसि; B2.4 विश्रामं( B4 °श्वासं ) त्वमिहार्हसि; B3 तत्त्वं संस्मर्तुमर्हसि; D6 तत्त्वं सुस्पष्टमर्हसि. ❀ Cm : कृते चेति । कृते उपकारे सोऽयमुदधिस्तत्प्रतिकारार्थीति पाठः. ❀ —After 100, T1 reads $102^{ab}$.

101 $^{a}$ ) Ñ1 illeg. up to बहुमाना in $^{b}$. —$^{b}$ ) B1 D3 प्रनोदितः; B3 समीरितः (for प्रचोदितः). —After $101^{ab}$, Ś1 Ñ B D1-3.5.6.8.10.11 T2.3 G3 M read $102^{ab}$. —$^{c}$ ) Ś1 Ñ1 D1-3.10.11 दूरं; Ñ2 B D6 साग्रं; D8 वापि ( for चापि ). —$^{d}$ ) D5 कथं शेषं ( for कपिरेष ). Ñ2 B D6 समाहितः; D2.7.9-11 T2 G1 M1 Ck.t खमाप्लुतः; Cr.m as in text ( for समाप्लुतः ). —B1 reads $101^{ef}$ in marg. —$^{e}$ ) D5 मम; D6 तच्च; D11 तत- ( for तव ). D8 सानुनि ( for °षु ). Ñ2 B D6 विश्रम्य ( for विश्रान्तः ). —$^{f}$ ) B4 D1.3.6.8 वि( D6 सं )क्रमताम्; Cr प्रक्रमताद्; Cm.g.k.t as in text ( for प्रक्रमताम् ). Ñ1 B4 अयं ( for इति ). Ś1 D2.10.11 त( D2 स्त्र )तः शेषं गमिष्यति. ❀ Cv: त्वन्निमित्तमित्यादि । अत्र पूर्वार्धं पश्चार्धं द्रष्टव्यम् । लेखकैस्तु प्रमादाद्व्यत्यस्तम् ।; Cr.m : त्वन्निमित्तमित्यादि श्लोकद्वयमेकं वाक्यम्. ❀ —After 101, Ñ2 B D6 read 98. —After 101, D1.3 ins. :

50* सोऽहमेवं समुद्रेण भवतोऽर्थं महाबलः ।
उक्तः संप्रीतियुक्तेन स्थितवान्वानरोत्तम ।
त्वया चातिबलेनास्मि उरसा संप्रकम्पितः ।
संवृत्तः शिखरैर्हीनस्त्वामासाद्यातिविक्रम ।

[ (l. 1) D3 [ऽ]र्थं ( for ऽर्थं ). D3 महाबल. —(l. 3) Note hiatus between the two halves. ]

102 G2 om. $102^{ab}$. Ñ1 illeg. for $102^{ab}$. Ś1 Ñ B D1-3.5.6.8.10.11 T2.3 G3 M read $102^{ab}$ after $101^{ab}$; while T1 reads $102^{ab}$ after 100. —$^{a}$ ) D1.5 त्वं तिष्ठ ( by transp. ); D3 उत्तिष्ठ ( for तिष्ठ त्वं ). G1 M3 Cr.m कपिशार्दूल. Ś1 D2.10.11 उत्तिष्ठ गिरिशार्दूल; Ñ2 B D6 उत्तिष्ठ पर्वतश्रेष्ठ; Cr.m.k.t as in text. —$^{b}$ ) Ś1 D2.10.11 त्वयि विश्राम्य तु क्षणं; Ñ2 B2-4 D6 त्वयि विश्र( B4 °श्रा )म्य गच्छतु; B1 विश्रांतो वै गमिष्यति; D1.3 मयि विश्र( D3 °श्रा )म्यतामिति; T1 विश्रम्य मयि गम्यतां. ❀ Ct : अत्र 'तिष्ठ त्वम्' इत्यर्धं प्रक्षिप्तमिति केचित्. ❀ —B3 om. $102^{c-f}$. —$^{d}$ ) Ñ2 B1.2.4 D6 शुचि- ( for कन्द- ). D6 -मूलं ( for -मूल- ). G2 महत् ( for बहु ). —$^{e}$ ) Ś1 D2.10.11 आस्वाद्यैतद्; Ñ2 B1( before corr. as in B4 ).2 D6 समास्वाद्य; B4 समासाद्य ( for तदास्वाद्य ). —$^{f}$ ) T2 विश्राम्य ( for विश्रान्तो ). Ś1 D1.3.10.11 [ऽ]मि-; Ñ1 illeg.; Ñ2 B1.2.4 D6 वै; D2 [ऽ]धि-; D7.9 [ऽ]थ; T2 श्वो ( for ऽनु- ). D1.3.8 T3 G1.2 M1.2 -पतिष्यसि( D1 G2 °ति ); D2.11 -गमिष्यति ( for °सि ).

103 Ñ1 D1.3 transp. 103 and 104 and read after 105. —$^{b}$ ) Ś1 D2.10.11 -श्रेष्ठ ( for -मुख्य ). Ś1 Ñ B D1-3.6.10.11 महांस्त्वयि ( for त्वयास्ति वै ). —$^{c}$ ) Ñ1 illeg.; B D6 प्रथितस्; D1.3 विख्यातस् ( for प्रख्या° ). D5 reads लोकेषु in m. ❀ Cr : महागुणपरिग्रहो महागुणानां परिग्रहो महागुणपरिग्रहः ।; Cm : महागुणपरिग्रहो महागुणेन वायुना परिगृह्यत इति तथा ।; Cg : प्रख्यात इति संबन्धविशेषणम् । महागुणानां परिग्रहो यस्मिन्स तथा ।; Ck.t : महागुणपरिग्रहः । बहुव्रीहिरयम् । अतएव त्रि( Ct अतस्त्रि )षु लोकेषु प्रख्यातः. ❀

104 Ñ1 D1.3 transp. 103 and 104 and read after 105. —$^{a}$ ) Ś1 B4 D3.10 T2.3 प्लवंते ये; B1 कपिश्रेष्ठ ( for प्लवन्तो ये ). Ñ2 D6 वेगेन प्लवमाना ये. —$^{b}$ ) D1 T1 प्लवंगा. —B3 om. $104^{c}$ ( except तेषां ). —$^{c}$ ) D6 M1 तेषु; Ck.t as in text ( for तेषां ). B1 मुख्यतरं; G2 °महं; Ck.t as in text ( for °तमं ). —$^{d}$ ) M1 चिरं ( for अहं ). Ś1 D2.10.11 कपिसत्तम; Ñ1 कपिपुंगव; Ñ2 B D6 पवनात्मज; D9 कपिकुंजरं.

G. 5. 7. 33
B. 5. 1. 112
L. 4. 61. 125

अतिथिः किल पूजार्हः प्राकृतोऽपि विजानता ।
धर्मं जिज्ञासमानेन किं पुनर्यादृशो भवान् ॥ १०५
त्वं हि देववरिष्ठस्य मारुतस्य महात्मनः ।
पुत्रस्तस्यैव वेगेन सदृशः कपिकुञ्जर ॥ १०६
पूजिते त्वयि धर्मज्ञ पूजां प्राप्नोति मारुतः ।
तस्मात्त्वं पूजनीयो मे शृणु चाप्यत्र कारणम् ॥ १०७
पूर्वं कृतयुगे तात पर्वताः पक्षिणोऽभवन् ।
तेऽपि जग्मुर्दिशः सर्वा गरुडानिलवेगिनः ॥ १०८
ततस्तेषु प्रयातेषु देवसंघाः सहर्षिभिः ।
भूतानि च भयं जग्मुस्तेषां पतनशङ्कया ॥ १०९
ततः क्रुद्धः सहस्राक्षः पर्वतानां शतक्रतुः ।
पक्षांश्चिच्छेद वज्रेण तत्र तत्र सहस्रशः ॥ ११०
स मामुपगतः क्रुद्धो वज्रमुद्यम्य देवराट् ।
ततोऽहं सहसा क्षिप्तः श्वसनेन महात्मना ॥ १११
अस्मिँल्लवणतोये च प्रक्षिप्तः प्लवगोत्तम ।
गुप्तपक्षः समग्रश्च तव पित्राभिरक्षितः ॥ ११२

---

105 $^{a}$) Ś1 D2.10.11 प्रति- ; D9 किं न ( for किल ). D9 पूजार्हं; D11 पूज्यार्हः . —$^{b}$) Ñ1 मतः सतां; D1 सतां वरः ; D3 सतां मतः ; D8 विधानतः ( for विजानता ). Ñ2 B1.2 D6 जानता( B1 °तः; B2 [marg.] also संप्राप्तः ) प्रा( Ñ2 प्र )कृतो ह्यपि; B3 जनानां प्रकृतो ह्यपि; B4 पूजां प्राप्नोति मारुतः ( sic ). —$^{c}$) D5 धर्मे; D9 धर्म- ; M1 मया ( for धर्मं ). Ñ1 D1.3 धर्मं विजानता ( D3 °तां ) नित्यं; Ñ2 B D6 धर्मज्ञेन( B1 °ज्ञश्च ) कपिश्रेष्ठ; D2 धर्मजिज्ञासमानोपि. —$^{d}$) B3 D8 T3 G3 M3 किं पुनस्त्वादृशो महान् ( B3 °शो भवान् ; T3 °शोतिथिः ). ❀ Cr.m : त्वादृशो महानिति पाठः। ; Ck.t : भवान्यादृशस्तादृशः पूज्य इति। किं पुनरिति योजना. ❀ —After 105, Ñ1 D1.3 read 103–104 ( transp. ).

106 $^{a}$) D3 तेन ( for त्वं हि ). —$^{b}$) Ñ2 D6 पवनस्य ( for मारुतस्य ). —$^{d}$) B1.4 D1.3.5.9.11 M1 कपिकुंजरः .

107 $^{a}$) Ś1 D2.10.11 सर्वात्मा; Ñ1 D1.3 धर्मात्मा; Ñ2 B पूजार्हे( Ñ2 °र्हं; B2 °र्हः ) ; D6 पूजां चै; D7–9 T1 धर्मज्ञे ( for धर्मज्ञ ). —$^{b}$) Ñ1 वायु **** ( illeg. )जितः ; B3 D6 पूजितः( D6 प्राप्नोति ) स च मारुतः. —After 107$^{ab}$, Ś1 D2.10.11 ins., while Ñ2 B D1.6 ins. after 107 :

51* एवमुक्तस्तु हनुमान्सुनाभेन महात्मना।
अन्तरिक्षगतः श्रीमान्मारुतस्यात्मसंभवः।
स तं दृष्ट्वा महावीर्यं पर्वतं मेघभूषितम्।
मणिरत्नाकरं दिव्यं सुनाभमिदमब्रवीत्।
समुद्रस्याप्रमेयस्य महामकरसंकुले। [5]
किं त्वमन्तर्जले वीर विगाहे ब्रूहि कारणम्।
एवमुक्तः शुभं वाक्यं सुनाभः पर्वतोत्तमः।
प्रत्युवाच हनूमन्तं शृणु चाप्यत्र कारणम्।

[ ( l. 1 ) D2.11 भगवान् ( for हनुमान् ). —( l. 2 ) Ñ2 B अंतरीक्षगतः . B2 reads from मारुतस्य up to श्रीमान् ( see var. ) in l. 6 in marg. —( l. 3 ) Ñ2 B1 D6 तु दृष्ट्वा; B4 दृष्ट्वा च ( for तं दृष्ट्वा ). Ñ2 B2.3 D1 महावीर्यः ( for °र्यं ). Ñ2 B1–3 D1.6 हेम- ( for मेघ- ). B4 -संनिभं ( for -भूषितम् ). —( l. 5 ) B3 सागरस्य ( for समुद्रस्य ). Ś1 D10 -कुंडले ( for -संकुले ). —( l. 6 ) Ñ2 D1 धीमन्; B1.3.4 D6 धीमान् ; B2 श्रीमान् ( for वीर ). Ñ2 निगूढो; B1 विगाढो; D1 विगाढं; D6 विगूढो ( for विगाहे ). —Ś1 om. ( hapl. ) from l. 7 up to 107. —( l. 7 ) D2.11 उक्त्वा ( for उक्तः ). Ñ2 ***** तोत्तमः ( illeg. ) ( for the post. half ). —( l. 8 ) Ñ2 B D6 वाक्यज्ञं( B2 D6 °ज्ञो ) वाक्यकोविदः( Ñ2 B2 D6 °दं ) ( for the post. half ). ]

—Thereafter B4 cont. l. 4-6 of 52*. D2.10.11 om. ( hapl. ) 107$^{cd}$. —$^{c}$) Ñ2 B D6 तस्मात्पूजार्ह एव त्वं. —$^{d}$) B4 [अ]न्यत्तु; D6 [अ]प्युप- ( for [अ]प्यत्र ). D1 तच्चाप्यत्र च कारणं.

108 B4 om. 108–112. —$^{ab}$) Ś1 D1–3.10.11 पुरा ( for पूर्वं ). Ñ B1–3 D6 पक्षवंतः पुरा शैला बभूवुः शीघ्रगामिनः . —$^{c}$) Ś1 D1–3.10.11 ते( D3 नि ) व्रजंति; Ñ2 B1.2 D6 व्रजंति स्म; D5 तेपि सर्वे; T1.3 G2 M3 तेभिजग्मुर् ( for तेऽपि जग्मुर् ). B3 नानादेशं बभ्रमुस्ते. ❀ Cg पक्षिणः पक्षवन्तः। हिः पादपूरणे. ❀ —$^{d}$) D7–9 G गरुडा इव ( for °डानिल- ). Ś1 Ñ2 B1–3 D2.6.10.11 -रंहसः ( for -वेगिनः ).

109 B4 om. 109 ( cf. v.l. 108 ). —$^{b}$) Ñ1 सदानवाः; Ñ2 B1–3 D6.8 सहस्रशः ; D9.10 T2 महर्षिभिः ; M1 सुरर्षिभिः ( for सहर्षिभिः ). —$^{d}$) D10 पातन- ; D11 पर्वत- ( sic ) ( for पतन- ).

110 B4 om. 110 ( cf. v.l. 108 ). —$^{b}$) Ś1 D2.10.11 पुरंदरः ; Ñ B1.2 D6 सहस्रशः ; B3 महात्मनां ; D8 क्षयाय वै ( for शतक्रतुः ). —$^{c}$) G1 चिच्छेद पक्षान् ( by transp. ). —$^{d}$) Ñ2 G2 ततस्तत्र; D2.7–9 G1 M2 ततः शत- ; T3 M1 शतशश्च ( for तत्र तत्र ). Ñ B1–3 D6 शतक्रतुः ( for सहस्रशः ). ❀ Cr : तत्र तत्र सहस्रश इति पाठः. ❀

111 B4 om. 111 ( cf. v.l. 108 ). —$^{ab}$) D1.3.6 उपागतः ; T1 उपागमत् ; M1 उपागतं ( for उपगतः ). D11 समुपागमत क्रुद्धो ( for $^{a}$ ). Ś1 वेधराट्. B3 मां चापि वज्रमुद्यम्य पक्षौ छेत्तुं स देवराट्. —$^{c}$) T3 दृष्टः ; Ct as in text ( for क्षिप्तः ). —$^{d}$) Ñ B1–3 D6 G3 पवनेन ( for श्वसनेन ).

112 B4 om. 112 ( cf. v.l. 108 ). Ñ1 illeg. for $^{b}$. —$^{b}$) B1 विक्षिप्तो ( for प्रक्षिप्तः ). Ñ2 B1–3 D6 वानरर्षभः; G2 प्लवगेश्वर. —$^{c}$) Ś1 D1–3.10.11 गुप्त( D3.10 °प्तः )पक्षैः. Ś1 D2.10.11 समस्तैश्च; Ñ2 B1–3 D6 समर्थश्च; D1 समं श्रेष्ठ; D3 समग्रैश्च; T2 समुद्रश्च; G1 समूलश्च ; Cg as in text

ततोऽहं मानयामि त्वां मान्यो हि मम मारुतः ।
त्वया मे ह्येष संबन्धः कपिमुख्य महागुणः ॥ ११३
अस्मिन्नेवंगते कार्ये सागरस्य ममैव च ।
प्रीतिं प्रीतमनाः कर्तुं त्वमर्हसि महाकपे ॥ ११४
श्रमं मोक्षय पूजां च गृहाण कपिसत्तम ।
प्रीतिं च बहु मन्यस्व प्रीतोऽस्मि तव दर्शनात् ॥ ११५
एवमुक्तः कपिश्रेष्ठस्तं नगोत्तममब्रवीत् ।
प्रीतोऽस्मि कृतमातिथ्यं मन्युरेषोऽपनीयताम् ॥ ११६
त्वरते कार्यकालो मे अहश्चाप्यतिवर्तते ।
प्रतिज्ञा च मया दत्ता न स्थातव्यमिहान्तरा ॥ ११७

G. 5. 7. 54
B. 5. 1. 124
L. 4. 61. 140

(for समग्रश्च). —$^{d}$) Ñ1 महात्मना; B1–3 D2.10.11 हि( B3 सु; D2.10.11 [ अ ]स्मि ) रक्षितः ( for [ अ ]भिर° ). ❀ Cg: समग्रः समग्रपक्षः । गुप्तसमग्रपक्षश्च यथा भवामि तथाभिरक्षितोऽस्मीत्यर्थः. ❀ —After 112, Ñ2 B1–3 D1.6 ins.; while B4 cont. l. 4–6 only after 51*:

52* तदा गिरीणां सर्वेषां छिद्यमानान्महात्मना ।
पक्षान्दृष्ट्वा महेन्द्रेण प्रविष्टोऽहं महार्णवम् ।
सोऽहमिन्द्रभयात्तात प्रविष्टो वरुणालयम् ।
वसाम्यन्तर्जले घोरे भोगवानिव पन्नगः ।
हिरण्यनाभो नाम्नाहं काञ्चनः पर्वतोत्तमः । [5]
मा भैषीर्विश्रमात्र त्वं त्वदर्थमहमुत्थितः ।

[ (l. 1) B3 D1 ततो ( for तदा ). Ñ2 B3 D6 महात्मनां ( for °ना ). D1 छिद्यमानानि सर्वशः ( for the post. half). —(l. 2) B3 पक्षसंरक्षणाग्यग्रः ; D1 दृष्ट्वा पक्षाणि शक्रेण ( for the prior half). —(l. 3) B3 -भयार्तोपि ( for -भयात्तात ). D1 वसामि वरुणालये ( for the post. half ). —(l. 4) D1 निलम् ( for वसामि ). B4 पक्षवतास्यत्र जले घोरे ( corrupt ) ( for the prior half ). Ñ2 D1 पर्वतः ( for पन्नगः ). —(l. 5) For l. 5–6, cf. l. 1–2 of 47*. Ñ2 B3 नामा ( for नाम्ना ). D1 प्लवगोत्तम.—(l. 6) Ñ2 B1.3 मा भैर्विं( Ñ2 °षी )श्रम्य चात्र त्वं; D1.6 मयि( D6 मा भैर् ) विश्रम भद्रं ते ( for the prior half ). ]

113 $^{a}$) B2 अतो ( for ततो ). B1 मानयिष्यामि; B3 मित्रभावेन ( for मानयामि त्वां ). —$^{b}$) T3 [ s ]सि ( for हि ). Ñ2 B1.2.4 D6 मान्यस्यासि सुतो मम; B3 त्वामप्यत्र महत्तम; D7.9 मान्योसि मम मारुते. —$^{c}$) D7.9 मम ( for मे हि ). Ś1 D2.10.11 एवमस्त्वप्रियो बंधुः; Ñ B D1.3.6 एष मे त्वयि संबंधः. —$^{d}$ ) B1.3 T1.2 G3 महागुण; D2.11 महात्मनः. —After 113, Ś1 D2.10.11 ins.:

53* एष मे त्वयि संबन्धः कृतः कपिवरोत्तम ।

[ D2 reads कृतः in marg. Ś1 D11 -वरोत्तमः. ]

114 $^{a}$) T3 तस्मिन्. B1.2 D9 अ( B2 त )स्मिन्नेव. Ś1 D10 च संबंधे; B4 च कार्येपि; D1 G1 -विधे कार्ये; Cr.t as in text ( for -गते कार्ये ). —$^{b}$) D8 G1 M1 हि; M2 इ ( for च ). —$^{c}$) Ñ1 D7.9.11 G3 प्रीतिमनाः ; Ñ2 B D6 प्रीतिमतः; D1 यतमनाः ( for प्रीतमनाः ). —$^{d}$) D8 T3 G1 M1 अर्हसि त्वं ( by transp. ). Ś1 D2.10.11 महाबल( D11 °लः ); D7.9 °मते ( for °कपे ).

115 $^{b}$) D5.7.9 T2 G3 M2 हरिसत्तम; T3 कपिकुंजर ( for कपिसत्तम ). ❀ Cr: मोक्षय मुञ्च । मोक्ष निरसन इति चौरादिको धातुः. ❀ —For $115^{ab}$, Ś1 Ñ B D1–3.6.10.11 subst.:

54* श्रममोक्षाय पाद्यार्घ्यं गृहाण च कपीश्वर ।

[ Ñ1 D1.3 पाद्यं च; B1 पाद्यार्घ्यौ; D6 पाद्यार्घं ( for पाद्यार्घ्यं ). Ś1 D2.10.11 श्रमान्मोचय चात्मानं ( for the prior half ). Ś1 D2.10.11 मन्यस्व ( for गृहाण ). Ś1 Ñ D1–3.6.10.11 कपिकुंजर; B4 त्वं कपीश्वर. ]

—$^{c}$) D5 माव-; D7.9 मम ( for बहु ). D7 मान्यस्य; D9 मानस्य; D11 मान्यस्त्वं ( for मन्यस्व ). B3 प्रीतिः सुबहुधा वीर. —$^{d}$ ) B3 प्रजाता ( for प्रीतोऽस्मि ). Ś1 Ñ2 B D2.6.10.11 दर्शने.

116 $^{ab}$) Ñ2 B D6 इत्युक्तः शैलराजेन हनूमान्मारुतात्मजः. —After $116^{ab}$, Ñ2 B D6 ins.:

55* अब्रवीत्कृतकृत्योऽस्मि विश्रान्तश्च नगोत्तम ।

—$^{c}$) B2 प्रियम् ( for कृतम् ). —$^{d}$ ) D1 चैव ( for एषो ). Ś1 D2.3.10.11 त्वया मे पर्वतोत्तम( D11 °मः ); Ñ1 सौहार्दमपनीयतां; Ñ2 B3 D6 सौहार्दं चापि दर्शितं; B1 हार्दिक्यं चापि दर्शनं; B2.4 हार्दिक्यं चाति( B4 °पि )दर्शितं.

117 $^{a}$) D5 त्वरतो; D10 त्वरे च; Cv.r.m.g as in text ( for त्वरते ). Ś1 D10 माम् ( for मे ). Ñ2 B D6 त्वरया कार्यहेतोर्मे; D2 त्वरेद्य चरितः कार्यः ; D11 त्वरिते कार्यमुत्पात-. Note hiatus between $^{a}$ and $^{b}$. —$^{b}$) Ñ2 B D6 कालश्चैव; D2.11 कालश्चापि; D8 G2 ह्यह° ( to avoid hiatus ); Cv.r.g as in text ( for अहश्चापि ). B3 [ अ ]तिवर्धते ( for [ अ ]तिवर्तते ). T2 अहश्च व्यतिवर्तते. —D10 om. $117^{cd}$. —$^{c}$) Ñ1 कृता मया प्रतिज्ञा च. —$^{d}$ ) Ñ1 G1 मया; M1.2 मम; Cv.r.g as in text ( for इह ). D5 [ अं ]तरं; D8 T1.3 M1.3 Cv.r.g °रे ( for [ अ ]न्तरा ). —For $117^{cd}$, Ś1 Ñ2 B D1–3.6.11 subst.:

56* क्रमिष्यता प्रतिज्ञातं मया च ज्ञातिमण्डले ।
साधिके योजनशते नान्तरा स्थेयमित्युत ।

[ (l. 1) B1 D2 क्रमिष्यतः ( for °ता ). Ś1 D1.2.11 प्रतिज्ञा च; B1 D3 प्रतिज्ञा मे; B2 प्रतिज्ञातुं ( for प्रतिज्ञातं ). B3 प्रतिश्रुतं पर्वतराट् ( for the prior half ). B1 यथा ( for मया ). Ñ2 D6 हि ( for च ). D3 कृतेयं ( for मया च ). Ś1 D1.2.11 कृता मे कपिसंनिधौ( D1 ज्ञातिमंडले ) ( for the post. half). —(l. 2) B1 सविशे; D1.3 गंतव्ये; D6 साधके ( for साधिके ). Ś1 उच्चके

G. 5. 7. 55
B. 5. 1. 125
L. 4. 61. 142

इत्युक्त्वा पाणिना शैलमालभ्य हरिपुंगवः ।
जगामाकाशमाविश्य वीर्यवान्प्रहसन्निव ॥ ११८
स पर्वतसमुद्राभ्यां बहुमानादवेक्षितः ।
पूजितश्चोपपन्नाभिराशीर्भिरनिलात्मजः ॥ ११९
अथोर्ध्वं दूरमुत्पत्य हित्वा शैलमहार्णवौ ।
पितुः पन्थानमास्थाय जगाम विमलेऽम्बरे ॥ १२०
भूयश्चोर्ध्वगतिं प्राप्य गिरिं तमवलोकयन् ।
वायुसूनुर्निरालम्बे जगाम विमलेऽम्बरे ॥ १२१
तद्द्वितीयं हनुमतो दृष्ट्वा कर्म सुदुष्करम् ।
प्रशशंसुः सुराः सर्वे सिद्धाश्च परमर्षयः ॥ १२२
देवताश्चाभवन्हृष्टास्तत्रस्थास्तस्य कर्मणा ।
काञ्चनस्य सुनाभस्य सहस्राक्षश्च वासवः ॥ १२३

---

सागरजले; B1 (marg. also) अप्राप्ते योजनशते; B3 संविशे योजनशतं; D2.11 तर्तव्ये सागरजले (for the prior half). ]

Ś1 Ñ2 B D1–3 cont.; D10 ins. after $117^{ab}$ (owing to om.):

57* तस्मादिह न तिष्ठामि त्वयि पर्वतसत्तम ।
स्पृशामि त्वाहमङ्गुल्या मानितोऽस्तु भवानिति ।

[ (l. 1) Ś1 D2.10.11 नाहं स्थास्यामि वै तस्मात्; D1.3 तस्मादहं तु न स्थास्ये (for the prior half).—(l. 2) Ś1 D1.3.10 संस्पृशाम्यहमंगुल्या; B3 त्वां स्पृशाम्यहमंगुल्या; D2.11 संस्पृश्य त्वाहमंगुल्या (for the prior half). B1 [ऽ]स्मि; D1 च; D2.11 [ऽ]सि (for ऽस्तु). Ś1 D10 मानयन्भगवानिति (for the post. half). ]

118 B2 reads $118^{ab}$ and $120^{cd}$ here in marg. repeating them after 119. Ñ2 B1.2 (second time).3.4 D6 transp. $118^{ab}$ (all om. $^{cd}$) and 119.—$^{a}$) B3 [उ]क्तः (for °क्त्वा). B3 कपिना (for पाणिना).—$^{b}$) B2 (both times) संस्पृश्य; D5 G3 आलिंग्य; T2.3 M3 Cr आलंब्य; Cm.t as in text (for आलभ्य).—Ñ2 B D6 om. $118^{cd}$.—$^{d}$) Ñ1 illeg. from -वान् up to $119^{a}$. Ś1 D2.10.11 वानरोत्तमः; Cr.t as in text (for प्रहसन्निव).

119 Ñ1 illeg. for $119^{a}$ (cf. v.l. 118). Ñ2 B D6 transp. $118^{ab}$ and 119.—$^{b}$) B2–4 अपेक्षितः (for अवेक्षितः).—$^{c}$) G1 स (for च). Ñ1 illeg. after श्चो up to र्भि in $^{d}$.—$^{d}$) Ñ1 D7.9 अभिनंदितः (for अनिलात्मजः). B3 सपर्याभिर्नगोत्तम (sic).—After 119, Ś1 D2.10.11 ins.; while Ñ1 ins. only colophon:

58* द्विगुणं तु कृतोत्साहः सोम्बरं समगाहत ।

Colophon.

[ D2 वृत- (for कृत-). D2 स समाहितः (for समगाहत).—*Kāṇḍa name*: Ñ1 D10 किष्किंधा.—*Sarga name*: Ś1 Ñ1 D10 मैनाक( Ñ1 *** [illeg.] )दर्शनं; D2.11 मैनाकवाक्यं. ]—After 119, B2 repeats $118^{ab}$ and $120^{cd}$.

120 Ñ2 B D6 om. $120^{ab}$.—$^{a}$) D11 अतोर्ध्वं (metri causa). Ś1 D2.10.11 उत्क्रम्य; Ñ1 उत्प्लुत्य; D7.9 G2 M1 आप्लुत्य (for उत्पत्य). D8 अत ऊर्ध्वं समुत्पत्य.—$^{b}$) Ś1 D1–3.10.11 [अ]चल- (for शैल-).—B2 repeats here $120^{cd}$ (cf. v.l. 118).—$^{c}$) B1 (marg. also as in text) पूर्व- (for पितुः). Ś1 D10 आवृत्य; Ñ1 B1 D3.7–9.11 T1 G2 आसाद्य; D2 आदाय (for आस्थाय). B3 पितुः स्थानं समासाद्य.—$^{d}$) Ñ2 B (B2 both times) D6 प्रहसन्निव (for विमलेऽम्बरे).—After $120^{cd}$ (first occurrence), B2 ins.:

59* दर्शनेनैव तुष्टोऽहं सर्वथा गिरिसत्तम ।

121 Ñ1 M2 om. (hapl.) 121.—$^{a}$) T1 G1.3 ततश्; Ct as in text (for भूयश्). Ś1 [ऊ]र्ध्वं; D1.3 [ऊ]र्ध्वां (for [ऊ]र्ध्व-).—After $121^{ab}$, Ś1 D10 ins.:

60* जगामाकाशमाविश्य वेगेन गरुडो यथा ।

[ Cf. $157^{cd}$. ]

—$^{c}$) Ś1 D1–3.10.11 वायुपुत्रो (for °सूनुर्). D1.7.9–11 निरालंबो (for °लम्बे).—$^{d}$) D1 कपिरंबरे; D5.7.9 T2.3 कपिकुंजरः (for विमलेऽम्बरे).—For 121, Ñ2 B D6 subst. 41*.

122 Ñ2 B D6 read 122–$129^{b}$ after 165.—$^{a}$) Ñ2 B1 D6 तत्तृ( B1 [marg. also] अद्वि )तीयं; B2 T2 अद्वि- (marg. also as in text)तीयं; B3 अतिद्वितीयं (hypm.); D2 न द्वितीयं (for तद्द्वितीयं). D2.11 हनुमता (for °तो).—$^{b}$) D2.11 कृत्वा (for दृष्ट्वा). G1 transp. दृष्ट्वा and कर्म. D1 सुदुस्तरं (for °ष्करम्). ❀ Cv: द्वितीयमिति । समुद्रलङ्घनं प्रथमं पूर्वतः। जयो द्वितीयं कर्म ।; Cr: द्वितीयं कर्म, समुद्रलङ्घनं कर्म प्रथमं मैनाकगिरौ विश्रम्य तत ऊर्ध्वमुत्प्लुत्य पितुः पन्थानमास्थाय गमनं द्वितीयं कर्म ।; Cm: समुद्रलङ्घनं प्रथमं कर्म । द्वितीयं मैनाकगिरावविश्रम्य गमनम् ।; Cg: तद्द्वितीयमिति । द्वितीयं समुद्रलङ्घनापेक्षया द्वितीयं तत्पर्वतजयरूपं कर्म ।; Ck: तद्द्वितीयं कर्मेति । अविश्रम्यैव पुनरूर्ध्वोत्पतनरूपं कर्म । so also Ct. ❀—$^{c}$) Ñ2 B D6 देवता ह्य( B1.3 °श्चा; B2.4 श )भवंस्तुष्टाः.—$^{d}$) Ñ2 B D6 सर्वे (for सिद्धाश्).

123 For sequence in Ñ2 B D6, cf. v.l. 122 and 165.—$^{a}$) Ñ1 देवाश्चापि (for देवताश्च). Ś1 Ñ1 D1–3.10.11 G2 तुष्टास्; Cr.m as in text (for हृष्टास्). Ñ2 B1.2.4 D6 नागगंधर्वदैतेया; B3 नागगंधर्वयक्षैश्च.—$^{b}$) Ñ2 विन्नस्तास्; D6 तत्रसुस् (for तत्रस्थास्). B1.2.4 D6 तेन (for तस्य). B3 गिरेस्तस्य च कर्मणा.—$^{c}$) D1 समुद्रस्य (for काञ्चनस्य). Ñ1 D3 समुद्रश्च सु( D3 स )नाभश्च. ❀ Ck: काञ्चनस्येति । काञ्चनमयस्येति यावत् । शोभना नाभिर्यस्य स तथा । उभाभ्यां हिरण्यनाभिरिति व्युत्पत्तिद्वारा कविना दर्शितम् ।; Ct: काञ्चनस्य

उवाच वचनं धीमान्परितोषात्सगद्गदम् ।
सुनाभं पर्वतश्रेष्ठं स्वयमेव शचीपतिः ॥ १२४
हिरण्यनाभ शैलेन्द्र परितुष्टोऽस्मि ते भृशम् ।
अभयं ते प्रयच्छामि तिष्ठ सौम्य यथासुखम् ॥ १२५
साह्यं कृतं ते सुमहद्विक्रान्तस्य हनूमतः ।
क्रमतो योजनशतं निर्भयस्य भये सति ॥ १२६
रामस्यैष हि दौत्येन याति दाशरथेर्हरिः ।
सत्क्रियां कुर्वता शक्त्या तोषितोऽस्मि दृढं त्वया ॥ १२७
ततः प्रहर्षमलभद्विपुलं पर्वतोत्तमः ।
देवतानां पतिं दृष्ट्वा परितुष्टं शतक्रतुम् ॥ १२८
स वै दत्तवरः शैलो बभूवावस्थितस्तदा ।
हनूमांश्च मुहूर्तेन व्यतिचक्राम सागरम् ॥ १२९
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ।
अब्रुवन्सूर्यसंकाशां सुरसां नागमातरम् ॥ १३०

G. 5. 6. 2
B. 5. 1. 137
L. 4. 62. 12

---

काञ्चनमयस्य सुनाभस्य शोभनमध्यस्य. ❀ —[d]) Ñ2 B D6 परितुष्टश्च; G1 °स्राक्षः स; Cr as in text (for सहस्राक्षश्च).

124 For sequence in Ñ2 B D6, cf. v.l. 122 and 165. —[a]) Ś1 D10 इदं तु; D2.11 स इदं (for उवाच). Ñ1 illeg. for उवाच वचनं. D1.3 अथा (D3 ततो) नरपतिः श्रीमान्. —[b]) Ś1 D2.10.11 परितोषस्य लक्षणं; Ñ1 D1.3 परितुष्टः पुरंदरः.—For 124[ab], Ñ2 B D6 subst.:

61* इदं चोवाच वचनं खस्थस्तं दैवतैः सह ।

[ Ñ2 स खस्थं; B1 खस्थस्तैर्; B4 खस्थं तं; D6 स खस्थो (for खस्थस्तं). ]

—[c]) B3 सुनाभ-; D1 सनाभं (for सुनाभं). —[d]) Ñ1 illeg. from मेव up to द्विक्रा in 126[b]. Ś1 D1-3.10.11 आह (for एव). Ñ2 B D6 स्वय (B3 अह) मिंद्रः सुरेश्वरः.

125 For sequence in Ñ2 B D6, cf. v.l. 122 and 165. Ñ1 illeg. for 125 (cf. v.l. 124). —[c]) D5 प्रदास्यामि (for प्रयच्छामि). —[d]) D6.7.9 G गच्छ (for तिष्ठ). B3 स्वस्ति तिष्ठ गिरींद्रज.

126 For sequence in Ñ2 B D6, cf. v.l. 122 and 165. Ñ1 illeg. up to द्विक्रा in [b] (cf. v.l. 124). —[a]) D11 transp. कृतं and ते. —[b]) B3 D5.7.9 T2 M1 विश्रांतस्य (for विक्रान्तस्य). —[c]) B1.2.4 D2.5 क्रामतो (for क्र°). —[d]) D1 निर्भयस्त्वं (for °स्य). ❀ Cv : निर्भयस्य भये सति भयहेतौ सति तदानीं निर्भयस्य समुद्रलङ्घने किं भविष्यतीत्यस्माकं भये सतीति वा । ; Cr : निर्भयस्य भये सति । अतिविस्तृतसमुद्रोपर्याकाशगमने समुद्रपतनादिभयनिमित्तसंभावनायामपि निर्भयस्य. ❀

127 For sequence in Ñ2 B D6, cf. v.l. 122 and 165. —[a]) Ñ2 D6 रामस्यायं; B2 राघवस्य; D1-3.8.11 G1 रामस्यैव (for रामस्यैष). D2.11 G2 M3 हि दूत्येन; D5 हि दूतोयं; D7.9 हितायैव (for हि दौत्येन). Ś1 D10 रामकार्यार्थदूतस्य; B1.3.4 रामस्य हि स दौत्येन. —[b]) Ś1 D10 त्वया (for याति). Ś1 Ñ1 D10 हरेः; D1 हरौ; D7.9 कपिः (for हरिः). —[c]) D2.11 सत्क्रियाः (for °यां). D1.3 T1 G2 M3 तस्य; G1 भक्त्यं (for शक्त्या). —[d]) Ñ2 B D6 तोषितास्ते; D3 °हं (for तोषितोऽस्मि). Ś1 D10 त्वया भृशं; Ñ2 B1.2 D6 दृढं वयं; B3.4 वयं दृढं; D1-3.11 त्वया दृढं (by transp.) (for दृढं त्वया).

128 For sequence in Ñ2 B D6, cf. v.l. 122 and 165. —[a]) D7.9 स तत् (for ततः). Ś1 Ñ B D2.6.10.11 M1 अ (Ñ1 illeg. after अ up to भे [see var.] in [b]) तुलं; D1.3 T2.3 M3 अगमद्; D5 G1 अभजद् (for अलभद्). —[b]) Ś1 Ñ1 (illeg.) D2.10 स लेभे; D11 सुनाभः (for विपुलं). Ñ2 B1.2.4 D6 लेभे साधुशिलोच्चयः; B3 लेभे गिरिवरात्मजः. —[c]) Ñ2 B D6 प्रभुं (for पतिं). —[d]) D11 -तुष्ट- (for -तुष्टं). D1.3 शचीपतिं (for शतक्रतुम्).

129 For sequence in Ñ2 B D6, cf. v.l. 122 and 165. —[a]) Ś1 D10 सोपि; Ñ2 D3.6 स तु; B स तैर्; D1 अनु-; D2.11 स हि (for स वै). —[b]) Ś1 Ñ1 B4 D10.11 ततः; T3 सदा (for तदा). ❀ Cr : तदा तस्मिन्काले स्वस्थोऽभूदित्यर्थः। अवस्थितस्तस्थेति पाठः. ❀ —After 129[ab], Ñ2 B D6 ins., while D1-3.11 ins. only colophon after 129 :

62* देवताः सिद्धगन्धर्वा यथागतमपूजयन् ।

Colophon.

[ Ñ2 D6 यथागति यद्युदिवं; B1 साधु साधित्यपूजयन् (for the post. half). —*Kānda name*: D1 किष्किधा. —*Sarga name*: Ñ2 B1.4 सुनाभोद्गमः; B2 सागरक्रमणे सुनाभोद्गमः; B3 सुनाभोद्गमनं; D1-3.11 सुनाभदर्शनं (D2 °नं); D6 सुनाभवचः. —*Sarga no.* (figures, words or both): B1 D2.11 om.; Ñ2 B2-4 D6 7; D1 41; D3 2.]

—Ñ2 B D6 om. 129[cd]. —[c]) D3 तु (for च). T3 समुत्पत्य (for मुहूर्तेन). —Ñ1 illeg. for [d]. —[d]) Ś1 D10 व्यतिक्रा (Ś1 °क्र) म्य च (for व्यतिचक्राम). —After 129, T2 G1 M1 ins., while D3 ins. after 130[ab] :

63* तं प्रयान्तं समुद्रीक्ष्य आकाशे मारुतात्मजम् ।

[ M1 transp. तं and प्रयान्तं. D3 (to avoid hiatus) ह्याकाशे (for आ°). ]

130 For sequence in Ñ2 B D6, cf. v.l. 70. —[a]) T1 च (for स-). D10 om. सगन्धर्वाः. —After 130[ab], D3 ins. 63*. —Ñ1 illeg. up to नाग in [d]. —[d]) Ś1 D8.10 नाम; D1-3.11 देव- (for नाग-).

G. 5. 6. 3
B. 5. 1. 138
L. 4. 62. 13

अयं वातात्मजः श्रीमान्प्लवते सागरोपरि ।
हनूमान्नाम तस्य त्वं मुहूर्तं विघ्नमाचर ॥ १३१
राक्षसं रूपमास्थाय सुघोरं पर्वतोपमम् ।
दंष्ट्राकरालं पिङ्गाक्षं वक्त्रं कृत्वा नभःस्पृशम् ॥ १३२
बलमिच्छामहे ज्ञातुं भूयश्चास्य पराक्रमम् ।
त्वां विजेष्यत्युपायेन विषादं वा गमिष्यति ॥ १३३
एवमुक्ता तु सा देवी दैवतैरभिसत्कृता ।
समुद्रमध्ये सुरसा बिभ्रती राक्षसं वपुः ॥ १३४
विकृतं च विरूपं च सर्वस्य च भयावहम् ।
प्लवमानं हनूमन्तमावृत्येदमुवाच ह ॥ १३५
मम भक्षः प्रदिष्टस्त्वमीश्वरैर्वानरर्षभ ।
अहं त्वां भक्षयिष्यामि प्रविशेदं ममाननम् ॥ १३६
एवमुक्तः सुरसया प्राञ्जलिर्वानरर्षभः ।
प्रहृष्टवदनः श्रीमानिदं वचनमब्रवीत् ॥ १३७

---

131 For sequence in Ñ2 B D6, cf. v.l. 70. —[a]) Ñ2 B D6 वायुसुतः (for वातात्मजः). —[b]) G2 M2 क्रमते (for प्लवते). D1.3 सागरं हरिः (for °रोपरि). Ñ2 B D6 लंघयिष्यति सागरं. —[c]) M2 तस्मात् (for तस्य). —[d]) B3 गच्छते (for मुहूर्तं). G3 damaged for विघ्नमाचर.

132 For sequence in Ñ2 B D6, cf. v.l. 70. Ñ1 T3 M2 om. 132. —[a]) B2.3 राक्षसी-(B3 °सीं) (for राक्षसं). B3 तनुम् (for रूपम्). D10 आदाय (for आस्थाय). —[b]) B4 सुघोरा (for सुघोरं). D6 पर्वतोत्तमं. B1.2 सुघोरा पर्वतोपमा; B3 सुघोरां पर्वतोपमां. —[c]) B1.2 D6.11 -कराल-; B3 -करालां (for -करालं). B3 पिंगाक्षीं (for °क्षं). —[d]) B3 रक्तं (for वक्त्रं). Ś1 B2 D10.11 नभः स्पृशत्; D5 T2 G3 M3 °समं (for नभःस्पृशम्). ❀ Ct: नभःस्पृशामिति पुंस्त्वमार्षम्। वक्त्रशब्दोऽर्धर्चादिर्वा. ❀

133 For sequence in Ñ2 B D6, cf. v.l. 70. —[a]) Ñ1 T3 G2 वयम्; Ck.t as in text (for बलम्). D11 इच्छाम्यहं (for °महे). —[b]) T3 [भ]पि (for [श्च]स्य). —For 133[ab], Ñ2 B D6 subst.:

64* बलं विज्ञातुमिच्छामः सत्त्वं चास्य महात्मनः।

[B3 अलं (for बलं). B2 च ज्ञातुम्; B4 तु ज्ञातुम् (for विज्ञातुम्).]

—D11 om. 133[c]–134. —[c]) Ś1 B3 D2.10 G2 किं करिष्यत्युपायं वा; Ñ B1.2.4 D1.3.6 कं(D1.3 किं) भजिष्यत्युपायं वा.

134 For sequence in Ñ2 B D6, cf. v.l. 70. D11 om. 134 (cf. v.l. 133). —[a]) B1.2 D2 M1 उक्त्वा (for उक्ता). D10 om. तु (subm.). —[b]) Ś1 D2.5 G1.2 M2 देवतैर् (sic) (for दै°). Ś1 B3.4 D5.10 G1 M1 अपि (for अभि-). D2 अभिसंवृता; D3 °पूजिता (for °सत्कृता). D1.3 देवैरपि सुपूजिता(D3 च सत्कृता); T3 देवैरप्यपराजिता. —G3 damaged for ° except सा. —[c]) Ñ1 illeg. from र up to वान in 136[b]. Ñ2 B D6 तरसा; D1 सरमा; G2 M2 सहसा (for सुरसा). —[d]) D1.3 धारयद् (for बिभ्रती). Ś1 D3.10 राक्षसी- (for °सं). D2 transp. बिभ्रती and राक्षसं. Ñ2 B D6 धारयन्त्रा(Ñ2 B1 °न्त्री)-क्षसीं तनुं.

135 For sequence in Ñ2 B D6, cf. v.l. 70. Ñ1 illeg. for 135 (cf. v.l. 134). —[a]) B3 विक्रमं (for विकृतं). D1 तु (for च). D2 वलिरूपं; D11 वल° (for च विरूपं). —[b]) Ñ2 B D6 कृत्वा रूपं; D1 सर्वेसामपि; M3 सर्वेषां च (for सर्वस्य च). —After 135[ab], G2 ins. 67*. —T1 damaged for 135[c]–136[b]. —[d]) D11 आहत्य; G3 वाक्यं च (for आवृत्य). M2 [ए]वम् (for [इ]दम्). D10 च (for ह). Ñ2 B D6 स(B1 स)मावृत्येदमब्रवीत्.

[ D4 om. up to the prior half of l. 2. —( l. 1 ) D11 भूमौ बहुधा ( for बहुभौमांश्च ). Ś1 स प्रासादांश् ( for सप्तभौमांश् ). —( l. 2 ) Ś1 तालैः; D3 जलैः ( for तलैः ). D11 तलस्फाटिकसंवीतैः ( for the prior half ). ]

50 Ñ1 illeg. for 50 ( cf. v.l. 128* ). Ñ2 V B D6 om. 50 ( cf. v.l. 48 ). D7.9 om.( hapl. ) 50$^{ab}$. —$^{b}$ ) D5 -विराजितैः ( for -विभूषितैः ). Ś1 D1–4.10.11 मुक्तारा ( D1.3.4.11 °र )जतचित्रितैः. —After 50$^{ab}$, Ś1 D1–4.10.11 ins. :

130* भ्राजमानैर्गृहश्रेष्ठैर्विद्युद्भिरिव चित्रितैः ।

[ D1.4 गृहैः ( for गृह- ). Ś1 D2.10 भ्राजमानां गिरिश्रेष्ठैर् ( for the prior half ). D1.4 तोयदैः ( for चित्रितैः ). ]

—D3 om. 50$^{cd}$. M1 damaged for 50$^{c}$. —$^{c}$ ) Ś1 D1.4 तालैः; D7.9 तैस्तैः ( for तलैः ).

51 Ñ1 illeg. for 51 ( cf. v.l. 128* ). Ñ2 V B D6 om. 51 ( cf. v.l. 48 ). —$^{a}$ ) G3 च चित्राणि ( for विचित्राणि ). —$^{b}$ ) G1 विविधानि ( for तोरणानि ). Ś1 D2.10 रा ( D10 र )जतैर्भूषितानि च; D1.3.4.11 तोरणान्युच्छ्रि( D3 °स्थि )तानि च. —$^{d}$ ) G2 सर्वत्र ( for सर्वतः ).

52 Ñ1 illeg. for 52 ( cf. v.l. 128* ). Ñ2 V B D6 read 52 after 5.3.12$^{ab}$. —$^{b}$ ) Ñ2 V2 B D6 हनूमान्मारुतात्मजः. ❀ Cr : अचिन्त्यामिति । विषण्णो हृष्टश्च विवेश । चिन्तायाश्च विषयत्वाद्विषादः । अद्भुताकारत्वाद्धर्षः । यद्वा अचिन्त्यां प्रवेशचिन्ताविषयभूताम् । अद्भुताकारां प्रवेष्टुमचिन्त्येषु दुर्गेषु ...... ? पुरीम् । अतो विषादः ।; Cm : विषण्णो लङ्काया दुर्धर्षत्वाद्विषण्णः । अत्यद्भुतत्वाद्धृष्टश्च ।; Cg : अचिन्त्येति । विषण्णो हृष्टश्चेति । अचिन्त्या दुष्प्रवेशेति च विषण्णः । यतोऽद्भुताकारा, अतो विस्मयनीयतया हृष्टः ।; Ck.t : अचिन्त्यामशक्यान्वेषणचिन्ताम् । अयं विषादहेतुः । अद्भुताकारामित्ययं ( Ct °मिति ) हर्षहेतुः. ❀

53 Ñ1 illeg. for 53 ( cf. v.l. 128* ). Ñ2 V B D6 read 47, 53 and colophon after 5.3.1. —$^{a}$ ) Ś1 D2.10 तां पांडुराभ्राभ-; Ñ2 V स पांड( Ñ2 °डु )रोद्धत-; B

G. 5. 9. 0
B. 5. 2. 53
L. 5. 1. 58

स पाण्डुरोद्विद्धविमानमालिनीं
महार्हजाम्बूनदजालतोरणाम् ।
यशस्विनीं रावणबाहुपालितां
क्षपाचरैर्भीमबलैः समावृताम् ॥ ५३
चन्द्रोऽपि साचिव्यमिवास्य कुर्व-
स्तारागणैर्मध्यगतो विराजन् ।
ज्योत्स्नावितानेन वितत्य लोक-
मुत्तिष्ठते नैकसहस्ररश्मिः ॥ ५४
शङ्खप्रभं क्षीरमृणालवर्ण-
मुद्गच्छमानं व्यवभासमानम् ।
ददर्श चन्द्रं स कपिप्रवीरः
पोप्लूयमानं सरसीव हंसम् ॥ ५५

इति श्रीरामायणे सुन्दरकाण्डे द्वितीयः सर्गः ॥ २ ॥

---

स पांड( B4 °ड्ड )रोद्धृत-; D1.3.4 तां पांडुरोद्धृत-; D5-7 Ck.t स पांडुराविद्ध- ( D6 °रोद्धृत- ); D11 तां पांडुरो द्वंद्व-; G1 स पांडरोन्नद्ध-; Cr.m as in text ( for स पाण्डुरोद्विद्ध- ). V2 -वितान- ( for -विमान- ). M1 damaged from नीं up to न in [b]. D5 -शालिनीं ( for -मा° ). D9 स पांडुरां विद्धगदाभिमालिनीं. —[b]) Ś1 Ñ2 V B D1-4.6.10.11 -चित्र- ( for -जाल- ). D6 -तोरणे (sic). —[c]) D6 यशस्विनो (sic). D2 -पालितां पुरीं ( for -बाहुपालितां ). —[d]) Ś1 D1-4.10.11 G2.3 निशाचरैर् ( for क्षपा° ). D1.3.4 समाश्रितां; D7.9 सुपालितां; G1 दुरासदां ( for समावृताम् ). Ñ2 V B D6 विवेश लंकां हनुमान्महाकपिः.

54 Ñ1 illeg. for 54 (cf. v.l. 128*). Ñ2 V B D6 om. 54–55 here and ins. before 5.4.1. —[a]) Ś1 D2.10 [ऽ]स्य; D1.3.4 च ( for ऽपि ). Ś1 D2.10 इवापि; D1.3.4 इवाशु; G2 अथास्य ( for इवास्य ). D11 चंद्रश्च सांनिध्यमिवांशु कुर्वतात्. —D3 transp. [b] and [c]. —[b]) Ś1 D2 T2 M1 विराजयन्; D11 °जते; Cr.m.t as in text ( for °जन् ). —[c]) D3 om. वितानेन. Ś1 D2.10 विचिं( D10 °चि )त्य; Cr.m.g.t as in text ( for वितत्य ). D1-4.7-9.11 Cr.m.t लोकान्; Cg लोकम् ( as in text ). —[d]) D1.3.7.9 G1 Ck.t [ऽ]नेक- ( for नैक- ). Ś1 D2.12 समुत्थि( D2 उत्तिष्ठ )तोनेकसहस्ररश्मिः; D4 उत्पत्रिते नेक°. ❀ Cr : चन्द्र इति । सहस्ररश्मिर्ज्योत्स्नावितानेन लोकान्वितत्यास्य साचिव्यं कुर्वन्निव कुर्वन्नेव विराजन्मध्यगतस्तारागणैः सहोत्तिष्ठते प्रादुरभूदित्यन्वयः । नैकसहस्ररश्मिरित्यत्र नशब्दस्य सुप्सुपेति समासः । सागरमैनाकदिवाकरादिवच्चन्द्रोऽपि साचिव्यं कुर्वन्प्रादुरभूदित्यपिशब्देनावगम्यते ।; Cm : ज्योत्स्नावितानेन लोकान्वितत्य विस्तारीकृत्यास्य हनूमतो मैनाकसिन्धुवत्साचिव्यं कुर्वन्निव कुर्वन्नेव विराजन्मध्यगतस्तारागणमध्यगतस्तारागणैः सहोत्तिष्ठते प्रादुरभूदित्यन्वयः । ; Cg : चन्द्रोऽपीति । मध्यगतः संनिधानात्तारागणमध्यगतः । तारागणैरिति सहयोगे तृतीया । ज्योत्स्नावितानेन लोकं वितत्य व्याप्योत्तिष्ठत आविर्भवति स्म । "उदोऽनूर्ध्वकर्मणि" इत्यात्मनेपदम् ।; Ck : मध्यगतः खमध्यगत इत्यर्थः । इदं तु सम्यगवलोकनसाधनम् । उत्तिष्ठते स्म । छान्दसमात्मनेपदम् । अनेकसहस्रशब्देन प्राचुर्यमात्रं लक्ष्यते । पूर्णचन्द्र इति यावत् ।; Ct : मध्यगतः खमध्यगतः । अनेकसहस्रेत्यनेन पूर्णत्वम् । अनेकेत्यस्यैव सहस्रेत्यनेन विवरणम् । उत्तिष्ठते । आर्षस्तङ् । ज्योत्स्नावितानेन लोकान्वितत्यावार्यं सम्यगवलोकनसाधनतयाऽस्य हनूमतः साचिव्यं साहाय्यं कुर्वन्निव । ननु खमध्यगतस्य प्रदोष उदयोऽष्टम्यां न तदा पूर्णत्वम् । पूर्णस्य तु न खगमध्यगतस्योदय इति चेन्न । शुक्लैकादश्यां खमध्यसमीपगतत्वेन मध्यगतत्वोपचारात्पूर्णत्वं च पूर्णकल्पत्वेन व्यवहृतम् । यद्वाऽनेकन्यूनाः सहस्रं रश्मयो यस्येति मध्यमपदलोपितत्पुरुषगर्भो बहुव्रीहिः । अत एव रात्रिशेषे हनूमत्यशोकवनिकास्थे सीतासविधे रावणस्यागमनकाले दीपिकावर्णनं कृतम् । तेन हि तदा चन्द्रास्तानुमानम् । सा चेयं मार्गशीर्षस्य । फाल्गुने लङ्कायां प्रविष्टायाः सीतायाः "वर्तते दशमो मासो द्वौ तु शेषौ प्लवंगम" इति हनूमन्तं प्रति वचनात् । हरणदिन एव च सीताया लङ्काप्रवेशनं रामभयादिति स्पष्टमेव. ❀

55 Ñ1 illeg. for 55[ab] (cf. v.l. 128*). Ñ2 V B D6 om. 54–55 here and ins. before 5.4.1. —[a]) D1 क्षीण- ( for क्षीर- ). D11 -प्रणाल- ( for -मृणाल- ). —[b]) D1-4.11 उद्यच्छ( D3 °स्य )मानं ( for उद्ग° ). Ś1 D2.10 दिवि भासयंतं; D1.3.4.11 व्यवभासयंतं; T1.3 व्य( T3 ह्य )वभास्यमानं ( for व्यवभास° ). D5 T2 ह्युद्गच्छमानं ह्यवभासमानं. —[c]) T1.3 G3 M3 हरि- ( for कपि- ). —[d]) Ś1 D10 प्रोड्डीयमानं ( for पोप्लूय° ). ❀ Cr.m.t : पोप्लूयमानं भृशं प्लवमानम् ।; Ck : पोप्लूयमानं यङन्ताच्छानच्. ❀ Ñ1 illeg. for हंसम्.

Colophon. —*Sarga name* : Ś1 B4 D10 हनुमल्लंकाप्रवेशः; Ñ1 हनुम *****; Ñ2 V B3 D2..6 लंकाप्रवेशः; B1.2 हनूमतो लंकाप्रवेशः; D1.4 हनूमच्चिंता; D3 हनुमच्चिंतनं; D11 लंकाप्रवेशे हनूमच्चिंतनं. —*Sarga no.* : (figures, words or both) : Ś1 Ñ1 B1 D1.2.4.10.11 om.; Ñ2 V1 B2-4 D6 9; V2 1; D3 4. —After colophon, D3 concludes with राम; G M2 with श्रीरामाय नमः. —After 5.2, D6 reads for the first time 5.3.18–19 repeating them in the proper place.

## ३

स लम्बशिखरे लम्बे लम्बतोयदसंनिभे ।
सत्त्वमास्थाय मेधावी हनुमान्मारुतात्मजः ॥ १
निशि लङ्कां महासत्त्वो विवेश कपिकुञ्जरः ।
रम्यकाननतोयाढ्यां पुरीं रावणपालिताम् ॥ २
शारदाम्बुधरप्रख्यैर्भवनैरुपशोभिताम् ।
सागरोपमनिर्घोषां सागरानिलसेविताम् ॥ ३
सुपुष्टबलसंगुप्तां यथैव विटपावतीम् ।
चारुतोरणनिर्यूहां पाण्डुरद्वारतोरणाम् ॥ ४

G. 5. 9. 58
B. 5. 3. 4
L. 5. 2. 4

## 3

Ñ2 V B cont. the previous Sarga; M1 begins with श्रीरामाय नमः.

1 Cv missing up to 5.3.24. Ñ2 V1.2 (first time) B D6 om. $1^{ab}$. V2 (except $2^{c}$–$3^{b}$) repeats st. 1–5 (reading $3^{c}$–$4^{b}$ after $4^{cd}$) before 18 (including star passages). —$^{a}$) Ś1 D3 ललंब; D10 ललस्बे (sic) (for स लम्ब-). Ś1 D2.8–10 रम्ये; Ñ1 D1.3.4.11 तस्मिन्; Cr.m.g.k.t as in text (for लम्बे). ❁ Cr : लम्बे लम्बमानाकारे। लम्बतोयदसंनिभे। लम्बशिखरे लम्बपर्वतशिखरे ।; Cm लम्बे लम्बाकारे। लम्बशिखरे लम्बगिरिशृङ्गे ।; Cg : लम्बे लम्बाख्ये। लम्बशिखरे लम्बगिरिशिखर इति चाहुः। यद्वा लम्बे लम्बमान इव स्थिते। लम्बशिखरे त्रिकूटशिखरे ।; Ck : स लम्बेऽलम्बशिखर इत्यादि। लम्बे लम्बपर्वते। अलम्बशिखरे उन्नतशिखरे। अत एवालम्बतोयदसंनिभे। परस्तु लम्बे लम्बमाने लम्बस्य शिखर इत्यादि। किं तेन लम्बस्य शिखरं लम्बतावद्वलम्बमानं दृष्टम्! उत मधुपटल्यां(°ला ?)दिति न जानीमः ।; Ct : लम्बशिखरे उन्नतशिखरे लम्बे लम्बाख्यपर्वते, अत एव लम्बतोयदसंनिभे. ❁ —Ñ1 partially illeg. for $1^{cd}$. Ñ2 V B D6 (after 19 first time; preceded by App. I [No. 1]) read $1^{cd}$ (V2 $1^{cd}$ first time), 5.2.47, 53 and colophon after 17. —$^{c}$) B3 एवम् (for सत्त्वम्). —$^{d}$) D7.8.11 M1.2 Cr हनूमान् (for हनु°). Ñ2 V1.2 (first time) B D6 ततो मारुतनंदनः.

2 V2 repeats $2^{ab}$ (cf. v.l. 1). V1 illeg. from $2^{ab}$ up to ङ्का in 131*. —$^{a}$) Ñ2 V2 (first time) B D6 -तेजाः (for -सत्त्वो). —$^{b}$) M1 damaged from रः up to तो in $2^{c}$. Ś1 Ñ1 V2 (second time) D1–4.10.11 जगाम (for विवेश). Ñ2 B2 (also in marg. as in D6).4 प्र(B4 प्रा)वेक्ष्यन्मारुतात्मजः; V2 (first time) B1.3 D6 प्रा(V2 प्र)विशन्(B3 प्रवेष्टुं) मारुतात्मजः. —After $2^{ab}$, Ñ2 V (V2 first time) B D6 ins.:

131* निविष्टां पर्वतस्याग्रे लङ्कामङ्कगतामिव ।

[V1 illeg. up to ङ्का. V2 निविष्टः (for °ष्टां).]

—Ñ2 V1.2 (first time) B D3.6 om. $2^{c}$–$3^{b}$. —$^{c}$) Ś1 Ñ1 V2 D1.2.4.10.11 रम्यां कांचनवेश्माढ्यां.

3 Ñ2 V1.2 (first time) B D3.6 om. $3^{ab}$ (cf. v.l. 2). The sequence of st. 3–11 (including subst. and ins.) in Ñ2 V1.2 (first time) B D6 is $7^{cd}$ (B3 om.), 3–$4^{b}$ (all om. $3^{ab}$), 128* (l. 3–7), $8^{c}$–10, 5–$6^{b}$, $4^{cd}$, $7^{ab}$, 11, $8^{ab}$. —$^{a}$) Ñ1 illeg. up to प्र. Ś1 D10 -[अ]भ्रगण-; D2 -[अ]भ्रधर- (in marg.); D11 -[अं]भो° (for -[अ]म्बुधर-). —$^{b}$) G3 भवनैश्च (for °र्). Ś1 Ñ1 V2 D1.2.4.10 प्रतिमंडितां; G3 चोप° (for उपशोभिताम्). —After $3^{ab}$, Ś1 Ñ1 D1.2.4.10.11 read $6^{ab}$ and $4^{cd}$. V2 repeats $3^{cd}$ (cf. v.l. 1). —$^{c}$) Ñ2 B2 -निर्घोरां (for °षां). —$^{d}$) Ś1 V2 (second time) D10 -वी(D10 -वा)जितां; D2 -नीतितां (sic); D11 -वांछितां (for -सेविताम्). Ñ1 D1.3.4 अर्णवानिलवीजितां.

4 For sequence in Ñ2 V B D6, cf. v.l. 3. V2 repeats 4 (cf. v.l. 1). —$^{ab}$) D5 -वलि- (sic) (for -बल-). D7.9 -संपुष्टां; D8 G1.3 M3 -संघुष्टां; T3 -संयुक्तां (for -संगुप्तां). Ś1 Ñ1 V2 (second time) D2.10.11 सुवर्णख(Ñ1 D11 °चि; V2 °र)चितां गुप्तां; D1.3.4 सुवर्णचित्रि(D1 °त्रां)तां गुप्तां; M1 सुदुर्गां राक्षसैर्गुप्तां (for $^{a}$). Ś1 Ñ1 V2 (second time) D1–4.10.11 तथैव (for य°). Ś1 विटपावृतां (for °वतीम्). Ñ2 V1(illeg.).2 (first time) B D6 सुगुप्तां राक्षसेंद्रेण यथेंद्रेणामरावतीं. —After $4^{ab}$, D3 reads 7–12 (preceded by 138*); while D8 ins.:

132* वस्वोकसारप्रतिमां गुप्तां रक्षोगणैर्भृशम् ।

—After $4^{ab}$, G2 reads for the first time $5^{c}$–$6^{b}$, repeating them in their proper place. —Ś1 Ñ1 D1.2.4.10.11 read $6^{ab}$ and $4^{cd}$ after $3^{ab}$. D3 reads $4^{cd}$ after $6^{ab}$. —$^{c}$) V1.2 (first time) B3 D1.2.4.6.8.10.11 -निर्व्यूहां(D2 °ढां); B1.4 -निर्युक्तां; D3.9 -निर्गूढां(D9 °हां); Cr.m.g.k.t as in text (for -निर्यूहां). —$^{d}$) Some MSS. and Cr.m.k पांडर-; Cg as in text (for पाण्डुर-). B2 -गोपुरां (for -तोरणाम्). Ś1 Ñ V1.2 (first time) B1.4 D1–4.6.10.11 पांडुरद्वा(D10 °श्वा)रगोपुरां; V2 (second time) पांडुरागारगोपुरां; B3 साट्टप्राकारगोपुरां. —After 4, Ñ2 V1.2 (after 4, first time) B D6 ins.:

133* महाशक्तिमहाचक्रप्रासप्रहरणायुधाम् ।

[V2 -नादचक्र- (for -चक्रप्रास-). V1 illeg. after प्र. Ñ2 D6 -[आ]युतां.]

—After 4, G1 reads $6^{cd}$ for the first time, repeating it in its proper place.

G. 5. 9. 55
B. 5. 3. 5
L. 5. 2. 5

भुजगाचरितां गुप्तां शुभां भोगवतीमिव ।
तां सविद्युद्घनाकीर्णां ज्योतिर्मार्गनिषेविताम् ॥ ५
चण्डमारुतनिर्ह्रादां यथेन्द्रस्यामरावतीम् ।
शातकुम्भेन महता प्राकारेणाभिसंवृताम् ॥ ६
किङ्किणीजालघोषाभिः पताकाभिरलंकृताम् ।
आसाद्य सहसा हृष्टः प्राकारमभिपेदिवान् ॥ ७
विस्मयाविष्टहृदयः पुरीमालोक्य सर्वतः ।
जाम्बूनदमयैर्द्वारैर्वैदूर्यकृतवेदिकैः ॥ ८

5 For sequence in Ñ2 V B D6, cf. v.l. 3. V2 repeats 5 (cf. v.l. 1). D5 T2 M2 om. 5–6^b. D3 om. 5^ab. —^a) M1 भुजंग- (for भुजग-). Ñ1 उग्रां (for गुप्तां). Ś1 V2(second time) D1.2.4.10.11 भुजंगचरि (V2[second time] D2 °रचि)तामुग्रां. —^b) M1 damaged from मि up to ना in 5^c. D8 गुहां (for शुभां). —For 5^ab, Ñ2 V(V2 first time) B D6 subst.:

134* धन्विभिर्बलिभिर्वीरैः शूलपट्टिशपाणिभिः।
रक्षितां राक्षसैर्घोरैर्नागैर्भोगवतीमिव ।

[V1 illeg. from व in l. 1 up to र्ना in l. 2. —(l. 1) cf. 5.2.21^ab. B1.3 -धारिभिः (for -पाणिभिः). —(l. 2) cf. 5.2.20^ab. B4 om. from the post. half of l. 2 up to the prior half of l. 2 of 135*.]

—Thereafter all the above MSS. cont.:

135* उत्सिक्तैरवलिप्तैश्च भोगिभिर्बलिभिः सदा।
संपूर्णां राक्षसैर्भीमैर्गुहामाशीविषैरिव ।

[(l. 1) B1 उच्छ्रितैर्; B3 प्रक्षिप्तैर् (for उत्सिक्तैर्). V1 उ * * * * लिप्तैश्च (illeg.) (for the prior half). V2 बहुभिः (for बलिभिः). —For l. 2, cf. 5.2.21^cd.]

—G2 repeats 5^cd (cf. v.l. 4). —^d) D7–9 M1 -गण-; G1 -मार्गे (for -मार्ग-). —For 5^cd, Ś1 Ñ V1(illeg.).2 B D1–4.6.10.11 subst.; while V2 B2 only repeating here:

136* साभ्रज्योतिर्गणाकीर्णां विद्युज्ज्वालासिमण्डिताम्।

[Ś1 D10 साभ्रां; B4 सर्वं-; D11 शुभ्र- (for साभ्र-). Ñ2 B2 (first time) -कुल- (for -गण-). V2 (second time) विद्युन्माला- (for °ज्वाला-). Ñ2 V2 (first time) B (B2 both times) D6 -पीडितां (for -मण्डिताम्). D3 साभ्रविद्युद्दामकीर्णां(sic) ज्योतिर्गुणनिषे*तं.]

—Thereafter, Ñ1 V2 cont.:

137* विद्योतमानां शरदि द्यामिव द्युतिशालिनीम्।

[Ñ1 -मालिनीं (for -शालिनीम्).]

6 For sequence in Ñ2 V B D6, cf. v.l. 3. Ś1 Ñ1 D1.2.4.10.11 read 6^ab and 4^cd after 3^ab. G2 repeats 6^ab here (cf. v.l. 4). D5 T2 M2 om. 6^ab (cf. v.l. 5). —^ab) D3 वज्र- (for चण्ड-). D1.4.10 -संह्रादां; D8 (after corr. as in text) M1 -संकाशां; Ck as in text (for -निर्ह्रादां). Ś1 Ñ1 D2.11 चारु(D2.11 चंद्र)मारुतसंह्रा(Ś1 °ह्ला)दां; Ñ2 V B D6 चंद्रमारुतसंपूर्णां; M3 मंदमारुतसंचारां (for ^a). Ś1 D2.10 यथा स्वर्गे; Ñ1 यूथैरपि; Ñ2 V B D6 शक्रस्ये(D6 °स्यै)व; D1.11 त(D11 य)थैव हि; D3 यथैवापि; D7.9 G1.3 यथा चापि (for यथेन्द्रस्य). D4.8 M1 यथावद (D4 यथैवम)मरावतीं (for ^b). G2 (second time) मंदमारुतसंचारामतीवशुभदर्शनां. ❀ Ck: अमरावतीमिव स्थिताम्। अमरा अस्यां सन्तीत्यमरावती द्यौरित्यर्थः। "मतौ बह्वच" इति दीर्घोऽसंज्ञायामप्यार्षः । न त्विहेन्द्रपुरीसंज्ञोमरावतीशब्दः। उक्तलक्षणाभावात् । लङ्काया उक्तगुणसादृश्यम्। सालंकारराक्षसवत्वाद्वलदीपप्रदीपनित्यप्रकाशमार्गत्वात्सदा बलघोषबहुलत्वाच्च; Ct: अमरावतीमिव स्थिताम्। अत्रामराः सन्त्यस्यामित्यमरावती द्यौः। असंज्ञायामपि 'मतौ बह्वचः' इत्यार्षो दीर्घः। न त्विहेन्द्रपुर्यमरावती। उक्तलक्षणाभावात्। लङ्काया उक्तगुणसादृश्यं च सालंकारराक्षसवत्वाद्बलवद्घोषबाहुल्याच्चेति कतकः. ❀ —After 6^ab, D3 reads 4^cd. —Ñ2 V B D6 om. 6^cd; G1 repeats 6^cd here (cf. v.l. 4). —^c) Ś1 D1–8.10.11 -कौंभेन; Cr.k.t as in text (for -कुम्भेन). —^d) Ś1 Ñ1 D1–4.10.11 सुसं(Ś1 Ñ1 समा)वृतां (for [अ]भिसंवृताम्). —After 6, Ś1 Ñ1 D1.2.4.10.11 ins., while D3 ins. after 4^ab:

138* महाचयाट्टालवतीं यन्त्रशस्त्रसमावृताम् ।

[Ś1 Ñ1 D10 महाशय- (for °चय-).]

7 For sequence in Ñ2 V B D6, cf. v.l. 3. D3 reads 7–12 (preceded by 138*) after 4^ab. V1 om. 7^ab. —^a) D6 -ज्वाल- (sic) (for -जाल-). Ś1 Ñ1 D1–4.10.11 -निर्घोषां; Ñ2 V2 B D6 -वाचा(V2 °*)लां (for -घोषाभिः). —^b) Ś1 Ñ1 D1–4.10.11 बहु(D11 वपु [sic])रत्नसमावृतां. —B3 om. 7^cd. —^c) Ś1 D2 स (Ś1 च) कपिर्; G1 स महा- (for सहसा). —^d) Ś1 D10 सोभ्युपेदिवान्; D2 इव वेगवान्; Cr as in text (for अभिपेदिवान्). D3 प्राकारसु*पेदिवान्. —For 7^cd, Ñ2 V B1.2.4 D6 subst.:

139* कृत्स्नामालोकयामास प्राकारमधिरुह्य सः।

[V2 स कृत्स्नाम् (hypm.). B1 अभि- (for अधि-). V3 पुरंदरपुरीमिव (for the post. half).]

8 For sequence in Ñ2 V B D6, cf. v.l. 3 and for sequence in D3, cf. v.l. 7. —^b) M1 damaged from क्य up to द in ^c. Ś1 Ñ1 D1–4.10.11 वानरः (for सर्वतः). —For 8^ab, Ñ2 V B D6 subst.:

140* विस्मयोत्फुल्लनयनः समन्ताद्‌वलोकयन्।

मणिस्फटिकमुक्ताभिर्मणिकुट्टिमभूषितैः ।
तप्तहाटकनिर्यूहै राजतामलपाण्डुरैः ॥ ९
वैदूर्यतलसोपानैः स्फाटिकान्तरपांसुभिः ।
चारुसंजवनोपेतैः खमिवोत्पतितैः शुभैः ॥ १०
क्रौञ्चबर्हिणसंघुष्टे राजहंसनिषेवितैः ।
तूर्याभरणनिर्घोषैः सर्वतः प्रतिनादिताम् ॥ ११
वस्वोकसाराप्रतिमां समीक्ष्य नगरीं ततः ।
खमिवोत्पतितां लङ्कां जहर्ष हनुमान्कपिः ॥ १२

G. 5. 9. 0
B. 5. 3. 12
L. 5. 2. 12

[ B2 समंताच विलोकयन्; B3 दिशो दश विलोकयन् ( for the post. half ). ]

—$^{c}$) B2 -महा- ( for -मयैर् ). Ś1 Ñ1 D1–4.10.11 जालैर् ( for द्वारैर् ). ※ Cr : जाम्बूनदमयैर्द्वारैरित्युपलक्षणे तृतीया। राजहंसनिषेवितैरित्यन्तं विशेषणविशिष्टैर्द्वारैरुपलक्षितां लङ्कां नगरीं समीक्ष्येति सम्बन्धः ।; Cm : जाम्बूनदमयैर्द्वारैरित्युपलक्षणे तृतीया । राजहंसनिषेवितैरित्यन्तविशेषणविशिष्टैर्द्वारैरुपलक्षितां लङ्कानगरीं समीक्ष्य हनुमाञ्जहर्षेति सम्बन्धः ।; Cg : जाम्बूनदमयैर्द्वारैरित्यादौ सहयोगे तृतीया. ※—$^{d}$) Some MSS. वैडूर्य- ( for वैदू° ). D1.3.4 G1.2 -मय-; Cr.g.k.t as in text ( for -कृत- ). V B वैडूर्यमणिवेदिकैः; D11 वैडूर्यमयवेदिभिः.

9 For sequence in Ñ2 V B D6, cf. v.l. 3 and for sequence, in D3 cf. v.l. 7. —$^{a}$) D5 G2 M3 Cr.m.g वज्र-; T1 शुद्ध-; Ck.t as in text ( for मणि- ). D1.3.5 G1 M1.2 Ck -स्फाटिक-; Cr.m.g.t as in text ( for -स्फ° ). —$^{b}$) M1 कृत- ( for मणि- ). D5 -भूषणैः; D8 -वेदिकैः ( for -भूषितैः ). Ś1 Ñ1 D1–4.10.11 प्रवालकृत( Ñ1 °युति )-भूमिभिः. —$^{c}$) Ś1 D10 -निर्यूह-; D4.8.9 -निर्व्यूह-; Cr as in text ( for -निर्यूहै ). —$^{d}$) Some MSS. -पांडरैः; Cr.m as in text ( for °ण्डुरैः ). G1 राजतांतरवेदिभिः.

10 For sequence in Ñ2 V B D6, cf. v.l. 3 and for sequence in D3, cf. v.l. 7. —$^{a}$) Some MSS. वैडूर्य-; Ct as in text ( for वैदू° ). D7.8 M1.3 -कृत- ( for -तल- ). Ś1 D2.10 -संपातैः; Ñ1 -संबाधैर्; D11 -संतापैः; Ck.t as in text ( for -सोपानैः ). D9 वैदूर्यतलसोपानैः. —$^{b}$) D7.9 G2 स्फटिकांतर-; Cr.g.k.t as in text ( for स्फा° ). D8 -पांडुभिः; Cr.g as in text ( for -पांसु° ). Ś1 D2.10 हाटकोत्त( D2 °कांत )रवेदिकैः; Ñ1 D1.3.4.11 हाटकांत ( Ñ1 °कोत्त )रतोरणैः. — Ñ1 D1–4.10.11 om. 10$^{cd}$. —$^{c}$) D5 T3 -संजीवन-; Cr.m.g.k.t as in text ( for -संज° ). —For 9–10, Ñ2 V B D6 subst. :

141* मणिसोपानसम्पन्नैः प्रवालाचितभूमिभिः ।
कैलासशिखराकारैः शारदाम्बुदपाण्डुरैः ।
भ्राजमानां गृहश्रेष्ठैर्नक्षत्रैर्गगनं यथा ।
वीक्ष्यमाणामिवाकाशमुच्छ्रितैर्भवनोत्तमैः ।

[ ( l. 1 ) V1 illeg. after वा. B1 -संपूर्णैः ( for °म्पन्नैः ). V2 विचित्रमणिसोपान- ( for the prior half ). B3 प्रवालेचित- ( for °लाचित- ). —B3 om. l. 2; V1 partially illeg. for l. 2. —( l. 2 ) All except V2 -पांड° ( for °ण्डुरैः ). —( l. 3 ) V2 D6 भ्राजमान- ( D6 °ना ). —( l. 4 ) Ñ2 D6 प्लवमानाम्; V1 B1.3 वीक्ष्यमाणम्; V2 लिखमानम् ( for वीक्ष्यमाणाम् ). V2 मुच्छ्रितैर् ( for उ° ). ]

11 For sequence in Ñ2 V B D6, cf. v.l. 3 and for sequence in D3, cf. v.l. 7. —$^{a}$) V1 illeg. up to हं in 11$^{b}$. B1.3 -सारस- ( for -बर्हिण- ). Ś1 -संगुष्टे ( sic ) ( for -संघु° ). —$^{b}$) D11 -निषेविते ( for °वितैः ). Ñ2 V B2.4 D6 हंस( D6 °※ )सारसकूजि( Ñ2 D6 °नादि )तैः; B1 हंसकारंडसेवितैः; B3 हंसबर्हिनिषेवितैः. —$^{c}$) D5 -संघोषैः ( for -निर्घो° ). Ñ2 V B तूर्यभूषणघोषैश्च; D6 तूर्यघोषेण भूषैश्च. —$^{d}$) B1.2 पर्वत- ( for सर्वतः ). Ñ2 D7.9 परि- ( for प्रति- ).

12 For sequence in D3, cf. v.l. 7. —$^{a}$) V2 B3.4 वस्वेक-; D1–4.8 M2.3 वस्वौक-; D11 विश्वैक-; Cr as in text ( for वस्वोक- ). Ś1 Ñ V B1.3.4 D2–4.6–11 T2 G1.3 M2 Cr -प्रतिमां ( for -[ अ ]प्र° ). —$^{b}$) D5 M3 तां वीक्ष्य; G3 प्रती° ( for समीक्ष्य ). Ś1 D1–4.10.11 तदा ( for ततः ). Ñ2 V1 B D6 रावणस्य पुरीं शुभां; V2 रावणस्य महापुरीं. ※ Cr : अत्र वस्वोकसारप्रतिमामिति पूर्वदिगवस्थितशक्रपुरीसाम्यमुच्यते। " वस्वोकसारा शक्रस्य याम्या संयमनी तथा। पुरी सुखा जलेशस्य सोमस्यैवामरावती " इति विष्णुपुराणवचनाच्छक्रपुरीवाचकत्वम् ।; Cm : वस्वोकसारा पूर्वदिगवस्थेन्द्रपुरी ।; Cg : वस्वोकसारालका। यद्वा वस्वोकसारा पूर्वदिगवस्थिता शक्रपुरी। " वस्वोकसारा शक्रस्य पूर्वस्यां दिशि वै पुरी " इति पुराणवचनात् ।; Ck : वस्वोकसारा त्वलका। तत्प्रतिमात्वम्। जाम्बूनदमयैर्द्वारैरित्यादिभिर्वस्वोकसारैकधर्मागामत्राप्युपवर्णितत्वात् ।; Ct : वस्वोकसारालका तत्सदृशीम्। ह्रस्व आर्षः जाम्बूनदमयद्वारत्वादिना सादृश्यम् . ※—After 12$^{ab}$, Ñ2 V B D6 read 5.2.52 and om. 12$^{cd}$. —$^{c}$) Ñ1 कामाज् ; D11 कामां; M2 कामं ( for लङ्कां ). Ś1 D1–4.10 M3 Cm खमिवोत्पतितं( D10 °तं )कामाज्( D1 °मा; D2 M3 Cm °मां ). ※ Cm : उत्पतितं कामामुत्पतितुमिव स्थिताम् . ※—$^{d}$) D2 हरिः ( for कपिः ). —After 12, D3 ins.; D4 ins. after l. 2 of 28* :

142* रम्यकाननतोयाढ्यां तडागवनशोभिताम् ।
हंससारसनिर्घोषां सागरानिलसेविताम् ।
अप्रमेयां सुगुप्तां च महाबलपराक्रमैः ।
संपूर्णां राक्षसैर्घोरैर्नागैर्भोगवतीमिव ।

[ ( l. 1 ) D3 रम्यां ( for रम्य- ). D3 -शतसेवितां ( for -वनशोभिताम् ). —( l. 4 ) = 5.2.20$^{ab}$. ]

G. 5. 9. 62
B. 5. 3. 13
L. 5. 2. 13

तां समीक्ष्य पुरीं लङ्कां राक्षसाधिपतेः शुभाम् ।
अनुत्तमामृद्धियुतां चिन्तयामास वीर्यवान् ॥ १३
नेयमन्येन नगरी शक्या धर्षयितुं बलात् ।
रक्षिता रावणबलैरुद्यतायुधधारिभिः ॥ १४
कुमुदाङ्गदयोर्वापि सुषेणस्य महाकपेः ।
प्रसिद्धेयं भवेद्भूमिर्मैन्दद्विविदयोरपि ॥ १५
विवस्वतस्तनूजस्य हरेश्च कुशपर्वणः ।
ऋक्षस्य केतुमालस्य मम चैव गतिर्भवेत् ॥ १६
समीक्ष्य तु महाबाहो राघवस्य पराक्रमम् ।
लक्ष्मणस्य च विक्रान्तमभवत्प्रीतिमान्कपिः ॥ १७
तां रत्नवसनोपेतां कोष्ठागारावतंसकाम् ।
यन्त्रागारस्तनीमृद्धां प्रमदामिव भूषिताम् ॥ १८
तां नष्टतिमिरां दीपैर्भास्वरैश्च महागृहैः ।
नगरीं राक्षसेन्द्रस्य ददर्श स महाकपिः ॥ १९

13 $^{a}$) Ś1 सुवीक्ष्य ( for समीक्ष्य ). Ñ2 V B1.2.4 D6.8 G M रम्यां ( for लङ्कां ). —$^{b}$) V1 सुतां ( for शुभाम् ). B2 रावणस्य पुरीं शुभां. —$^{c}$) Ñ2 V1 B1.2 D5.6.9 T1.3 G2.3 ऋद्धिमतीं( D5 °तां ); D2 बुद्धि°; D8 °युक्तां ( for ऋद्धियुतां ). B3 सर्वरत्नाकरवतीं; D7.11 अनुत्तमां वृद्धिमतीं ( D11 °युतां ). —$^{d}$) Ś1 Ñ V B D1–4.6.10.11 G2 वानरः ( for वीर्यवान् ).

14 $^{a}$) G3 एषा च ( for इयम् ). B1 नगरीं ( sic ) ( for °री ). —$^{c}$) Ś1 Ñ1 D2.3.10 राक्षस- ( for रावण- ). V2 रक्षिता रावणैरुग्रैर्; D4 रक्षिता रावणदोर्भिर् (unmetrical). —$^{d}$) Ñ V B1–3 D6.7.9 G2 -पाणिभिः; B4 -बाहुभिः; D1.2.4.10.11 -शालिभिः ( for -धारिभिः ). Ś1 उदितायुधशालिभिः.

15 B4 om. 15$^{a}$. —$^{a}$) Ś1 Ñ1 D1–4.11 च ( for वा ). B1.3 D1.3.11 [ ए ]व ( for [ अ ]पि ). Ñ2 V B2 D6 सुग्रीवांगदयोश्चैव; D4 कुसुदांग*योश्चैव ( lacuna ). —$^{b}$) Ś1 Ñ1 D2.3.10.11 तथा कपेः; Ñ2 V B D6 कपेस्तथा( Ñ2 V1 °दा ); G3 महामतेः; Cr as in text ( for °कपेः ). —$^{c}$) Ñ2 V2 B D6 प्र( Ñ2 प्रा )सा( B3 °सि )ध्येयं; D3 असिद्धेयं; D5 विदितेयं; T2 प्रविष्टेयं ( for प्रसिद्धेयं ). —$^{d}$) Ś1 -द्विविधयोर् ( for -द्विविद° ). Ñ2 D6 तथा ( for अपि ). B3 सैंदद्विविदनीलकैः.

16 $^{a}$) Ś1 D2.10 कुशध्वज-; Ñ1 D1.3.4.11 कुमुद्वतस् ( for विवस्वतस् ). Ñ2 V B1.2.4 D6 कुमुद( B1 क्रथन )-स्याथ नीलस्य; B3 सुग्रीवस्याप्यंगदस्य. —$^{b}$) Ñ2 V B1.2.4 D6 वृष-; B3 शत- ( for कुश- ). —$^{cd}$) B3 हेममालस्य; D7.9 कपिमुख्यस्य; M1 damaged ( for केतुमालस्य ). V B1–3 D6 [ इ ]ह; G1 [ इ ]यं ( for [ ए ]व ). B4 हरेर्मम गतिर्भवेत् (for $^{d}$). D3 अग्नेः पुत्रस्य नीलस्य मम राज्ञस्तथैव च. ❀ Cr : विवस्वत इति। अत्रेयमनुषज्यते। विवस्वतस्तनूजस्य सुग्रीवस्य कुशपर्वणो हरेश्च ऋक्षस्य केतुमालस्य मम चैव गतिर्भवेत्। गम्या भवेत्। मम चेति पश्चान्निर्देशेन सर्वोत्तरेणापि हनूमता स्वनैच्यमनुसंहितमित्यवगम्यते।; Cm : विवस्वतस्तनूजस्य सुग्रीवस्य कुशपर्वणो मम च गतिर्भवेद्गम्या भवेत्।; Cg : विवस्वत इति। गतिस्तु सुग्रीवस्य कुशपर्वणः केतुमालस्य मम चैव भवेत्। पूर्वं नीलादीनामेव गतिरुक्ता। अत्र त्वन्येषामित्युक्तिश्चिन्ताप्रकारविशेषः।; Ct : कुशपर्वण इति कुशपर्वसदृशलोमवत इत्यर्थकमृक्षस्य विशेषणम्। अतिदीर्घकठोरलोमावृतत्वात्कपिमुख्यस्येति विशेषणं च। तस्यैव मम चैव गतिः। अस्यामिति शेषः. ❀

17 $^{a}$) Ñ1 V2 D3.7–9 G2 Ct च ( for तु ). D8 T3 G M -बाहू ( for °हो ). —$^{b}$) D11 च विक्रमं ( for पराक्रमम् ). —$^{c}$) V2 om. ( subm. ); D3 [ अ ]पि ( for च ). Ś1 D10 वीरस्य; Cr.m.k.t as in text ( for विक्रान्तम् ). ❀ Cr : विक्रान्तं विक्रमम्। भावे निष्ठा. ❀ —$^{d}$) Ś1 Ñ V B D1.2.4.6.10.11 तेन हृष्याम्यहं पुनः; D3 तेन हृष्टोभवत्पुनः. —After 17, Ñ2 V B D6 ( after 19 [ first time, preceded by App. I No. 1 ] ) read 1$^{cd}$ ( V2 1$^{cd}$ first time ), 5.2.47, 53 and colophon.

18 D6 repeats 18–19 here, reading them for the first time after 5.2. —$^{a}$) D5 रक्त- ( for रत्न- ). D6( first time ).8 -भवनोपेतां ( for -वसनो° ). Ś1 Ñ1 D2.10 संरक्तवसनां दिव्यां; Ñ2 V B D3.6 ( second time ) सरत्नवसनां लंकां( V2 D3 दिव्यां ); D1.4 सद्रत्नवसनां देवीं; D11 सरक्तवसनां वेदीं. —$^{b}$) B3 कुप्य-; T3 G1 M1.3 गोष्ठ- ( for कोष्ठ- ). Ś1 Ñ1 D6 ( first time ) -[ अ ]वतंसिकां; V2 B2 -[ अ ]वतांसि( B2 °स )कां ( for -[ अ ]वतंसकाम् ). Ñ2 D1.4.6 ( second time ).7.9 गोष्ठागारावतंसिकां. —$^{c}$) Ñ1 यस्त्र*न्य- ( sic ); D1.4.11 न्यस्तयंत्र-; D2 यंत्रन्यस्त- ( for यन्त्रागार- ). Ś1 D10 शस्त्रयंत्रवतीमृद्धां; Ñ2 V B D6 ( second time ) सुन्यस्तां सुसमृद्धार्थां( V1 °द्धां च; D6 °द्धां तां ); D3 यंत्रन्यस्तस्तनीमिष्टां; D6 ( first time ).8 यंत्रागारैस्तु ( D8 °रैः सु ) निर्मृष्टां. —$^{d}$) Ñ2 V B D6 ( second time ) रूपिणीं ( for भूषिताम् ). —After 18, Ś1 Ñ1 V2 D1.2.4.10.11 ins. 151*, while D3 ins. :

143* तां विग्रहवतीं तत्र ददर्श पवनात्मजः ।
प्रवेष्टुकामो हनुमान्रावणस्य पुरीं तदा ।

—Thereafter D3 ins. a passage relegated to App. I ( No. 1 ).

19 Before 19, D3 ins. 151*. D6 repeats 19 ( cf. v.l. 18 ). Ñ1 illeg. for 19$^{ab}$. —$^{a}$) Ś1 Ñ2 V B D3.10 प्रन( Ś1 D10 °ण )ष्ट-; D1.2.4 सुनष्ट-; D6 ( second time ) प्रकृष्ट- ( for तां नष्ट- ). V1 B1–3 M3 दीप्तैर्; V2 B4 D8 G1 दीप्तां; D6 ( second time ) दीर्घैर् ( for दीपैर् ). D11

प्रविष्टः सत्त्वसम्पन्नो निशायां मारुतात्मजः ।
स महापथमास्थाय मुक्तापुष्पविराजितम् ॥ २०
हसितोद्घुष्टनिनदैस्तूर्यघोषपुरःसरैः ।
वज्राङ्कुशनिकाशैश्च वज्रजालविभूषितैः ।
गृहमेधैः पुरी रम्या बभासे द्यौरिवाम्बुदैः ॥ २१
प्रजज्वाल तदा लङ्का रक्षोगणगृहैः शुभैः ।
सिताभ्रसदृशैश्चित्रैः पद्मस्वस्तिकसंस्थितैः ।
वर्धमानगृहैश्चापि सर्वतः सुविभूषितैः ॥ २२

G. 5. 10. 4
B. 5. 4. 8
L. 5. 2. 23

संनष्टस्तिमिरैर्दीपैर्. ❀ Cr : तामिति । अत्र ददर्शेत्यपकृष्यते । यद्वा । एकस्य एतच्छन्दस्य प्रसिद्धिपरत्वेन श्लोकद्वयमेकं वाक्यम् ।; Cm : तां रत्नेत्यादिश्लोकद्वयमेकं वाक्यम् । तत्रैकस्तच्छब्दः प्रसिद्धिपरः । अपरः प्रकृतपरामर्शी ।; Cg : तां रत्नेत्यत्र ददर्शेत्यपकृष्यते । नत्वेकं वाक्यं श्लोकद्वयम् । तच्छब्दद्वयप्रयोगात् । प्रथमे श्लोके स्त्रीसाम्योक्तिश्च ।; Ck.t : तां प्रसिद्धाम्. ❀ —$^{b}$) D3.11 भास्करैश्; D10 भासुरैश् (for भास्व°). Ś1 D10 -गजैः (for -गृहैः). —$^{c}$) D3 G1 नगरं (for °रीं). B3 राक्षसपतेः; M1 * * * न्द्रस्य (for राक्षसेन्द्रस्य). —$^{d}$) Ś1 D2.10 प्रविश्य च; V1 D1.4 प्रविवेश; D6 (first time)-9 स ददर्श (by transp.). Ñ V2 B D6 (second time).11 प्रविशन्नु(Ñ2 °श्य रु)रुचे कपिः; D3 बभ्राम पवनात्मजः; D5 ददर्श हनुमान्कपिः. —After 19, D5.6 (after 19, first time).7–9 S ins. a passage relegated to Appendix I (No. 1).

20 Ś1 Ñ V B D1–4.6.10.11 om. $20^{ab}$. —$^{a}$) D9 प्रविष्टं; M1 * *ष्टः (for प्रविष्टः). —Ñ2 V1 B1.2.4 D6 read $20^{cd}$ (B2.4 [first time] preceded by l. 2 of 150*) after 21. B3 reads $20^{cd}$ after $21^{ab}$. —$^{c}$) Ś1 B3 D2.10 आसाद्य; Cr as in text (for आस्थाय). —$^{d}$) D5.7.9 G1 M2 मुक्त- (for मुक्ता-). Ś1 Ñ1 D1.2.4.10.11 मुक्ताविकृ(D11 °वृ)तमुत्तमं(D4.11 °मां); Ñ2 V B D6 सर्वतः प्रवि(V2 प्रति; B2 परि)लोकयन्; D3 मुक्ताप्राकारचित्रितं. —After 20, Ś1 Ñ V B D1–4.6.10.11 ins.:

144* मातङ्गमदगन्धाढ्यं चकार मतिमान्मतिम् ।

[Ñ1 illeg. the prior half. Ś1 V2 D1.4.11 -गंधाढ्यां; B3 °ढ्यश् (for °ढ्यं). Ś1 Ñ1 V2 D10.11 चारुप्रासादसंवृ(Ś1 °शोभि)तां; D1–4 चारुप्रासाद(D3 °कार)संवृ(D2 °भृ)तं (for the post. half).]

—Thereafter Ñ2 V1 B D6 cont.:

145* अमीषां गृहमुख्यानां नक्षत्रग्रहशोभिनाम् ।
निवेशमनुपश्यामि खं समुत्पततामिव ।

[(l. 2) B3 राक्षसानां दुरात्मनां (for the post. half).]

—After 20, D3 G3 ins.:

146* सेवितं राक्षसैर्भीमैर्बलिभिः शस्त्रपाणिभिः ।

[G3 बहुभिः (for बलिभिः).];

whille D5–9 S ins.:

147* ततस्तु तां पुरीं लङ्कां रम्यामभिययौ कपिः ।

[G1 वीरो (for लङ्कां). D5 T2 G2.3 M1.2 transp. लङ्कां and रम्याम्. M1 हरिः (for कपिः).]

21 $^{a}$) Ñ1 illeg. up to र्य. Ś1 D10 स तूर्य-; D3 हेषित-; G3 सिंहत- (sic) (for हसित-). D2.5.7–9.11 T M2.3 Cm.g.k.t -[उ]त्कृष्ट-; Cr as in text (for -[उ]द्घुष्ट-). D3 -मुदितैर् (for -निनदैस्). Ñ2 V1 B D6 ज(B3 क)ल्पितोत्कृ(B2 also as in text [marg.])ष्टहसितैः; V2 स तूर्यघोषनिनदैः; D1 पुरूर्योत्कृष्टनिनदैः (sic). ❀ Cr : निनदैश्चेत्युपलक्षणे तृतीयान्तमेतत् । गृहमुख्यविशेषणं वा. ❀ —$^{b}$) Ś1 Ñ2 V1 B2–4 D2.6.10 स्तुति-; V2 D1.4 श्रुति-; D5 सूर्य- (sic); D11 स्मृत- (for तूर्य-). Ś1 D10 -पुरस्कृतं; D7–9 -पुरस्कृतैः (for -पुरःसरैः). D3 श्रुतिघोषपुरःसरः. —After $21^{ab}$, Ś1 Ñ V1 B1.2.4 D1–4.6.10.11 read 22 (Ñ2 B4 om. $22^{ef}$); while B3 reads $20^{cd}$. —$^{c}$) B3 बहुरत्न-; Cr.m.g.k.t as in text (for वज्राङ्कुश-). Ś1 Ñ V B1.2.4 D1–4.6.10.11 वज्रवैडू(V B1.2.4 °दू)र्यचित्रैश्च. ❀ Cr : वज्राङ्कुशनिकाशैर्वज्रसमसंस्थानैः । ... अङ्कुश इति वैजयन्ती ।; Cm : वज्राङ्कुशनिकाशैर्वज्रनिकाशैरङ्कुशनिकाशैश्च ।; Cg : वज्राङ्कुशनिकाशैर्वज्रमङ्कुशो यस्य स वज्राङ्कुश ऐरावतस्तत्तुल्यैस्तद्वच्छुभ्रैरित्यर्थः । वज्राङ्कुशतुल्यसंस्थानैर्वा ।; Ck : वज्राणामङ्कुशानां च निकाशाः प्रतिमा येषु गृहमेधेषु ते तथा । So also Ct. ❀ —Ñ1 illeg. for $21^{d}$. —$^{d}$) Ś1 V B D1.2.4.6.10.11 हेम- (for वज्र-). Ñ2 हेमजालविशेषितैः; D3 हेमजालकभूषितैः. —D5.8 T2 M3 repeat $21^{ef}$ after 22. —$^{e}$) Ś1 -वर्यैः; B2 -जालैः; D5 (both times).8 (second time) T2 (both times) G1.2 Cm*p* -मुख्यैः; T1.3 -संघैः; Cm.g as in text (for -मेधैः). Ś1 Ñ V B2.3 D1–5 (second time).6.8 (second time).10.11 T1.3 भूयः; B4 हंघ (sic); M1 लंका (for रम्या). B1 गृहमेधैः पराभूय. ❀ Cr : गृहमुख्यैरिति पाठः । गृहमेधैरिति पाठे मेधशब्दः श्रेष्ठवाची ।; Cg : गृहमेधैर्गृहश्रेष्ठैः । " उपमितं व्याघ्रादिभिः " इत्युपमितसमासः. ❀ —$^{f}$) Ś1 Ñ V B D1–4.6.10.11 शुशुभे (for बभासे). D1.10 [अं]बुजैः (for °दैः). —After 21, Ñ2 V1 B1.2.4 (B2.4 [repeats l. 2 in its proper place] preceded by l. 2 of 150*) D6 read $20^{cd}$.

22 G (G2 only $22^{ab}$) M1.2 om. 22. Ś1 Ñ V1 B1.2.4 D1–4.6.10.11 read 22 (Ñ2 B4 om. $22^{ef}$) after $21^{ab}$. —$^{a}$) Ñ1 illeg. from ल in लङ्का up to प in $22^{d}$. Ś1 Ñ1 B3 D3.10.11 जज्वाल सा(B3 च); Ñ2 V1 B1.2.4 D6 जजल्पेव(D6 °च); V2 दिदीपे सा; D1 रराज सा (for प्रजज्वाल). Ś1 तथा; T1.3 पुरी (for तदा). B2 लंकां (for

G. 5. 10. 8
B. 5. 4. 8
L. 5. 2. 25

तां चित्रमाल्याभरणां कपिराजहितंकरः ।
राघवार्थं चरञ्श्रीमान्ददर्श च ननन्द च ॥ २३
शुश्राव मधुरं गीतं त्रिस्थानस्वरभूषितम् ।
स्त्रीणां मदसमृद्धानां दिवि चाप्सरसामिव ॥ २४

शुश्राव काञ्चीनिनदं नूपुराणां च निःस्वनम् ।
सोपाननिनदांश्चैव भवनेषु महात्मनाम् ।
आस्फोटितनिनादांश्च क्ष्वेडितांश्च ततस्ततः ॥ २५

लङ्का). D3 जज्वालैवं पुरी लंका.—[b]) Ś1 V2 D1.2.4.10.11 -शतैः (for -गृहैः). V2 D3 शुभा (for शुभैः). Ñ2 V1 B D6 राक्षसानां हि(Ñ2 च; V1 सु) वेश्मसु(B4 °नि). —[c]) Ś1 D1-4.10.11 ध्वजाग्र- (for सिताभ्र-). D6 शुभ्रैः (for चित्रैः). Ñ2 V B D6 ध्वजाग्रसहि(V1 °ग्रथि; B1.2 °हसि [meta.])तैश्चित्रैः.—[d]) Ś1 V2 -संवृतैः; Ñ1 -संस्कृतैः; B2 -संहितैः; B3 D11 -चित्रितैः; D2.10 -संयुतैः; Cr.m g.k.t as in text (for -संस्थितैः).—Ñ2 B4 om. 22[ef].—[e]) Ś1 Ñ1 V2 B3 D2.10.11 -विवे(B3 °का)शैश्च; V1 B1.2 D1.3.4.6 -विशेषैश्च; G2 -गृहैश्चैव; Cr as in text (for -गृहैश्चापि). —[f]) D2 नद्यातः (sic) (for सर्वतः). T2 G2 M3 सुविभूषिता(G2 °तां) (for °तैः). Ś1 Ñ1 V2 D1.3.4.10 वर्धमानगृहैस्तथा; V1 B1-3 D6 वर्धमानाजिरै(B3 °नै)स्तथा; D11 नद्यावर्तग्रहैस्तव. ❀ Cr : वर्धमानगृहैर्वर्धमानसंज्ञकसंस्थानगृहैः ।; Cm : वर्धमानगृहैर्वर्धमाननाम्ना संस्थानेन संस्थितैः। स्वस्तिकाख्यगृहा क्षाकृत्या चतुरश्राः। "चतुःशाला चतुर्द्वारा सर्वतोभद्रसंज्ञिता। पश्चिमद्वाररहिता नन्द्यावर्ता ह्यानना। दक्षिणद्वाररहिता वर्धमाना धनप्रदा। प्राग्द्वाररहिता स्वस्तिकाख्या पुत्रधनप्रदा।" इत्युक्तेः पद्मस्वस्तिकवर्धमानाख्यगृहाः प्रभुगृहभेदा इत्यर्थः ।; Cg : पद्मस्वस्तिकसंस्थितैः पद्मस्वस्तिकनामभ्यां संस्थानविशेषाभ्यां संस्थितैः। वर्धमानगृहैर्वर्धमाननाम्ना संस्थानेन संस्थितैर्गृहैः। तल्लक्षणानि वराहमिहिरसंहितायां व्यक्तानि विस्तरभयान्न लिख्यन्ते।; Ck : पद्मादिसंकेतेन संनिवेशेन स्थितमवस्थानं येषां ते तथा। वर्धमानं शिरोगृहम्।; Ct : वर्धमानगृहैर्वर्धमाननामकसंस्थानवद्गृहैः। "चतुःशालं चतुर्द्वारं सर्वतोभद्रसंज्ञितम्। पश्चिमद्वाररहितं नन्द्यावर्ताह्वयं तु तत्। दक्षिणद्वाररहितं वर्धमानं धनप्रदम्। प्राग्द्वाररहितं स्वस्तिकाख्यं पुत्रधनप्रदम्।" इत्युक्तेः. ❀ —After 22, D3 ins.:

148* एषां तु गृहमुख्यानां नक्षत्रपथशोभिताम्।
विशेषं नानुपश्यामि स्वयमुत्पतताभिव।;

while D6.8 T2 M3 repeat 21[ef] after 22.

23 [a]) Ś1 Ñ1 D2.10 -नाना-; D11 M1 -माला- (for -माल्य-).—[b]) Ś1 V2 D2.10 -हिते(D10 °तं)रतः; D1.4 -मते स्थितः (for -हितंकरः). Ñ1 नाना *** (illeg.)दूषितां; D6 T2 M2 कपिराजो भयंकरः; D11 कपी रामहितैरितः. ❀ Ck.t : हितंकर इत्यार्षः(Ck °त्यार्षः खच्). ❀ —For 23[ab], Ñ2 V1 B D2.6 subst.:

149* विचित्रनानाभरणांस्ततस्तान्भवनोत्तमान्।

[Ñ2 B2.3 D6 तत्र (for ततस्). D3 कपिरात्महितं वचः (for the post. half).];

—[c]) D7-9 राघवार्थे; M1 °र्थश् (for °र्थं). Ś1 Ñ1 V2 D1-4.10 राघवार्थकरः श्रीमान्; Ñ2 V1 B D6 राघवार्थे कपिः श्रीमान्. ❀ Cr : श्रीमान्, श्रीशब्देन स्वामिकार्यकरणरूपसम्पदुच्यते. ❀ —[d]) G2 जहर्ष; Cr.t as in text (for ददर्श). V1 ननाद; D2 ननर्द (for ननन्द).—After 23, Ñ2 V1 B1.3.4 D6 ins.; B2 ins. l. 1 and l. 3-5 after 23 and l. 2 after 21:

150* प्रासादमाला विविधास्तम्भैः काञ्चनराजतैः।
शातकुम्भमयैर्जालैर्गन्धर्वनगरोपमैः।
वैदूर्यमणिसंकाशैर्मुक्तारजतचित्रितैः।
तलैः स्फाटिकसंकाशैरुपेताः सुमनोहरैः।
ददर्श बहुभौमांश्च सप्तभौमांश्च वानरः। [5]

[Cf. 5.2.48-50.—(l. 1) Ñ2 V1 B3 D6 स्तंभैः (for तम्भैः).—B4 repeats l. 2 here (cf. v.l. 21). —After l. 2, B2.4 (after l. 2 first time) read 20[cd]. —(l. 3) D6 वैडूर्य-. Ñ2 B4 -राजत- (for -र°). B3 मुक्तामणिसभाजितैः (for the post. half).—(l. 4) Ñ2 V1 B4 D6 स्फटिक- (for स्फा°). Ñ2 V1 B4 उपेतान्; B2 व्यपेताः (for उपेताः).];

while D5.7-9 S ins. after 23, whereas Ś1 Ñ1 V2 D1.2.4.10.11 ins. after 18; D3 ins. before 19:

151* भवनाद्भवनं गच्छन्ददर्श पवनात्मजः।
विविधाकृतिरूपाणि भवनानि ततस्ततः।

[(l. 1) Ñ1 illeg. up to र्शं. D1.7-9 कपिकुंजरः.—(l. 2) D1.4 विविधान्यति-; D2.11 M2 °कृत- (for °कृति-). Ś1 Ñ1 V2 D1.2.4.10.11 च सर्वशः; G2 समंततः.]

—Thereafter, G1 M1 cont. 153*.

24 [a]) D7-9 रुचिरं (for मधुरं).—[b]) D3 -स्वन- (for -स्वर-). D1.3.4.11 -शोभितं (for -भूषितम्). Ś1 D10 तालमंद्रसम(D10 °स्वना)न्वितं; Ñ1 ******* (illeg.)तं; Ñ2 V1 B D6 तंत्रीस्थान(V1 °स्वर; B1.2 °ताल; B4 °लय)-समन्वितं(B3 °मीरितं).—[c]) Ñ1 illeg. from न (see var.) in ° up to र in [d]. B3 D10 सदा; D2 मद्य- (for मद-). D7-9 स्त्रीणां मदनविद्धानां.—[d]) Ś1 Ñ2 V B D1-4.6.10.11 त्रिदिवे (for दिवि च).

25 [a]) Ñ2 V1 B D6 क्वचिच्च (for शुश्राव). Ś1 Ñ1 D1.2.4.10 -नादं च (for -निनदं). D11 शुश्राव किंकिणीनां च; M1 शुश्राव कांचनीनादं.—[b]) B3 शिंजितं (for निःस्वनम्). Ś1 Ñ V B1.2.4 D1.2.4.6.10 नूपुरस्वनसंहि(Ñ1 illeg. from हि up to ने in 25[d])तं; D3.11 नूपुरस्वरसंहितान्(D3 °संयुतं)-

स्वाध्यायनिरतांश्चैव यातुधानान्ददर्श सः । रावणस्तवसंयुक्तान्गर्जतो राक्षसानपि ॥ २६

G. 5. 10. 14
B. 5. 4. 14
L. 5. 2. 37

—B3 om. $25^{cd}$.—$^{c}$) D7-9 [अ]पि (for [ए]व). Ś1 D2.10 सोपानानां निनादं च; Ñ2 V B1.2.4 D6 प्रस्वा (Ñ2 V °स्था)पननिनादांश्च; D1.4 सोपानानां स नादांश्च; D3 तंत्रीवादं च मधुरं; D11 शोभनानां निनादांश्च.—$^{d}$) D1.4 भवनानां (for °नेषु). Ś1 Ñ V B1.2.4 D1-4.6.10.11 -कपिः (for -[आ]त्मनाम्).—$^{e}$) B1 D8 आस्फोटन- (D8 °टिता); B3 स शुश्राव (for आस्फोटित-).—$^{f}$) Ś1 D10 क्ष्वेडितानि च वै तथा; Ñ2 बालानां कृततं (sic) तथा; V1 B बालानां खेल(B1 °लि)तां(B3 °नं) तथा; V2 बालानां क्ष्वेडितानिव; D6 बालानां क्ष्वेडतां तदा.—After 25, V2 ins.:

152* भवनान्तरजालानि रक्षसां जल्पितानि च ।;

while D5.7-9 S (G1 M1 cont. after 151*) ins.:

153* शुश्राव जपतां तत्र मन्त्रान्रक्षोगृहेषु वै ।

[G1 पठतां (for जपतां). G1 -गणेषु (for -गृहेषु). D5 G2 च (for वै).]

26 Ñ2 V B1.2.4 D6 read $26^{ab}$ after $28^{ab}$; D5 T2 G2 read $26^{ab}$ for the first time here repeating it after $28^{ab}$.—$^{a}$) Ś1 Ñ V B D2.3.6.10.11 तत्र (for चैव).—$^{b}$) Ñ1 *** (illeg.) तः; Ñ2 V1 B D3.5 (first time).6 T2 (second time) सहस्रशः; D1.4 तथैव च (for ददर्श सः). Ś1 D10 ददर्श कपिकुंजरः; V2 यातुधानांस्त्वयैव सः; D1.4 यातुधानांस्तथैव च.—V2 reads $26^{cd}$ after 30. D11 repeats $26^{cd}$ (followed by 154*) consecutively.—$^{c}$) Ś1 Ñ1 V2 D2.10.11 (both times) -संयुक्तं(D2 °क्तै);

☞ In Ś1 Ñ1 D1-4.10.11, the sequence of stanzas 26-33 (along with substitutes and insertions) is so complicated that it is given separately in a tabular form for the guidance of the reader and is ignored in the Critical Apparatus.

| Ś1 D10 | Ñ1 | D1.4 | D2 | D3 | D11 |
|---|---|---|---|---|---|
| | | | | $26^{cd}$ | |
| $27^{ab}$ | $27^{ab}$ | $27^{ab}$ | $27^{ab}$ | $27^{ab}$ | $27^{ab}$ |
| 155* ($27^{cd}$) | 155* ($27^{cd}$) | 155* ($27^{cd}$) | 155* ($27^{cd}$) | 155* ($27^{cd}$) | 155* ($27^{cd}$) |
| $28^{ab}$ | $28^{ab}$ | $28^{ab}$ | $28^{ab}$ | $28^{ab}$ | $28^{ab}$ |
| $26^{ab}$ | $26^{ab}$ | $26^{ab}$ | $26^{ab}$ | $26^{ab}$ | $26^{ab}$ |
| $28^{cd}$ | $28^{cd}$ | | $28^{cd}$ | $28^{cd}$ | $28^{cd}$ |
| 156* | | | 156* | | 156* |
| $29^{ab}$ | $29^{ab}$ | $29^{ab}$ | $29^{ab}$ | $29^{ab}$ | $29^{ab}$ |
| $31^{ab}$ | $31^{ab}$ | $31^{ab}$ | $31^{ab}$ | $31^{ab}$ | $31^{ab}$ |
| 157* | 157* | 157* | 157* | 157* | 157* |
| | | | | $29^{c}$–$30^{b}$ | |
| $31^{cd}$ | $31^{cd}$ | $31^{cd}$ | $31^{cd}$ | $31^{cd}$ | $31^{cd}$ |
| $32^{c}$–$33^{b}$ | $32^{c}$–$33^{b}$ | $32^{c}$–$33^{b}$ | $32^{c}$–$33^{b}$ | $32^{c}$–$33^{b}$ | $32^{c}$–$33^{b}$ |
| $29^{c}$–$30^{b}$ | $29^{c}$–$30^{b}$ | $29^{c}$–$30^{b}$ | $29^{c}$–$30^{b}$ | | $29^{c}$–$30^{b}$ |
| | | $28^{cd}$ | | | |
| 163* ($30^{cd}$) | | 163* | 163* | 163* | 163* |
| 164* ($30^{ef}$) | 164* | 164* | 164* | | 164* |
| | | | 165* | | |
| | | | | | $30^{cd}$ |
| | | | $30^{ef}$ | | $30^{ef}$ |
| | | | $32^{ab}$ | $32^{ab}$ | |
| $33^{cd}$ | $33^{cd}$ | $33^{cd}$ | $33^{cd}$ | $33^{cd}$ | $33^{cd}$ |
| 165* | 165* | | | | |
| | | $30^{cd}$ | $30^{cd}$ | $30^{cd}$ | |
| $32^{ab}$ | | | | | |
| 161* | 161* | | 161* | | 161* ($32^{ab}$) |
| | | $30^{ef}$ | | $30^{ef}$ | |
| | $32^{ab}$ | | | | |
| | $30^{cdef}$ | | | | |
| $26^{cd}$ | $26^{cd}$ | $26^{cd}$ | $26^{cd}$ | | $26^{cd}$ |
| 154* | 154* | 154* | 154* | | 154* |
| | | | | | $26^{cd}$ (r.) |
| | | | | | 154* (r.) |

G. 5. 10. 14
B. 5. 4. 14
L. 5. 2. 28

राजमार्गं समावृत्य स्थितं रक्षोबलं महत् ।
ददर्श मध्यमे गुल्मे राक्षसस्य चरान्बहून् ॥ २७

दीक्षिताञ्जटिलान्मुण्डान्गोजिनाम्बरवाससः ।
दर्भमुष्टिप्रहरणानग्निकुण्डायुधांस्तथा ॥ २८

कूटमुद्गरपाणींश्च दण्डायुधधरानपि ।
एकाक्षानेककर्णांश्च चलल्लम्बपयोधरान् ॥ २९

करालान्भुग्नवक्त्रांश्च विकटान्वामनांस्तथा ।
धन्विनः खड्गिनश्चैव शतघ्नीमुसलायुधान् ।
परिघोत्तमहस्तांश्च विचित्रकवचोज्ज्वलान् ॥ ३०

---

Ñ2 V1 B D6 -युक्तानि; D1.3.4 -युक्तं च (for -संयुक्तान्). —$^{d}$) D5 गर्जितो; T2 गच्छतो (for गर्जतो). Ś1 D2.10 राक्षसैर्जल्पितं बहु; Ñ1 V2 रक्षसां बहुजल्पितं; Ñ2 V1 B D6 रक्षसां जल्पितानि च; D3 राक्षसानां च जल्पितं; D1.4.11 (both times) रक्षसां जल्पितं(D11 °तान्) बहु. —After 26, Ś1 Ñ1 V2 D1.2.4.10.11 (repeats after $26^{cd}$ second time) ins.:

154* शुश्राव हनुमांस्तत्र सीतान्वेषणतत्परः ।

27 M1 repeats $27^{ab}$ after 33. —$^{a}$) Ś1 Ñ1 V2 D1–4.10.11 स राजपथमास्थाय; Ñ2 V1 B D6 अथ राजपथे तत्र. —$^{b}$) Ñ1 illeg. after र. V2 स्थिरं; D1.4.8(after corr. as in text) G3 स्थितो (for स्थितं). V1 D5.7–9 G1 M1 (first time) -गणं (for -बलं). D10 कपिः (for महत्). Ś1 स्थितो रक्षोबलं कपिः. —$^{c}$) T3 ददर्श मध्यगुल्मे तु. —$^{d}$) M3 रावणस्य (for राक्षसस्य). —For $27^{cd}$, Ś1 Ñ V B D1–4.6.10.11 subst.:

155* ददर्श बहुशस्त्राढ्यं रावणस्य वशानुगम् ।

[ Ñ1 illeg. for स्त्राढ्यं रा. Ś1 D2.10 ददर्श(D2 °र्शं) बहुशस्त्रौघं(Ś1 °घान्) (for the prior half). Ś1 B1–3 D10 च सा(D10 सो)नुगं(Ś1 D10 °गान्); D3 बलानुगं (for वशा°). ]

28 B3 om. $28^{ab}$. —$^{b}$) Ś1 गोजित- (sic); V B2 M1 अजिन-; B1 लोहित-; D6 *जीर- (for गोजिन-). D9 -वासिनः (for -वाससः). B4 सुप्तान्जिनांबरवाससः (hypm.). ❀ Cr: गोजिनाम्बरवाससः .... वसानाश्च ।; Cm: गोजिनाम्बरवाससो गोचर्मवाससो विवसनांश्च ।; Cg: गोजिनाम्बरधारिणो वृषभचर्मरूपवस्त्रधारिणः ।; Ck: गोजिनेति । गोरजिनम् । "सर्वत्र विभाषा गोः" इति प्रकृतिभावाभावः । गोजिनवाससश्चाम्बरवाससश्च तथा ।; Ct: गोजिनं गवाजिनं तद्वाससोऽम्बरवाससो विवाससः । ननु लङ्काया भारतखण्डाद्बहिर्भावेन कर्मभूमित्वाभावात्कथं तत्र रक्षसां दीक्षितत्वमिति चेन्न । नित्यकर्मस्वन्यदेशेऽप्यधिकारात् । रावणादेस्तपोमाहात्म्यात्तत्र काम्यकर्मसिद्धिरपीत्यन्यत् । 'यथा त्वष्टुरपेन्द्रमेव सोममाजह्रे' इत्यादिशतपथोक्तरीत्या । एतेन देवानामीषद्विकृतानपि यज्ञान्दर्शयतीति भाष्यरीत्या चाङ्गवैकल्येऽप्यनुष्ठितात्कर्मणो वृत्रोत्पत्तिरूपकामनासिद्धिस्तथा प्रकृते देशरूपाङ्गवैकल्येऽपि तत्सिद्धिः । रक्षसामपि देवयोनित्वात्. ❀ —After $28^{ab}$, Ñ2 V B1.2.4 D6 read, while D5 T2 G2 repeat, $26^{ab}$. —$^{c}$) D3 -प्रस्तरणान् (for -प्रह°). —$^{d}$) D11 भग्नकांड- (for अग्निकुण्ड-). T2 तदा (for तथा). ❀ Cv: अग्निकुण्डायुधाञ्जपहोमशीलान् ।; Cr.m: अग्निकुण्डायुधान्कृत्याद्युत्पादनद्वारा शत्रु(Cr पर)मारकतयाग्निकुण्डानामायुधत्वम् ।; Cg: अग्निकुण्डायुधाञ्जयार्थं होमशीलान् ।; Ck: अग्निकुण्डमेवायुधं येषां ते तथा ।; Ct: कृत्याद्युत्पादनद्वारा शत्रुमारकतयाग्निकुण्डानामायुधत्वम्. ❀ —After 28, Ś1 D2.10.11 ins.:

156* विरूपान्बहुरूपांश्च विकटान्वामनांस्तथा ।

[ D2 विकसन् (for विरूपान्). ];

29 $^{a}$) Ś1 Ñ1 V D10.11 पाश-; Ñ2 B D1–4.6 प्रास-; T2 शूल-; Cg.k.t as in text (for कूट-). D1.4 -हस्तांश्च (for -पाणींश्च). —$^{b}$) D11 चंड- (for दण्ड-). B4 -*रान् (for -धरान्). —After $29^{ab}$, Ñ2 V1 B1.2.4 D6 read $31^{ab}$ (followed by 157*). —V2 reads $29^{cd}$ after 31. —$^{c}$) Ś1 D1–4.11 एकाक्षांश्चैक-; Ñ1 एका *** (illeg.) (for एकाक्षानेक-). Ñ2 V1 D8 -वर्णांश्च (for -कर्णांश्च). D10 एकाक्षांश्चैव वर्णांश्च. —$^{d}$) D5.7.9 Ck.t चलदेक-; D8 G1 M1 लंबकर्ण-; T1.3 G2.3 M2 चललंब-; M3 लंबोदर- (for चलल्लम्ब-). Ñ2 -स्तनोदरान्. Ś1 D10 लंबितौ(D10 °तो)ष्ठांस्तनूदरान्; Ñ1 कर्णास्थावरणानपि (sic); V1 चलल्लंबोदरस्तनान्; V2 B1.4 D3 चल(V2 सुप्र)लंबस्तनोदरान्; B2.3 D6 लंबकर्ण(B3 °मान; D6 °र्णा)स्तनोदरान्; D1 लंबोष्ठांश्च तनूदरान्; D2 लंबमालातनूदरान्; D11 चलल्लंबांस्तनूरुहान्.

30 V2 reads $30^{ab}$ after $33^{ab}$. —$^{a}$) D1.4.5.10.11 भग्न-; D3 गुप्त- (for भुग्न-). V1 -शंकांश्च; B4 -दंतांश्च; T1 M3 (after corr. as in text) -वस्त्रांश्च (for -वक्त्रांश्च). Ś1 करालभग्नवक्त्रांश्च; Ñ1 करालान्भग्नवस्त्रांश्च; Ñ2 B1 D6 करालान्(B1 °ल)भग्नसक्थींश्च; V2 कलकान्भग्नदर्पांश्च; B2 (also as in B1).3 करालान्भग्नदंतां(B3 °सरथां [hypm.])श्च. —$^{b}$) M1 विटकान् (meta.); Cv.r.m.g.t as in text (for विकटान्). D4 वासतांस् (sic) (for वामनांस्). Ñ1 विकटास्थामनोनपि (sic). —After $30^{ab}$, V2 ins. 163*. —Ñ2 V1 B1.2.4 D6 read 32($32^{cd}$ om.) and $30^{cdef}$ after 163*. V2 transp. $30^{cd}$ and $30^{ef}$. —$^{c}$) Ñ1 B D1.4.6.11 [अ]पि (for [ए]व). —$^{d}$) V2 D2 शूल(D2 प्रास)पाणींस्तथापरान्. —After $30^{cd}$, V2 ins. 165* followed by 161*. —$^{f}$) Ñ V1 B D6 स ददर्श महाकपिः; V2 D1.3.4.11 ददर्श स(D11 च) महाकपिः.
—After 30, V2 reads $26^{cd}$.

नातिस्थूलान्नातिकृशान्नातिदीर्घातिह्रस्वकान् ।
विरूपान्बहुरूपांश्च सुरूपांश्च सुवर्चसः ॥ ३१
शक्तिवृक्षायुधांश्चैव पट्टिशाशनिधारिणः ।
क्षेपणीपाशहस्तांश्च ददर्श स महाकपिः ॥ ३२
स्रग्विणस्त्वनुलिप्तांश्च वराभरणभूषितान् ।
तीक्ष्णशूलधरांश्चैव वज्रिणश्च महाबलान् ॥ ३३

G. 5. 10. 21
B. 5. 4. 23
L. 5. 2. 35

31 Ñ2 V1 B1.2.4 D6 read $31^{ab}$ (followed by 157*) after $29^{ab}$. —$^{a}$) Ñ2 V1 अति- (for first नाति-). Ś1 Ñ1 (illeg. after ना up to the end of $31^{b}$) V2 B D1–4.6.10.11 अतिस्थूलान( D11 °न्ना )तिकृशान्. —$^{b}$) T1.3 transp. दीर्घ and ह्रस्व. M1 -दीर्घांश्च (for °ति-). Ś1 D10 कुब्जान्दीर्घांस्तथापरान्; Ñ2 V B D1–4.6.11 दीर्घा( D2 वीर्या ) न्कुब्जां( Ñ2 D6 °खर्वां )स्तथापरान्( V2 °था पुनः ). ❀ Cg: नातिदीर्घातिह्रस्वकानित्यत्र ह्रकारोपरि ऋकारोच्चारणं वृत्तभङ्गपरिहाराय। एवं ध्वजिन इति वक्तव्ये ध्वजीनित्युक्तिश्च छन्दोभङ्गपरिहारायैव।; Ck: नातिदीर्घातिह्रस्वकानिति। वृत्तभङ्ग आर्षः। तथाऽग्रेऽपि।; Ct: नातिदीर्घातिह्रस्वाकारान्। वृत्तभङ्गो रेफह्कारसंयोगपरो गुरुर्लघुकार्यकारीति न. ❀ —After $31^{ab}$, Ś1 Ñ V B D1–4.6.10.11 ins.:

157* स ददर्श महाबाहून्राक्षसान्घोरदर्शनान्।

[ B1 D3 transp. स and ददर्श. Ś1 -बाहो; Ñ1 V2 D1–4.10.11 -बाहू; B3 -सत्वान् (for -बाहून्). Ñ1 क्रूरकर्मणः (for घोरदर्शनान्). ];

while D5.7–9 S ins.:

158* नातिगौरान्नातिकृष्णान्नातिकुब्जान्न वामनान्।

[ D5 T2 G1.3 M2 अतिगौरान( G1 °* )तिकृष्णान् (for the prior half). T2 G3 M2 चाति- (for नाति-). D5 T2 G1.2 M2.3 नातिकुब्जातिवामनान्; G3 नातिकुब्जांश्च वामनान् (for the post. half). ]

—$^{c}$) Ś1 D2.10 ददर्श (for विरूपान्). —$^{d}$) Ś1 D2.10 वि( D2 सु )रूपांश्चैव सर्वशः; Ñ1 सुरूपान्**वर्चसः; Ñ2 V1 B4 सुरूपानग्निवर्चसः; V2 स्वरूपान्बहुवर्चसः; B1–3 सुरूपांस्तिग्मतेज( B1 °वर्च )सः; D6***नग्निवर्चसः.

—After 31, Ñ2 V1 B D6 ins.:

159* विशाले राजमार्गे तु यथायथमवस्थितान्।

[ B3 विशालराजमार्गेषु (for the prior half). B3 -तथम्; B4**म्; D6 -पथम् (for -यथम्). ];

while D5.7–9 S ins.:

160* ध्वजिनः पताकिनश्चैव ददर्श विविधायुधान्।

[All except D5.8 T2 M1 read prior half hypm. D5 शक्ति- (for ध्वजिनः). D8 पताकाध्वजिनश्चैव; T2 पताकिनश्च ध्वजिनो; M1 ध्वजिनः पाशिनश्चैव (for the prior half). ❀ Ct: छन्दोभङ्ग आर्षः. ❀ ].

—After 31, V2 reads $29^{cd}$, while D6 reads $33^{ab}$ after 31 (preceded by 159*).

32 D1.4 om. $32^{ab}$; V2 reads $32^{ab}$ after 33; Ñ2 V1 B1.2.4 D6 read 32 ( $32^{cd}$ om.) and $30^{cdef}$ after 163*. —$^{ab}$) G3 शस्त्र- (for शक्ति-). Ñ1 V2 [ अ ]पि (for [ ए ]व). Ś1 D2.10 यष्टिवृक्षायुधांश्चापि; Ñ2 V1 B D6 शक्ति( D6 प्रासि )शूलायुधान्कांश्चित् (for $^{a}$). D10 पट्टिम-; T2.3 G M Ck पट्टस-; Cg.t as in text (for पट्टिश-). Ś1 Ñ V B1.3.4 D2.6.10 -[ आ ]युध-; B2 -[ अं ]बर-; Ck.t as in text (for -[ अ ]शनि-). D3 शक्तिवृक्षायुधान्कांश्चित्पट्टिशासिधरानपि. —For $32^{ab}$, D11 subst., while Ś1 D10 ins. after $32^{ab}$; whereas Ñ1 V2 cont. after 165* and D2 ins. after $30^{cd}$:

161* भिण्डिपालगदाहस्तानृष्टिहस्तांश्च दंशितान्।

[ Ñ1 V2 भिंदिपाल- (for भिण्डि°). Ñ1 असि-; D2.10 यष्टि- (for ऋष्टि-). D11 भिंडपालगदाहस्तान्यष्टिहस्तांश्च राक्षसान्. ]

—Ñ2 V1 B D6 om. $32^{cd}$. —$^{c}$) Ś1 Ñ1 V2 D1–4.10.11 विशाले( D11 °ल ) राजमार्गे वै( Ś1 वा; D3 च ). —$^{d}$) Ś1 Ñ1 D1–4.10.11 transp. ददर्श and स. D5 हनुमान् (for स महा-).

33 D6 reads $33^{ab}$ after 31. —$^{a}$) Ś1 D1.2.4.10.11 G1.2 स्रग्विणः सु-; D3 चंदनेन; D8 स्रग्विणश्च (for स्रग्विणस्तु). Ñ1 V2 स्रग्विणो गंधलिप्तांश्च( V2 °गान् ); Ñ2 V1 B1.2.4 D6 स्रग्विणो लिसका( B1 [ before corr. ]°मा )यांश्च; B3 स्रग्विणश्च कुंडलिनः. —$^{b}$) Ś1 D10 परमाभरणान्वितान्; Ñ V B D1–4.6.11 परमाभरणांब( D3 °णान्न )रान्. —After $33^{ab}$, V2 reads $30^{ab}$, while D5.7–9 S ins. after $33^{ab}$:

162* नानावेषसमायुक्तान्यथा स्वैरगतान्बहून्।

[ D5 -समायुक्तास् (for °न्). D5 तथा; T2.3 योधान् (for यथा). D7–9 -चरान्; G1 -गतीन् (for -गतान्). ]

—$^{cd}$) D2 -मूल- (sic) (for -शूल-). D5.11 -धरान्त्र (for °रांश्च). Ñ1 D11 [ अ ]पि (for [ ए ]व). Ś1 Ñ1 D10.11 पाशपाणीं( D11 °बाणां )स्तथापरान्; D1.2.4 वज्रासिवरधारिणः; D3 वज्रायुधधरानपि (for $^{d}$). V2 तीक्ष्णशूलधरान्कांश्चिच्छतघ्नीमुशलायुधान्. —For $33^{cd}$, Ñ2 V1 B D6 subst.; Ś1 D10 subst. for $30^{cd}$; V2 D2.11 ins. after $30^{ab}$; D1.4 ins. after 28; D3 ins. after $33^{ab}$:

163* विवृतोरुशिरोग्रीवान्विकटानुत्कटानपि।

[ Ś1 D2.10 विकृतोरु-; B3 निवृ°; D1.4 °तोरः-; D3 विधृ°; D11 विवृतोय- (sic) (for विवृतोरु-). D3 चंकटान् (corrupt) (for उत्क°). D10 (before corr.) विकटोनामनास्तथा (for the post. half). ]

G. 5. 10. 22
B. 5. 4. 23
L. 5. 2. 0

शतसाहस्रमव्यग्रमारक्षं मध्यमं कपिः ।
प्राकारावृतमत्यन्तं ददर्श स महाकपिः ॥ ३४
त्रिविष्टपनिभं दिव्यं दिव्यनादविनादितम् ।
वाजिहेषितसंघुष्टं नादितं भूषणैस्तथा ॥ ३५
रथैर्यानैर्विमानैश्च तथा गजहयैः शुभैः ।
वारणैश्च चतुर्दन्तैः श्वेताभ्रनिचयोपमैः ॥ ३६
भूषितं रुचिरद्वारं मत्तैश्च मृगपक्षिभिः ।
राक्षसाधिपतेर्गुप्तमाविवेश गृहं कपिः ॥ ३७

## इति श्रीरामायणे सुन्दरकाण्डे तृतीयः सर्गः ॥ ३ ॥

—After 163*, Ñ2 V1 B1.2.4 D6 read 32 ( $32^{cd}$ om. ) and $30^{cdef}$. After 163*, V2 D1.2.4.11 cont., Ñ1 ins. after $30^{ab}$; Ś1 D10 subst. for $30^{ef}$:

164* परश्वधधरानुग्रान्कांश्चिन्मुद्गरधारिणः ।

[ D2 उग्रांगांश्च ( for उग्रान्कांश्चिन् ). ]

—After 33, Ś1 Ñ1 D10 ins., while V2 ins. after $30^{cd}$, whereas D2 cont. after 164* :

165* चक्रतोमरहस्तांश्च शिलापाशायुधानपि ।

[ Ñ1 अ* ; V2 वज्र- ( for चक्र- ). Ñ1 -खंड- ( for -पाश- ).]

—Thereafter V2 cont. 161*.

—After 33, V2 reads $32^{ab}$, M1 repeats $27^{ab}$.

34 Ś1 Ñ1 V2 D1.2.4.10.11 om. 34. —$^{a}$) D3 आरंभम् ( for अव्यग्रम् ). —$^{b}$) D3 अव्ययं ददृशे कपिः. ❀ Cg: शतसहस्रमेव शतसाहस्रम् . ❀ —For $34^{ab}$, Ñ2 V1 B D6 subst. :

166* राक्षसाञ्शतशस्तस्मिन्नारक्षे मध्यमे स्थितान् ।

[ Ñ2 D6 रक्षसां. B3 विविधाकारान् ( for शतशस्तस्मिन् ). B4 दुर्गमे ( for आरक्षे ). B3 वरायुधव्यवस्थितान् ( for the post. half ). ]

—Then B2 cont. :

167* आश्चर्यं च तदा मेने वायुपुत्रः प्रतापवान् ।

—After $34^{ab}$, D3.5.7–9 S ins. :

168* रक्षोधिपतिनिर्दिष्टं ददर्शान्तःपुराग्रतः ।
स तदा तद्गृहं दृष्ट्वा महाहाटकतोरणम् ।
राक्षसेन्द्रस्य विख्यातमद्रिमूर्ध्नि प्रतिष्ठितम् ।
पुण्डरीकावतंसाभिः परिखाभिः समावृतम् ।

[ ( l. 1 ) D3 रक्षसां पथि ( for रक्षोधिपति- ). D3 स्थितमंतःपुराग्रतः ( for the post. half ). —( l. 2 ) D5 तथा ( for तदा ). D3 स तमंतःपुरद्वारं दृष्ट्वा कांचनतोरणं. —( l. 3 ) D3 लंका- ( for अद्रि- ). —( l. 4 ) M1 समंततः; M3 अलंकृतं ( for समावृतम् ). ❀ Cv : स तदा तद्गृहं तदारक्षं दृष्ट्वा राक्षसेन्द्रस्य गृहं ददर्शेत्यन्वयः । आरक्षस्यानन्तरं गृहान्तःप्रस्तावाच्च । एवमन्वीयते, प्रथमप्रयुक्तसकारस्मरणार्थो द्वितीयः सकारः । ; Cr : स इति । द्वयमेकम् । तत्सैन्यं दृष्ट्वा राक्षसेन्द्रस्य गृहं ददर्शेति । द्वितीयस्तच्छब्दः प्रसिद्धिपरः । ; Cm : स इत्यादि श्लोकद्वयमेकं वाक्यम् । द्वितीयस्तच्छब्दः प्रसिद्धिपरः ।; Cg : स तदेत्यादि श्लोकद्वयमेकान्वयम् । स कपिस्तदारक्षं दृष्ट्वा स राक्षसेन्द्रस्य गृहं ददर्शेत्यन्वयः । क्रियाभेदात्तच्छब्दद्वयम् । ; Ct : स प्रकृतः प्रसिद्धः कपिः । राक्षसेन्द्रस्य गृहमुच्यमानविशेषणं ददर्श. ❀ ]

—Ñ2 V1 B D6 om. ( hapl. ) $34^{c}$–37. —$^{c}$) T1.3 M1 -वृतम् ( for -[आ]वृतम् ). T1.3 G1.2 M1 अत्यर्थं ( for °न्तं ). D3 प्राकारपृष्ठमारुह्य.

35 Ñ2 V1 B D6 om. 35 ( cf. v.l. 34 ). G3 reads $35^{ab}$ for the first time here repeating it ( var. ) after 37. —$^{a}$) V2 तत्र ( for दिव्यं ). Ś1 D10 त्रिविष्टपनिभां दिव्यां. —$^{b}$) D4 तूर्य- ( for दिव्य- ). Ś1 Ñ1 V2 D1.4.8.10.11 T2 -निनादितं( Ś1 D10 °तां ); G3 ( second time ) M1 -विभूषितं ( for -विनादितम् ). D3 दिव्यवादित्रनादितं. —$^{c}$) Ñ1 V2 D7.9.11 वाजिह्रेषित- ( for °हेषित- ). Ś1 D10 -संघुष्टां ( for °ष्टं ). —$^{d}$) G3 भूषितैस् ( for भूषणैस् ). T2 तदा ( for तथा ). Ś1 Ñ1 V2 D1.2.4.8.10.11 नादितं ( Ś1 D10 °तां ) भूषणस्वनैः; D7.9 अद्भुतैश्च हयैस्तथा.

36 Ñ2 V1 B D6 om. 36 ( cf. v.l. 34 ). —$^{a}$) M1 रथ्यैर् ( for रथैर् ). D11 बाणैर् ( for यानैर् ). —$^{b}$) M1 तदा ( for तथा ). D5.7.9 T2 M3 हयगजैः ( by transp. ); D8 G3 M1.2 [अ]द्भुतहयैः ; G1 भूतैर्हयैश् ( for गजहयैः ). Ś1 D1.10.11 शुभैर्द्रुत( Ś1 D10 °र्द्रुम; D3 °र्भूत )हयैस्तथा; Ñ1 V2 शुभैर्म( V2 राजम )त्तगजैस्तथा. ❀ Cg : हयगजैरित्यत्र गजशब्दो द्विदन्तगजपरः । अतो न वारणैरित्यनेन पुनरुक्तिः । ; Ct : हयगजैर्हयाकारैर्गजैः स्वल्पगजैरिति यावत् . ❀ —$^{c}$) D10 रावणैश् ( meta. ) ( for वारणैश् ). —$^{d}$) M1 -[अ]द्रि- ( for -[अ]भ्र- ). Ś1 Ñ1 V2 D1–4.10.11 रा( D1.4 र )जताचलसंनिभैः( D4 °भं ).

37 Ñ2 V1 B D6 om. 37 ( cf. v.l. 34 ). —$^{a}$) D5.7.9 भूषितैर् ( for °तं ). D5 -द्वारैर् ( for -द्वारं ). —$^{b}$) Ś1 Ñ1 V2 D1.2.4.10 वन्यैश् ; D3.11 धन्यैश् ( for मत्तैश् ). D1 ( before corr. ) -पक्षिणः ( for -पक्षिभिः ). —After $37^{ab}$, D5.7–9 S ins. :

# ४

ततः स मध्यंगतमंशुमन्तं
ज्योत्स्नावितानं महदुद्वमन्तम् ।
ददर्श धीमान्दिवि भानुमन्तं
गोष्ठे वृषं मत्तमिव भ्रमन्तम् ॥ १

G. 5. 11. 3
B. 5. 5. 1
L. 5. 3. 1

169* रक्षितं सुमहावीर्यैर्यातुधानैः सहस्रशः।

[ D5 रक्षिभिश्च ( for रक्षितं सु- ). ]

—$^{c}$) Ñ1 illeg. from गृं up to $^{d}$. —$^{d}$) D3 प्रविवेश ( for आवि° ). V2 कपिः पुनः; D1–4.11 कपिर्गृहं ( by transp. ); M3 यथा कपिः ( for गृहं कपिः ). —After 37, G2 repeats 35$^{ab}$, while D5.7–9 S ins. after 37:

170* सहेम जाम्बूनदचक्रवालं
महार्हमुक्तामणिभूषितान्तम् ।
परार्घ्यकालागरुचन्दनाक्तं
स रावणान्तःपुरमाविवेश ।

तत्र तत्र च विन्यस्तैः सुश्लिष्टैः शयनासनैः ।
पानभूमिर्विना वह्निं प्रदीप्तेवोपलक्ष्यते ॥ १७

बहुप्रकारैर्विविधैर्वरसंस्कारसंस्कृतैः ।
मांसैः कुशलसंयुक्तैः पानभूमिगतैः पृथक् ॥ १८

दिव्याः प्रसन्ना विविधाः सुराः कृतसुरा अपि ।
शर्करासवमाध्वीकाः पुष्पासवफलासवाः ।
वासचूर्णैश्च विविधैर्मृष्टास्तैस्तैः पृथक् पृथक् ॥ १९

संतता शुशुभे भूमिर्माल्यैश्च बहुसंस्थितैः ।
हिरण्मयैश्च करकैर्भाजनैः स्फाटिकैरपि ।
जाम्बूनदमयैश्चान्यैः करकैरभिसंवृता ॥ २०

V B2-4 D6 आम्रा( V2 अम्लां; D6 आस्रा )तकविभूषितैः ; B1 गुडेन सह मिश्रितं. —After $15^{ab}$, Ś1 D2 read $19^{ef}$, while Ñ2 D6 ins. 301*. —V1 B om. $15^{c}-18^{b}$; V2 om. $15^{c}-16^{b}$. —$^{c}$) D7.9 M2 महा- (for हार-). —$^{d}$) D6 उपयुक्तैर् (for अपविद्धैर्).

16 V1 B om. 16; V2 om. $16^{ab}$ (for both, cf. v.l. 15). —$^{a}$) D5 T2.3 G2 -भोजन- (for -भा°). D11 -निक्षिप्तैः; T3 -विक्षेपैः (for -विक्षिप्तैः). —Ñ1 illeg. from $^{b}$ up to रथि in $^{d}$. —$^{b}$) D5 स्थूलैश्च; D8 विमलैर् (for फलैश्च). —$^{c}$) D2 भूत-; D10 च्युत- (for कृत-). —$^{d}$) V2 D2.3.5.7.9 T G3 अधिकां (for °कं). D11 पुष्पित- (for पुष्यति). Ñ1 illeg.; D1.4 श्रयं; D2.6 श्रिया (for श्रियम्).

17 V1 B om. 17 (cf. v.l. 15). —$^{a}$) D9 om. (hapl.) second तत्र. Ś1 Ñ V2 D1-4.6.10.11 दीप्तै( V2 D6.11 दीपै )श्च कलधौतैश्च. —$^{b}$) Ś1 Ñ V2 D1-4.6.10.11 विन्यस्तैः; D5.7-9 सुश्लिष्ट-; T2 G1 M1 संश्लिष्टैः; T3 सुक्लिष्टैः (for सुश्लिष्टैः). G3 damaged from सनैः up to विवि in $18^{a}$. —D11 om. $17^{c}-18$. —$^{d}$) D2.10 -लक्षते (for -लक्ष्यते). —After 17, V2 reads $21^{ab}$.

18 V1 B om. $18^{ab}$ (cf. v.l. 15). D11 om. 18 (cf. v.l. 17). G3 damaged up to विवि in $^{a}$ (cf. v.l. 17). —$^{a}$) V2 -प्रकार- (for °रैर्). Ñ1 बहुप्रकारसिद्धैश्च. —$^{b}$) D1.4 घृत- (for वर-). Ś1 -सत्कार- (for -संस्कार-). D6 क्षसंस्कारससंस्कृतैः. —$^{c}$) T2 कलश-; Cm.g.t as in text (for कुशल-). Ñ1 V2 D1.4 G2 -संसिद्धैः; D3 -संकुलैः; D6 -संक्षिप्तैः; Cm.g.k.t as in text (for -संयुक्तैः). Ś1 D2.10 मत्स्यैः कुशलिभिः सिद्धैः. —For $18^{cd}$, V1 B subst.; while Ñ2 D6 ins. after $15^{ab}$:

301* सम्पन्नरूपैर्बहुभिर्मांसैः समुपपादितैः ।

[ Ñ2 B4 मांसैश्च( Ñ2 मांस* ) समुपादितैः (sic) (for the post. half). ]

—After 18, Ś1 D2.10 read $15^{ab}$ and V2 reads $20^{ab}$.

19 M1 om. (hapl.) 19. Ñ2 V1 B om. $19^{ab}$. Ś1 D2.10 read $19^{abcd}$ after 21. D6 reads $19^{abcd}$ after 300*. —$^{ab}$) D1-3.11 -[ आ ]सवाः ; D6.8 तथा (for अपि). Ś1 D10 सुरास्तत्र तथासवान् ; T2 सुराः कृतरसास्तथा (for $^{b}$). Ñ1 प्रसन्ना विविधा दिव्याः शुद्धा * *** (illeg.) सुराः; V2 दिव्याः प्रसन्नाः सुरसाः शुद्धाश्च विविधाः सुराः. —Ñ2 V B read $19^{cd}$ after 300*. —$^{c}$) Ś1 D10 -माध्वीकान् ; Ñ2 V1 B -माध्वीकं; V2 T1.3 M3 -मध्वीक-; Cv.m.g.k.t as in text (for -माध्वीकाः). ❀ Cv.m.g: माध्वीका मधुना कृताः। (Cm मार्द्वीका इति पाठे द्राक्षाफलविकारा वा । "मृद्वीका गोस्तनी द्राक्षा" इत्यमरः ।); Ck: मधूपादाना माध्वीका मधूकपुष्पाद्यासवाः। ; Ct: मधूपादानको माध्वीकः। द्राक्षोपादानकः इत्यन्ये। मधूकपुष्पादिजः पुष्पासवः. ❀ —$^{d}$) Ś1 V2 D10 -[ आ ]सवान् ; Ñ2 V1 B °वं (for °वाः). —Ś1 D2 read $19^{ef}$ after $15^{ab}$. B1 reads $19^{ef}$ in marg. —$^{e}$) T2 -वासमाणैश् (sic); G1 °पूर्णैश् ; M1 वासैश्च°; Cv.m.g.k.t as in text (for °चूर्णैश्). Ś1 Ñ D10 वासैश्च पूर्णैर्माल्यैश्च (D10 om. from र्मा up to $20^{a}$) ; V1 वासैश्च पूर्णैश्च मांसैश् ; B D1-4.6.10.11 वासै( B1.2[ also in marg. ].4 गंधै )श्चूर्णैश्च माल्यै( B3 मांसै; D2 वासै )श्च. —G3 damaged from $19^{f}$ up to भू in $20^{a}$. —$^{f}$) Ś1 Ñ1 D2.11 विविधैस्तैः ; Ñ2 B D3.6 विविधैश्च; V1 च माल्यैश्च; D5.8 T2.3 G2 M2.3 Cm.g दृष्टास्तैस्तैः ; Ck.t as in text (for मृष्टास्तैस्तैः). D1.4 धूपैश्च विविधैः पृथक्.

20 D10 om. $20^{a}$, G3 damaged up to भू (for both, cf. v.l. 19). V2 reads $20^{ab}$ after 18. —$^{a}$) Ñ1 B1.3 D1.4.6 समंतात् ; B2 समस्ता (for संतता). —$^{b}$) D8 सु- (for च). Ñ1 -संज्ञकैः; D11 -सज्जितैः (for -संस्थितैः). Ś1 D2 पुष्प( D2 बहु )माल्यैश्च सज्जितैः ; Ñ V B D6 भक्ष्यै( Ñ2 V1 B1 भक्षै )श्च विविधैस्तथा( B1 °दा); D10 माल्यैश्च ** सज्जितैः. ❀ Cv: सन्ततेति। अस्यानन्तरं हिरण्मयैरित्यादिप्रथमान्तश्लोको द्रष्टव्यः. ❀ —After $20^{ab}$, Ñ2 V1 B D6 read 22 and Ś1 V3 D2-4.10.11 T2 read $20^{cdef}$ after 22; Ñ1 reads $20^{cdef}$ after 302*. D1 reads $20^{cdef}$ after 21. —$^{c}$) D1.3.4 स (for च). Ś1 D2.10 M3 विविधैर्; B2 D7.9 कलशैर् ; B3 चषकैर् ; D8 सुकृतैर् ; T3 करणैर् (for करकैर्). —$^{d}$) D8 करकैः (for भाजनैः). Ś1 D10 राजतैर् (for स्फाटिकैर्). D1.3.4 transp. भाजनैः and स्फाटिकैर्. B2 तथा (for अपि). —$^{e}$) Ñ1 T2 [ अ ]पि (for [ अ ]न्यैः). —$^{f}$) T3 करणैर्; M1 कनकैर्; Cg.t as in text (for करकैर्). V2 उप-; D1.3-5.11 G1.3 अपि; Cg as in text (for अभि-). Ś1 D2.5.8.10 T2 G3 M2 -संवृतां( Ś1 D10 °तान्; T2 °तं); Ñ2 D6 -पूरितैः ; V1 -पूजितैः ; D1 संवृतैः ; D3.4 संभृतैः ; Cm.g as in text (for -संवृता). B1 शात-

राजतेषु च कुम्भेषु जाम्बूनदमयेषु च ।
पानश्रेष्ठं तदा भूरि कपिस्तत्र ददर्श ह ॥ २१

सोऽपश्यच्छातकुम्भानि शीधोर्मणिमयानि च ।
राजतानि च पूर्णानि भाजनानि महाकपिः ॥ २२

क्वचिदर्धावशेषाणि क्वचित्पीतानि सर्वशः ।
क्वचिन्नैव प्रपीतानि पानानि स ददर्श ह ॥ २३

क्वचिद्भक्ष्यांश्च विविधान्क्वचित्पानानि भागशः ।
क्वचिदन्नावशेषाणि पश्यन्वै विचचार ह ॥ २४

क्वचित्प्रभिन्नैः करकैः क्वचिदालोडितैर्घटैः ।
क्वचित्संपृक्तमाल्यानि जलानि च फलानि च ॥ २५

शयनान्यत्र नारीणां शून्यानि बहुधा पुनः ।
परस्परं समाश्लिष्य काश्चित्सुप्ता वराङ्गनाः ॥ २६

G. 5. 14. 0
B. 5. 11. 29
L. 5. 6. 23

कुंभमयैस्तथा ( also सरकैरपि पूजितैः in marg. ); B2.3 कलशैं ( B2 °नकै )रभिपूजितैः ; B4 कलशैरपि पूरितैः . —After 20, D8 reads 25.

21 V2 reads $21^{ab}$ after 17. —$^{a}$) Ñ2 V1 B1 ( marg. ).2–4 D6 राजतैरथ( B2 °पि ) कुंभैश्च. —$^{b}$) Ñ2 V1 B2–4 D6 शातकुंभमयैस्तथा. —$^{c}$) D1.2.10.11 पानं श्रेष्ठं; D5.7–9 M1 Ck.t पानश्रेष्ठां ( for पानश्रेष्ठं ). Ś1 Ñ1 V2 D1–5 T2 G1 M1 तथा ( for तदा ). Ñ2 V1 B D6 पानभूमिं तदा( B4 यथा ) कीर्णां; D7–9 पानश्रेष्ठां तथा( D8 तदा ) भूमिं. —$^{d}$ )D8 T2 M1.3 स: ; T1 हि; G3 damaged ( for ह ). Ś1 V2 D1–4.10.11 ददर्श हरि( D3 कपि )यूथपः ; Ñ V1 B D6 ददर्श कपिकुंजरः. —After 21, Ś1 D2.10 read $19^{abcd}$; while D1 reads $20^{cdef}$ ( owing to om. of 22 ).

22 D1 om. 22. Ñ2 V1 B D6 read 22 after $20^{ab}$. —$^{a}$) V2 D6 शत- ( for शात- ). Ś1 Ñ D2.4.6.10.11 -कौंभानि. —$^{b}$) Ś1 D10 कपिर्; B1 D2.4–9 सीधोर्( B1 [ before corr. ]सिन्नार- ); B4 संवोर् ( sic ); D3 सिध्येर् ( sic ); D11 शीर्षोर् ( sic ); T2 सिद्धेर् ( sic ); Cm.g as in text ( for शीधोर् ). —$^{c}$) Ñ2 D7.9 तानि तानि ( for राजतानि ). Ś1 D10 रम्याणि; V2 D2.11 मुख्यानि ( for पूर्णानि ). —For $22^{cd}$, Ñ1 subst. :

302* भाजनानि विचित्राणि शयनान्यासनानि च ।
नानाफलसम * * न्यपतीतोन्यनेकशः ।
तत्रापश्यत्कपिश्रेष्ठः सम * * * * त्मजः ।

—Thereafter Ñ1 reads $20^{cdef}$.

—After 22, Ś1 V2 D2–4.10.11 T2 read $20^{cdef}$.

23 $^{a}$) T3 G2 अल्प-; Cm.t as in text ( for अर्ध- ). Ś1 V2 -[ अ ]वशेषेण; B3 -[ अ ]वशिष्टानि; Cm.t as in text ( for -[ अ ]वशेषाणि ). —$^{b}$) D7.9 [ अ ]शेषतः ( for सर्वशः ). —$^{c}$) D2 [ ए ]वं; G3 [ ए ]ष ( for [ ए ]व ). B2 च ( for प्र- ). Ñ2 V1 B1.3.4 D6 क्वचिच्च नैव( B1 °च्छनैश्च ) पीतानि; D11 क्वचिन्नैव प्रतीतानि. —$^{d}$) Ś1 D10 पानानि प्रेक्षते स्म सः; Ñ1 B4 स पानान्यवलोकयत् ; V2 B1.3 D1.3.4.6 स पानानि व्य( D6 वि )लोकयत् ; B2 भाजनानि व्यलोकयत् ; D2.11 पानानि व्यत्रि( D11 सम )लोकयत् .

24 D1.3 om. 24. D8 transp. $^{ab}$ and $^{cd}$. —$^{a}$) B4 भोज्यांश्च; D7–9.11 G1 M2.3 भक्षांश्च ; Cg as in text ( for भक्ष्यांश्च ). —$^{b}$) D8 सर्वशः ( for भागशः ). Ś1 D10 पानानि विविधानि च; Ñ V B D2.6.11 पानानि च( B1 निपातानि; D11 पातनानि [ corrupt ] ) क्वचित्क्वचित् ; D7.9 क्वचित्पानं विभागतः. —G3 mostly damaged for $24^{cd}$. —$^{c}$) Ś1 Ñ1 D7–10 T1.3 अर्ध- ( for अन्न- ). G1 क्वचिदन्नविशेषाणि. —$^{d}$) M1 सः ( for ह ). D2.11 कपिकुंजरः ( for विचचार ह ). Ś1 D10 सोपश्यत्कपिकुंजरः; Ñ1 पश्यन्स कपिकुंजरः. —For $24^{cd}$, Ñ2 V B D6 subst. :

303* फलानि चार्धशेषाणि क्वचिन्निःशेषितानि च ।

[ V2 [ अ ]व- ( for [ अ ]र्ध- ). Ñ2 V1 किंचिन् ( for क्वचिन् ). ]

—For 24, D4 subst. :

304* क्वचित्प्रभिन्नैः सरकैः क्वचित्पीतानि सर्वशः ।
क्वचिन्नैव प्रपीतानि स पानानि व्यलोकयत् ।

25 Ñ1 om. 25–$26^{ab}$. D7.9 om. 25. D8 reads 25 after 20. —$^{a}$) D5 प्रभिन्न-; D11 प्रसन्नैः ( for प्रभिन्नैः ). D1 सरकैः; T3 करणैः ( for करकैः ). V2 क्वचिद्भिन्नैश्च शरकैः. —$^{b}$) Ś1 V2 D1–4.10 आरोपितैर्; M1 आलोकितैर् ; Cv आलोलितैर् ( for आलोडितैर् ). D11 क्वचिदारोपितैर्वरैः. —For $25^{ab}$, Ñ2 V1 B D6 subst. :

305* क्वचित्प्रभिन्नान्करकान्क्वचिदालोडितान्घटान् ।

[ B1 क्वचित्प्रभिन्नकलशान् ( for the prior half ). ]

—$^{c}$) B1.2 संयुक्त-; T2 संवृत्त-; Cv.g as in text ( for संपृक्त- ). —$^{d}$) Ś1 D1–4.10.11 फलानि च जलानि च; Ñ2 D6 विविधानि फलानि च; V B1.2.4 फलानि( B2 om. hapl. ) विविधानि च. —After 25, Ñ2 V1 B D6 ins. l. 2 and 4 of 309*.

26 Ñ1 om. $26^{ab}$ ( cf. v.l. 25 ). Ñ2 V1 B D6 om. 26 – 28. —$^{a}$) D3 च ( for [ अ ]त्र ). —$^{b}$) T2 M3 शुभ्राणि; Cm.t as in text ( for शून्यानि ). Ś1 V2 D2.10 सुखा( V2 शुभा )नि विविधानि च; D1.3.4.11 शून्यानि विविधानि च. * Cm : शून्यानि बहुधा पुनरिति पाठः। शून्यानि पतिशून्यानि. * —$^{c}$) D3.11 समालिंग्य; D5.8 समाश्लिष्टाः ( for समाश्लिष्य ). —$^{d}$) Ś1 D10 वरस्त्रियः ( for वराङ्गनाः ). D2 काचित्सुप्ता वरांगना.

G. 5. 14. 0
B. 5. 11. 30
L. 5. 6. 28

काचिच्च वस्त्रमन्यस्या अपहृत्योपगुह्य च ।
उपगम्याबला सुप्ता निद्राबलपराजिता ॥ २७

तासामुच्छ्वासवातेन वस्त्रं माल्यं च गात्रजम् ।
नात्यर्थं स्पन्दते चित्रं प्राप्य मन्दमिवानिलम् ॥ २८

चन्दनस्य च शीतस्य शीधोर्मधुरसस्य च ।
विविधस्य च माल्यस्य पुष्पस्य विविधस्य च ॥ २९

बहुधा मारुतस्तत्र गन्धं विविधमुद्वहन् ।
स्नानानां चन्दनानां च धूपानां चैव मूर्छितः ।
प्रववौ सुरभिर्गन्धो विमाने पुष्पके तदा ॥ ३०

श्यामावदातास्तत्रान्याः काश्चित्कृष्णा वराङ्गनाः ।
काश्चित्काञ्चनवर्णाङ्ग्यः प्रमदा राक्षसालये ॥ ३१

तासां निद्रावशत्वाच्च मदनेन विमूर्छितम् ।
पद्मिनीनां प्रसुप्तानां रूपमासीद्यथैव हि ॥ ३२

27 Ñ2 V1 B D6 om. 27 (cf. vl. 26). —ᵃ) G1 M3 काश्चिच्च् (for काचिच्च्). —ᵇ) G3 damaged from प up to ला in °. D8 -गुह्य च; G1 M1 -गुह्य ताम्; Ct as in text (for -गुह्य च). D5 T3 M2 Ck अभिहृ(T2 अपसृ)त्योपगुह्य तां; T1.3 G2 M3 स्वपंत्याः परिधाय च. —For 27ᵃᵇ, Ś1 Ñ1 V2 D1–4.10.11 subst.:

306* काश्चिदन्योन्यवस्त्रान्तमपकृष्योपगुह्य च ।

[V2 काचिद्; D2.10 कचिद् (for काश्चिद्). D11 अपदृद्वो- (corrupt) (for °कृष्य). Ś1 Ñ1 D10 [अ]व(Ñ1 [अ]प)-गुह्य; D2 [अ]वगुह्य (for [उ]पगुह्य). V2 उपगुह्योपकृष्य च (for the post. half).]

—ᶜ) Ś1 Ñ1 V2 D1–4.10 M2 अभि(D3 परि; M3 उप)-सृत्य; T1.3 M3 आहृत्य च; T2 G2 उपगुह्य; G1 अभिगम्य; Ct as in text (for उपगम्य). Ś1 D1.3.4 T3 [अ]बलाः; T2 [अ]परा (for [अ]बला). Ñ1 D10.11 M2 अभि(M2 उप)सृत्याबलाः सुप्ताः; D5 उपगम्याबलाः सर्वाः; M3 आहृत्य चाबलाः सुप्ताः. —ᵈ) D3 -वश- (for -बल-). D1.3–5 T3 M2.3 -पराजिताः (for °जिता). Ś1 Ñ1 V2 D10 निद्रावशपराजिताः(Ñ1 °यणाः; V2 °यणा).

28 Ñ2 V B D6 om. 28 (for all except V2, cf. v.l. 26). For 28, cf. l. 3-4 of 260*. —ᵃ) D5 निःश्वास- (for उच्छ्वास-). —ᵇ) D1.5.11 T1.3 G1.3 वस्त्र- (for वस्त्रं). Ś1 Ñ1 D2.4.10.11 T2 गात्रगं (for °जम्). ❀ Cm.g.t : गात्रजं गात्रस्थम् . ❀ —ᶜ) Ś1 त्यर्थं (sic).

29 ᵃ) D8 [ए]व (for च). Ś1 Ñ V B D1.2 (marg.).3.4.10.11 दिव्यस्य (for शीतस्य). —ᵇ) Ñ V B4 D1–9 Ct सीधोर्; M1 च शीधोर् (hypm.) (for शीधोर्). T2 मधुमयस्य; Cv as in text (for °रसस्य). B1 सीधोश्च मधुरस्य च. —B1 om. 29ᶜ–30ᵈ. D6 om. 29ᶜ–30ᵇ. Ñ1 D1.2.4.11 transp. ᶜ and ᵈ. —ᶜ) B3 D4 om. च. G1 पुष्पस्य (for माल्यस्य). —After 29ᶜ, D3 ins.; Ś1 V2 D10 subst. l. 2 for 29ᶜ, while Ñ1 D1.2.4.11 ins. l. 1 after 29ᶜ and l. 2 after 29ᵇ:

307* ग्रथितस्य शुभैः करैः ।
कर्पूरस्य तथाग्र्यस्य.

[(l. 1) D11 करैः शुभैः (by transp.).]

—ᵈ) B2.4 फलस्य; D8 T1.3 M3 धूपस्य; G1 मांसस्य (for पुष्पस्य). D1 च फलस्य (for विविधस्य).

30 B1 om. 30ᵃᵇᶜᵈ (cf. v.l. 29). Ñ2 V1 B2–4 D6 om. 30ᵃᵇ (for D6, cf. v.l. 29). —ᵃ) Ś1 D1–4.10.11 बभूव; V2 प्रवरो (for बहुधा). D5.7–9 T2 M2 तस्य (for तत्र). —ᵇ) T M1.2 उद्वमन् (for °हन्). —ᶜᵈ) G3 damaged for स्नानानां चन्द. V2 D1.4 माल्यानां; B2 मालानां; B3 पुष्पाणां; B4 गंधानां; D5 M3 Cg रसानां; T2 मधूनां; G1.3 M1 पानानां; Cv.m as in text (for स्नानानां). T2 पानानां (for धूपानां). Ś1 D10 च स; D2 स च (for चैव). D6 स्नानानां च धूपानां सुगंधीनां चैव मूर्छितः. ❀ Ct : 'स्नानानां चन्दनानाम्' इति पाठे स्नानार्हचन्दनानामित्यर्थः. ❀ —ᵉ) V2 ववौ च; B2 प्रवरो (for प्रववौ). Ñ2 V1 B D6 वायुर् (for गन्धो). —ᶠ) Ś1 Ñ2 V1 B2 D5 T2 तथा (for तदा). D11 विमाने पुष्पकेषु च. —After 30, D6 reads 33ᵃᵇ.

31 Ñ2 V B D6 om. 31 and 32 here, cf. l. 1–2 of 274* and l. 1–2 of 258* respy. —ᵃ) D1.4 -[अ]-वदाता (for °दातास्). Ñ1 D2.11 सुप्तान्या; D1.4 काश्चिच; D3 *** (for तत्रान्याः). Ś1 D10 श्यामावदाता सुप्तान्या. ❀ Cg : वदाता अवदाताः। भागुरिमतेनाल्लोपः। शुभ्रा इत्यर्थः. ❀ —ᵇ) D3.10 काचित् (for काश्चित्). D2 सुप्ता (for कृष्णा). D3.10 वरांगना (for °नाः). D1 काश्चित्कृष्णांबरा ततः; D4 रक्तकृष्णांबराननाः; D11 काश्चित्कृष्णांबरांगनाः. —ᶜ) D10.11 काचित् (for काश्चित्). D10 कनक- (for काञ्चन-). Ñ1 -सर्वांग्यः; D3 -वर्णांगाः (for -वर्णाङ्ग्यः).

32 Ñ2 V B D6 om. 32 (cf. v.l. 31). —ᵇ) Ś1 D1–3.10.11 M1 च; Ñ1 स-; D4 om. (for वि-). —ᵈ) G3 damaged for मासीद्य. Ñ1 च; D2.10 तत् (for हि). Ś1 रूपमासीत्तथैव तत्; D1.11 रूपमासां तथैव तत्; D3 रूपमासीद्यथा तथा; D4 रूपं तासां तथैव तत्. ❀ Cg : तासामिति। चकारोऽप्यर्थकः। निद्रापरवशानामपि तासां रूपं प्रसुप्तानां पद्मिनीनां रूपमिव रम्यमासीदित्यर्थः. ❀

एवं सर्वमशेषेण रावणान्तःपुरं कपिः ।
ददर्श सुमहातेजा न ददर्श च जानकीम् ॥ ३३

निरीक्षमाणश्च ततस्ताः स्त्रियः स महाकपिः ।
जगाम महतीं चिन्तां धर्मसाध्वसशङ्कितः ॥ ३४

परदारावरोधस्य प्रसुप्तस्य निरीक्षणम् ।
इदं खलु ममात्यर्थं धर्मलोपं करिष्यति ॥ ३५

न हि मे परदाराणां दृष्टिर्विषयवर्तिनी ।
अयं चात्र मया दृष्टः परदारपरिग्रहः ॥ ३६

तस्य प्रादुरभूच्चिन्ता पुनरन्या मनस्विनः ।
निश्चितैकान्तचित्तस्य कार्यनिश्चयदर्शिनी ॥ ३७

कामं दृष्टा मया सर्वा विश्वस्ता रावणस्त्रियः ।
न तु मे मनसः किंचिद्वैकृत्यमुपपद्यते ॥ ३८

मनो हि हेतुः सर्वेषामिन्द्रियाणां प्रवर्तने ।
शुभाशुभास्ववस्थासु तच्च मे सुव्यवस्थितम् ॥ ३९

G. 5. 14. 60
B. 5. 11. 42
L. 5. 6. 44

33 $D_6$ reads $33^{ab}$ after 30. —$^{a}$) $T_2$ अशेषं वै; $G_1$ विशेषेण ( for अशेषेण ). —$^{b}$) $D_{1.4}$ राक्षस- ( for रावण- ).. $V_1$ $T_2$ -[अं]तःपुरे ( for °रं ). —$D_6$ om. $33^{c}$–34. —$^{c}$) Ś$_1$ $D_{2.7.9-11}$ ददर्श स; $\tilde{N}_1$ $D_3$ स ददर्श; $\tilde{N}_2$ V B अन्वियेष; $G_3$ $M_1$ ददर्श च ( for ददर्श सु- ). $B_3$ $D_{5.11}$ -तेजा; $D_8$ -वीरो ( for -तेजा ). —$^{d}$) Ś$_1$ $D_{10}$ मैथिलीं न ददर्श च; $\tilde{N}$ V B न चा( $B_4$ वा )पश्यत्स( $\tilde{N}_2$ $V_1$ $B_4$ °त ) जानकीं; $G_1$ जानकीं न ददर्श ह. —After 33, $D_{1.3.4}$ ins.:

308* स च तां चिन्तयामास कपिर्बुद्धिमतां वरः ।

—Thereafter, all the above MSS. cont. (om. [hapl.] l. 2-3), while Ś$_1$ $\tilde{N}_1$ $V_2$ $D_{2.10.11}$ ins. after 33, whereas $\tilde{N}_2$ $V_1$ B $D_6$ ins. l. 2 and 4 after 25:

309* फलानि चावशेषाणि माल्यानि विविधानि च ।
मृदितान्यपविद्धानि गन्धवन्ति ददर्श सः ।
बहूंश्च विविधान्भक्ष्यान्फलानि विविधानि च ।
स्रजश्च विविधाश्चित्राः प्रकीर्णाश्च ततस्ततः ।

[Ś$_1$ $D_{10}$ om. l. 1–2. —(l. 1) $V_2$ स- ( for च ). $D_2$ [अ]र्ध- ( for [अ]व- ). —(l. 2) $\tilde{N}_1$ $V_2$ [अ]परिविद्धानि ( hypm. ) ( for [अ]पवि° ). $\tilde{N}_2$ $V_1$ B $D_6$ तथैव च ( for ददर्श सः ). —(l. 3) $V_2$ सुबहून् ( for बहूंश्च ). —After l. 3, $\tilde{N}_1$ ins.:

309(A)* ** नि गन्धवन्तीनि वसन्ति च म *** ।

—(l. 4) $B_3$ विप्रकीर्णाश्च ( for विविधाश्चित्राः ). $D_3$ प्रतिकीर्णास् ; $D_4$ प्रविकीर्णास् ( for प्रकीर्णाश्च ). $\tilde{N}_2$ $V_1$ $B_{1.2.4}$ $D_6$ विप्रकीर्णा ददर्श सः( $B_4$ ह ); $B_3$ विविधाः प्रददर्श ह ( for the post. half ).]

34 $D_6$ om. 34 ( cf. v.l. 33 ). $\tilde{N}_2$ $V_1$ B om. $34^{ab}$. —$^{ab}$) $D_{2.3.5.7.8}$ निरीक्ष्यमाणश्. $G_1$ तु ( for च ). $T_3$ $M_3$ तदा ( for ततस् ). $V_2$ निरीक्ष्यमाणस्ताः सर्वाः ( for $^{a}$ ). $V_2$ $D_{11}$ स्त्रियश्च ( for ताः स्त्रियः ). $D_1$ सु-; $D_2$ $T_{1.3}$ च ( for स ). $D_7$ ताः स्त्रियः शुभदर्शनाः( शुभदर्शनाः [in marg.] ) ( for $^{b}$ ). $\tilde{N}_1$ समंतात्तु निरीक्षन्वै वरनार्यो महाकपिः. —$D_4$ om. $34^{cd}$. —$^{c}$) $D_{5.7.9}$ $G_{1.2}$ $M_2$ शंकां ( for चिन्तां ). $V_1$ B जगामाथ ततश्चिंतां. —$^{d}$) $D_3$ अथ ( for धर्म- ). Ś$_1$ $D_{10}$ -विध्वंस-; $\tilde{N}_2$ $V_1$ $B_{1.2.4}$ -संकर-; Cm.g.k.t as in text ( for -साध्वस- ). $B_3$ हनूमान्मारुतात्मजः. —After 34, Ś$_1$ $\tilde{N}_1$ $V_2$ $D_{1-3.10.11}$ ins.; while $D_4$ subst. for $34^{ab}$:

310* स बुद्ध्या चिन्तयामास कपिर्बुद्धिमतां वरः ।

[ Ś$_1$ $D_2$ स्व-; $D_{10}$ सु- (for स). $\tilde{N}_1$ मतिमतां (for बुद्धिमतां). ]

35 $D_4$ repeats $35^{ab}$( var. ) after $36^{ab}$. —$^{a}$) $D_3$ परराजा- ( for परदारा- ). $D_2$ -[अ]वरुद्धस्य ( for -[अ]वरोधस्य ). —$^{b}$) B $D_{2.6}$ सु( $B_2$ गु [*sup. lin.*] )प्तस्य च ( for प्रसुप्तस्य ). —After $35^{ab}$, $\tilde{N}_1$ ins.:

311* तस्य राक्षसराजस्य रावणस्य दुरात्मनः ।

—$^{d}$) $\tilde{N}_2$ $V_1$ B -लोपो; $V_2$ -लोपि; $D_6$ -लोपे ( for -लोपं ). $\tilde{N}_2$ V B $D_6$ भविष्यति ( for करि° ).

36 $^{a}$) $V_2$ $M_1$ -दारेषु; Cg.k.t as in text ( for -दाराणां ). —$^{b}$) $\tilde{N}_2$ V $B_{1-3}$ $D_6$ बुद्धिर् ( for दृष्टिर् ). $B_4$ बुद्धिर्विषमवर्तिनां. —After $36^{ab}$, $D_4$ repeats $35^{ab}$ (var.). —$^{c}$) $\tilde{N}_1$ $V_2$ $D_{1.2.4.10.11}$ अद्य; $D_3$ $G_2$ चाद्य ( for चात्र ). Ś$_1$ अथ सोद्य मया दृष्टः; $T_2$ अयं चात्र महादृष्टः. —$^{d}$) $V_2$ $D_{1.4}$ -दारा- ( sic ) ( for -दार- ).

37 Ś$_1$ $D_{10}$ om. 37 – $38^{b}$. —$^{ab}$) $D_{1.4}$ स्वयमेव; $D_{2.3.11}$ पुनरेव ( for पुनरन्या ). $\tilde{N}_2$ V $B_{1-3}$ $D_6$ पुनरेव महा( $B_3$ °ममा )त्मनः ( for $^{b}$ ). $B_4$ तस्य चापि महाचिंता बभूव सुमहात्मनः. —$^{c}$) $D_{1.4.11}$ निष्ठितैकस्व( $D_{11}$ °कांत )-; $D_2$ निष्ठा त्वेकांत-; $D_3$ तयानैकांत-. —$^{d}$) $B_2$ -निर्णय- ( for -निश्चय- ). $\tilde{N}$ V B $D_{1-4.6.11}$ -दर्शिनः ( for -दर्शिनी ). —After 37, $\tilde{N}_1$ ins.:

312* हनूमतोऽतिवीरस्य विदितस्य महात्मनः ।

38 Ś$_1$ $D_{10}$ om. $38^{ab}$ (cf. v.l. 37). $D_5$ transp. 38 and 39. —$^{a}$) $B_{2.4}$ $D_{5.9.11}$ दृष्ट्वा ( for दृष्टा ). —$^{b}$) $\tilde{N}_1$ $D_{1.4}$ विवस्त्रा; $\tilde{N}_2$ $V_1$ $B_{1-3}$ $D_6$ विस्तराद्; $B_4$ विविधा ( for विश्वस्ता ). $V_2$ $D_{2.3.11}$ विवस्त्रा( $V_2$ °विधा )भरणाः ( $V_2$ °ण ) स्त्रियः. —$^{c}$) $\tilde{N}_2$ V $B_{1.3.4}$ $D_{3.6.11}$ च; $T_{1.3}$ $G_3$ $M_3$ हि ( for तु ). $\tilde{N}_2$ $D_{7.9}$ $T_2$ मनसा ( for °सः ). —$^{d}$) Ś$_1$ $\tilde{N}_2$ $V_1$ B $D_{2.6.10}$ वैरूप्यम् ( for वैकृत्यम् ). Ś$_1$ $B_2$ $D_{2.10}$ अपि जायते; $\tilde{N}_1$ $V_2$ $D_{1.3.4.11}$ °जायते; $B_3$ °लभ्यते; $B_4$ °गच्छति ( for उपपद्यते ).

39 $D_5$ transp. 38 and 39. —$^{d}$) Ś$_1$ $D_{10}$ हि ( for च ). $B_3$ तन्मनस्तु व्यवस्थितं; $D_{2.8}$ तच्च मे शुच्यवस्थितं.

G. 5. 14. 61
B. 5. 11. 43
L. 5. 6. 45

नान्यत्र हि मया शक्या वैदेही परिमार्गितुम् ।
स्त्रियो हि स्त्रीषु दृश्यन्ते सदा संपरिमार्गणे ॥ ४०
यस्य सत्त्वस्य या योनिस्तस्यां तत्परिमार्ग्यते ।
न शक्यं प्रमदा नष्टा मृगीषु परिमार्गितुम् ॥ ४१
तदिदं मार्गितं तावच्छुद्धेन मनसा मया ।
रावणान्तःपुरं सर्वं दृश्यते न च जानकी ॥ ४२
देवगन्धर्वकन्याश्च नागकन्याश्च वीर्यवान् ।
अवेक्षमाणो हनुमान्नैवापश्यत जानकीम् ॥ ४३
तामपश्यन्कपिस्तत्र पश्यंश्चान्या वरस्त्रियः ।
अपक्रम्य तदा वीरः प्रध्यातुमुपचक्रमे ॥ ४४

इति श्रीरामायणे सुन्दरकाण्डे नवमः सर्गः ॥ ९ ॥

---

40 Ś1 D10 om. 40–41. —a) Ñ2 B D6 चान्यत्र (for [अ]न्यत्र हि). —b) D8 मैथिली (for वैदेही). —D11 om. (hapl.) 40c–41. B1 reads 40c–41 in margin. —d) B3 सदसत्-; D1.4 सर्वदा; D2 सदैव; M1 स्त्रीणां सं-; Cg.t as in text (for सदा सं-).

41 Ś1 D10.11 om. 41. B1 reads 41 in marg. (for all, cf. v.l. 40). —a) B2 बद्धस्य (for सत्त्वस्य). B4 यस्य यस्यां मनो बुद्धिस. —b) D2 स; G1 तु (for तत्). Ñ1 V2 ([marg.] also as in V1) D4.5.9 G1 Ck.t -मार्गते; Ñ2 V1 B2.3 D3.6.8 G2 -मृग्यते; B1 -तुष्यते; B4 -दृश्यते (for -मार्ग्यते). —c) Ñ V B D1.2.4.6 T2 G3 M3 शक्या; Ck.t as in text (for शक्यं).

42 a) V2 D11 M1 मार्गितुं (for °तं). V2 सम्यक्; G2 यावच् (for तावच्). —b) D4 (after corr. as in text).8 बुद्धेन (for शुद्धेन). Ñ2 V1 B D6 विशुद्धेनांतरात्मना. —c) V2 सम्यक्; B2 तावद् (for सर्वं). D8 [अ]त्र; T3 हि; G2 M1 तु (for च). D3 नात्र दृष्टा च मैथिली.

43 B3 D6 om. 43–44. D10 (hapl.?) om. 43. Ñ1 illeg. from गन्ध in a up to गक in b. —b) Ñ1 च सर्वशः; Ñ2 V B1.2.4 तथैव च (for च वीर्यवान्). —c) T2 अन्वीक्षमाणो (for अवे°). Ñ2 V B1.2.4 यक्षराक्षसकन्याश्च. —d) Ś1 V2 D1–4.11 च (for [ए]व). D1.3.4 G2.3 पश्यति; Cg as in text (for [अ]पश्यत). Ñ2 V1 B1.2.4 दृश्यते न च (Ñ2 B2 तु) जानकी. ❀ Cg : अपश्यत अपश्यत्. ❀ —After 43, Ñ2 ins. l. 9–12 of 313*.

44 B3 D6 om. 44 (cf. v.l. 43). Ñ2 V1 B1.2.4 om. 44. —a) Ś1 D10 तामपश्यन्कचित्तत्र. —b) Ś1 D10 अपि; V2 D1.3.4.11 चापि; D2 चाथ (for चान्या). Ñ1 D11 पराः; V2 D1.3.4 [अ]पराः; D2.10 पर- (for वर-). —c) D9 अवक्रम्य; G1 Ck अपक्रांतस्; Ct as in text (for अपक्रम्य). Ś1 Ñ1 V2 D1–4.10.11 ततो दीनः (for तदा वीरः). —d) Ś1 Ñ1 D1 संधातुम्; V2 D2–4.10 संध्यातुम्; D5.7–9 M1.2 प्रस्थातुम्; D11 संध्यायाम् (for प्रध्यातुम्). —After 44, Ś1 Ñ1 V2 D1–4.10.11 ins.; while Ñ2 ins. only l. 9–12 after 43:

313* भोज्यैः स पौरोगवशास्त्रदृष्टैः
पानैरुदारैश्च विरम्यमाणम् ।
दृष्ट्वा प्रसुप्तं प्रमदाजनं तं
प्रहृष्टरोमा प्लवगो बभूव ।
तमुग्ररूपं स जलाम्बुदोपमं [5]
प्रहृष्टसुत्सिक्तमभीतचारिणम् ।
रहोगतं रावणमुग्रदर्शनं
ददर्श घोरं हनुमान्महाकपिः ।
स शर्वरीं प्रेक्ष्य बहुप्रयाता-
मपश्यमानो जनकात्मजां च । [10]
सुशीघ्रकारी मतिमान्विमाना-
दवारुरोह त्वरितोऽथ तस्मात् ।

[(l. 1) Ś1 भोगैश्च; D2.10 भोज्यैश्च (for भोज्यैः स). —(l. 2) Ś1 D10 महासुगंधैः; D11 विरम्यमाणः (for °णम्). —(l. 3) D3 स (for तं). —(l. 4) Ñ1 * * * (for प्रहृष्ट-). —(l. 6) Ñ1 अ * *; V2 D1.3.4.11 अतीव- (for अभीत-). —(l. 7) D4 -रूपं (for -दर्शनं). —(l. 8) D1.3 सुमहान्; D4 सु*** (for हनुमान्). —V2 om. l. 9–12. —(l. 10) Ñ1 *; D1.4 तां; D11 इव (for च). —Ñ1 om. l. 11–12. —(l. 11) Ś1 Ñ2 D1.4.11 स (for सु-). —(l. 12) D1.4 च (for ऽथ).]

—After 44, D5.7–9 S ins.:

314* स भूयस्तत्पुरं श्रीमान्मारुतिर्यत्नमास्थितः ।
आपानभूमिमुत्सृज्य तद्विचेतुं प्रचक्रमे ।

[(l. 1) D5 G3 सत्वरः (G3 °रं); D7–9 सर्वतः; T2 तत्परः; G1 M1.2 Cm तत्परं; M3 Cg तु परं (for तत्पुरं). —(l. 2) D8 पानभूमिं समुत्सृज्य (for the prior half). D7.9 T2 G1 M1 तां विचेतुं; D8 विचेतुं च (for तद्विचेतुं). D9 उपचक्रमे (hypm.) (for प्रचक्रमे). M2 विचेतुमुपचक्रमे (for the post. half).]

Colophon. —Ñ2 V1 B D6 reads colophon after 5.10.5. —*Sarga name*: Ś1 रावणपानभूमिवर्णनं; Ñ1 रावणशयनपानभूमिवर्णनं; Ñ2 D6 सीतान्वेषण (D6 °णे) हनुमच्चिंता; V2 D1.2.4.11 पानभूमिवर्णनः (V2 D2 °नं); D3 प्रमदादर्शनः; D10 रावणभूमिवर्णनं. —*Sarga no.* (figures, words or both): Ś1 Ñ1 D1.2.4.10.11 om.; Ñ2 V1 B1.2.4 D6 15; V2 5; B3 13; D3 14; D5.7–9 S 11. —After Colophon, D2 concludes with श्रीकृष्णः; while G concludes with श्रीरामाय नमः.

# १०

स तस्य मध्ये भवनस्य वानरो
लतागृहांश्चित्रगृहान्निशागृहान् ।
जगाम सीतां प्रति दर्शनोत्सुको
न चैव तां पश्यति चारुदर्शनाम् ॥ १

स चिन्तयामास ततो महाकपिः
प्रियामपश्यन्रघुनन्दनस्य ताम् ।
ध्रुवं नु सीता म्रियते यथा न मे
विचिन्वतो दर्शनमेति मैथिली ॥ २

सा राक्षसानां प्रवरेण बाला
स्वशीलसंरक्षणतत्परा सती ।
अनेन नूनं प्रतिदुष्टकर्मणा
हता भवेदार्यपथे परे स्थिता ॥ ३

विरूपरूपा विकृता विवर्चसो
महानना दीर्घविरूपदर्शनाः ।
समीक्ष्य सा राक्षसराजयोषितो
भयाद्विनष्टा जनकेश्वरात्मजा ॥ ४

सीतामदृष्ट्वा ह्यनवाप्य पौरुषं
विहृत्य कालं सह वानरैश्चिरम् ।
न मेऽस्ति सुग्रीवसमीपगा गतिः
सुतीक्ष्णदण्डो बलवांश्च वानरः ॥ ५

G. 5. 14. 69
B. 5. 12. 5
L. 5. 7. 5

## 10

D10 begins with ॐ; M2 with श्रीरामाय नमः.
1 Cr missing for st. 1–4b ( cf. 5.9.8). —a) Ñ2 V B D6 ततः स ( for स तस्य ). Ś1 D1.2.4.10.11 वीरो ( for मध्ये ). Ñ2 V B D6 T1.3 M3 मारुतिर् ; D7–9 G1 संस्थितो ( for वानरो ). Ñ1 ततः स वीरो भवनानि वानरो. —b) B2 निशम्य; D6 दिशो गृहान् ; D10 निशागृहं; T1 G2 M2 दिवागृहान् ; T3 महा°; G1 Ck लता°; Cm.g.t as in text ( for निशागृहान् ). B1 लतागृहं चित्रगृहं तथैव च; D11 लतागृहांतं निशया जगाम. —After 1ab, Ñ1 (partly illeg.) ins. :

315* स्वशीघ्र ** मतिमान्विमा*
पुरा पुरो ** रित * तस्मत ।

—c) V1 B1.2 विचित्य; B3.4 D6 विचिंत्य; D11 om. ( for जगाम ). D8 दर्शनोत्सुकां. —d) D3 [अ]पि ( for [ए]व ). Ñ2 V1 B D6 ऐक्षत ( for पश्यति ). G1 चारुदर्शिनीं.

2 a) V2 D11 om. ; D9 सं- ( for स ). Ś1 Ñ1 V2 D2.10.11 महाकपिस्तदा; V1 B महाकपिः प्रियाम् ( for ततो महाकपिः ). —b) Ś1 Ñ V2 D2.3.6.8.10.11 T2.3 रघुनंदनस्य ( for °नस्य ताम् ). V1 B अ( B3 स )वी( B2 °वे )क्ष्यमाणो रघुनंदनस्य( B3 °नस्य तां ). ❁ Cv: रघुनन्दनस्य तामिति पाठः. ❁ —c) Ś1 Ñ V B D1–4.6.7.9–11 T1 G1 Ct न; D8 G2.3 M1 तु; T3 M3 हि ( for नु ). D7.9.11 T1 Ct ध्रियते; T3 ह्रियते; Cv.m.g.k as in text ( for म्रियते ). Ś1 D10 प्रण( D10 °य )ता तथा मे; Ñ2 B1.3 D2.6 ध्रियते य( D2 त )था मे; V1 B2.4 ध्रियते य( V1 त )था हि मे; V2 म्रियते ****; D1.3.4 ध्रि( D3 म्रि )यते य( D4 °** )तो न मे; D8 म्रियते तथा न मे. ❁ Ct: "ध्रुवं नु सीता म्रियते" इति क्वचित्पाठः। तत्र हेतुः यथेति। यत इत्यर्थः. ❁ —d) V2 या चिन्वतो ( for विचिन्वतो ). Ñ2 B D6 नैव( B2 °वं ); V1 नैव सा ( for मैथिली ).

3 a) D5 प्रबलेन ( for °वरेण ). V1 चापलात् ; B1.3 चाबला; T1.3 G1 M3 जानकी ( for बाला ). B4 सा वीक्ष्यमाणा प्रवरेण चापलात् . —b) V1 B2 D2.5 सु( D5 सं )शील- ; B4 स्वलीन- ( sic ) ( for स्वशील- ). —c) B1 ( after corr. m. as in text ) मूलं ( for नूनं ). T1 G2 बत; T2.3 परि- ( for प्रति- ). Ñ2 V B D6 -निंद्य- ( for -दुष्ट- ). Ś1 Ñ1 D1–4.10.11 अनेन( Ś1 °द्यापि ) सद्यः( D2 शापात् ; D10 साद्य ) प्रतिरौद्र( D4 °रोध )कर्मणा. —d) B3 तदा ( for हता ). B4 दीर्घपथे ( for आर्य° ). Ś1 D10 वरा; Ñ1 D2.11 वरे; Ñ2 V B D3.6 व्यव- ; D1 T1.2 परि- ( for परे ).

4 a) B1.2.4 सुकृताः सु- ( for विकृता वि- ). B3 विरूपरूपाकृतयः सुवर्चसो. —T1 illeg. for 4cd. —c) Ś1 D2.10 वै; Ñ1 V2 D1.3.4.11 वा; Ñ2 V1 B3 D7.9 T1 ता ( for सा ). T3 समीक्ष्य सा रावणयोषितस्तदा. —d) Ñ1 [ऽ]भवद् ( for भयाद् ). Ś1 Ñ1 V2 D1–4.10.11 विपन्ना ( for विनष्टा ). Ñ2 V1 B D6 भयाद्विपन्ना जनकात्मजाथवा.

5 a) Ś1 D1.3.4.10 [अ]पि ( for हि ). D2 [अ]प्यनवास- ; D11 न च वाप्य ( for ह्यनवाप्य ). —b) V2 B2 विकृत्य ( for °हृत्य ). V2 B4 बांधवैश्चिरं; B2.3 राक्षसैश्चिरं( B2 °राव ) ( for वानरैश्चिरम् ). —c) T2 हि ( for ऽस्ति ). V1 B1.2.4 D2.6.11 T2 G3 M2 -समीपजा गतिः . —d) D3 स ( for सु- ). D1 -दंडो हि ( for -दण्डो ). Ś1 Ñ V B D1–4.6.10.11 हि ( V2 स ) वानरः ; G1 महाकपिः ( for च वानरः ). —After 5, Ñ2 V1 B D6 read colophon of 5.9.

G. 5. 15. 1
B. 5. 12. 6
L. 5. 7. 6

दृष्टमन्तःपुरं सर्वं दृष्टा रावणयोषितः ।
न सीता दृश्यते साध्वी वृथा जातो मम श्रमः ॥ ६
किं नु मां वानराः सर्वे गतं वक्ष्यन्ति संगताः ।
गत्वा तत्र त्वया वीर किं कृतं तद्वदस्व नः ॥ ७
अदृष्ट्वा किं प्रवक्ष्यामि तामहं जनकात्मजाम् ।
ध्रुवं प्रायमुपेष्यन्ति कालस्य व्यतिवर्तने ॥ ८
किं वा वक्ष्यति वृद्धश्च जाम्बवानङ्गदश्च सः ।
गतं पारं समुद्रस्य वानराश्च समागताः ॥ ९
अनिर्वेदः श्रियो मूलमनिर्वेदः परं सुखम् ।
भूयस्तावद्विचेष्यामि न यत्र विचयः कृतः ॥ १०
अनिर्वेदो हि सततं सर्वार्थेषु प्रवर्तकः ।
करोति सफलं जन्तोः कर्म यच्च करोति सः ॥ ११
तस्मादनिर्वेदकृतं यत्नं चेष्टेऽहमुत्तमम् ।
अदृष्टांश्च विचेष्यामि देशान्रावणपालितान् ॥ १२

---

6 $^{b}$) Ś1 Ñ1 D2.10.11 सर्वा; D1.5.8.9 दृष्ट्वा (sic) (for दृष्टा). Ś1 Ñ D राक्षस- (for रावण-). D3 -योषिताः. —After 6$^{ab}$, Ñ1 ins.:

316* न च सीता महासाध्वी दृष्टा **** **।

—$^{d}$) D4 (after corr. *sup. lin.*) व्यर्थ- (for वृथा). Ś1 Ñ1 D1.2.4.10.11 परिश्रमः (for मम श्रमः).

7 $^{a}$) Ñ2 V1 न; V2 B1.3.4 D1–4.6.10.11 तु (for नु). —$^{b}$) D1 द्रक्ष्यंति; Ck.t as in text (for व°). Ś1 Ñ1 V2 D1.2.4.10.11 मानिनः; Ñ2 V1 B शुष्मिणः; D3 मामिताः; D6 पुष्पिणः (for संगताः). —$^{c}$) B1 ब्रुवन् (for तत्र). —$^{d}$) Ś1 Ñ1 V2 D1–4.10.11 किं कृतं पवनात्मज; Ñ2 V1 B2.3 D6 कृतं किं तद् (Ñ2 न; D6 तु) व्यवस्थितं; B1.4 कृतं किं तद्विवक्षितं. ❀ Cg: किं न्विति सामान्येन निर्वेदोक्तिः। विशेषतश्चाह—गत्वेति। इत्युक्त इति शेषः। वदस्व न इत्युक्तः किं प्रवक्ष्यामि। यद्वा किं त्विति पाठः। पूर्ववदर्धत्रयमेकं वाक्यम्। किं त्विति पूर्वस्माद्विशेषोक्तिः। मां वानराः वदस्व न इति वक्ष्यन्ति तदादृष्ट्वा किं प्रवक्ष्यामीति योजना. ❀ —After 7, Ñ1 ins.:

317* तेषु वानरमुख्येषु प्रस्थितेषु यशस्विषु।

8 $^{a}$) M1 अपश्यन् (for अदृष्ट्वा). B2 नु (for प्र-). —$^{b}$) V1 B4 तत्र (for ताम्). —After 8$^{ab}$, V2 reads 9 for the first time, repeating it in its proper place. —$^{c}$) D1.4 नूनं (for ध्रुवं). Ś1 D10 प्रासम्; Ñ2 D6 कालम्; V2 प्रियाम् (sic); D11 प्राप्यम्; Cg.t as in text (for प्रायम्). Ś1 Ñ D6.10.11 उ (Ñ2 D6 अ) पेक्षंते (D11 °ति); D1.4 T1.3 G1 उपेष्यामि; D3 उपेक्ष्यामि; D5 M3 उपैष्यंति; D7.9 T2 M2 उपासिष्ये (for उपेष्यन्ति). —$^{d}$) D6 प्रति- (for व्यति-). Ñ1 V2 -वर्तनात्; D1 -वर्तिनः; Cg.t as in text (for -वर्तने). Ś1 D2.10 कालश्च परिवर्तते; Ñ2 कालस्य प्रतिवर्णने; D4 कालस्य वशवर्तिनः; G1 कालश्चाप्यतिवर्तते. —For 8$^{cd}$, V1 B subst. and read after 9; while Ñ2 D6 ins. after 9:

318* पुनः प्रायमुपैष्यन्ति नूनं हि गतिरीदृशी।

[ Ñ2 V1 उपेक्ष्यंति; B1 (m. also).4 उपेष्यंति; B3 पतिष्यामि (for उपैष्यन्ति). B1 पुनः प्रायासमप्यस्ति (corrupt) (for the prior half). D6 om. हि. ]

9 V2 reads 9 after 8$^{ab}$, repeating it here. —$^{a}$) Ś1 Ñ1 D1–4.10.11 T2 G1 M1 Cr मां; Ct as in text (for वा). Ś1 Ñ1 D1.4.10.11 तु (for च). Ñ2 V B D6 किं नु (V2 [first time] B1.4 D6 तु) वक्ष्यत्यसौ वृद्धो; V2 (second time) किं मां वक्ष्यति सुग्रीवो. —$^{b}$) Ś1 D1.4 जांबुवान्. Ś1 Ñ1 D2.10.11 तथा; Ñ2 D5.6 च मां; V2 (second time) तदा (for च सः). —$^{c}$) D10 गंतुं. —$^{d}$) Ñ1 illeg. after वा up to अनिर्वेदः in 10$^{b}$. Ś1 ये; D2.10 वा (for च). V1.2 (first time) B D6 लंघनं व्यर्थकं (V2 °तां) मम. —After 9, Ñ2 V1 B D6 read 318*.

10 Ñ1 illeg. up to अनिर्वेदः in $^{b}$ (cf. v.l. 9). D1.4 T2 transp. $^{ab}$ and $^{cd}$. —$^{b}$) D2 सनिर्वेदः (sic). B4 सदा (for परं). D11 निर्वेदं परमं सुखं. —T1.3 G1.3 M3 om. 10$^{cd}$. Ñ2 V2 B1–3 D6 read 10$^{cd}$ and 14$^{cd}$, V1 B4 G2 read only 10$^{cd}$ after 12$^{ab}$. —$^{c}$) D3 पुनस् (for भूयस्). Ś1 D10 तां च; D1.4.7–9 तत्र (for तावद्).

11 $^{a}$) Ñ1 om. सततं. —$^{b}$) Ś1 D3.10 निवर्तकः; Ñ2 V2 B2.4 D1.4 [अ]नुवर्तते (D1.4 °कः); V1 B1.3 प्रवर्तते; D2.6.11 [अ]निवर्तकः (D6 नं°) (for प्रवर्तकः). —$^{c}$) B2 G1 सकलं; M1 सततं; Cg.t as in text (for सफलं). D1.4 जन्म; D11 तस्य; G1 M1 जंतुः (for जन्तोः). —$^{d}$) T2 यश्च (for यच्च). D8 M1.3 तत् (for च). T3 G2 च (for सः). Ś1 D2.10 जीवितं जीवितेष्वपि (Ś1 [with hiatus] °ते अपि); Ñ V B1.3.4 D1.4.6 जीवितं ह्यस्य (Ñ1 ** [illeg.]) जेष्वपि (B3 °पु च); B2 जीवितं मनु (m. also °तमंड) जेष्वपि; D3 जीवितस्वं त्यजेदपि; D11 जीवितं त्यजतेष्वपि (corrupt).

12 Ñ1 illeg. for 12 except तस्मादनि. —$^{a}$) Ś1 Ñ2 V B D1–4.6.7.9–11 G1.3 Ck.t -करं; G2 -गातं; Cr.m.g as in text (for -कृतं). —$^{b}$) D3 यत्र; T1.3 यत्तत्; G2 युक्तं; Cg.t as in text (for यत्नं). Ś1 D10 चेच्छे (Ś1 °ष्टे) यम्; D1.4 इच्छेयम् (for चेष्टेऽहम्). D4 उत्तरं. Ñ2 V1 B यत्नं कर्तास्म्यनुत्तमं; D6 यत्नं कर्तुमनुत्तमं; D11 यत्नं चेष्टे हनूमतं (corrupt); G1.3 यत्नं कुर्यादनुत्तमं. —After 12$^{ab}$, Ñ2 V B D6 G1.3 (V1 B4 G2 only 10$^{cd}$; G1 only 14$^{cd}$) read 10$^{cd}$ and 14$^{cd}$; D3 reads 14$^{ab}$. Ñ2 V B D6 om. 12$^{cd}$. —$^{c}$) Ś1 D1.3.4.10.11 अदृष्टां

आपानशाला विचितास्तथा पुष्पगृहाणि च ।
चित्रशालाश्च विचिता भूयः क्रीडागृहाणि च ॥ १३

निष्कुटान्तररथ्याश्च विमानानि च सर्वशः ।
इति संचिन्त्य भूयोऽपि विचेतुमुपचक्रमे ॥ १४

भूमीगृहांश्चैत्यगृहान्गृहातिगृहकानपि ।
उत्पतन्निपतंश्चापि तिष्ठन्गच्छन्पुनः क्वचित् ॥ १५

अपावृण्वंश्च द्वाराणि कपाटान्यवघट्टयन् ।
प्रविशन्निष्पतंश्चापि प्रपतन्नुत्पतन्नपि ।
सर्वमप्यवकाशं स विचचार महाकपिः ॥ १६

चतुरङ्गुलमात्रोऽपि नावकाशः स विद्यते ।
रावणान्तःपुरे तस्मिन्यं कपिर्न जगाम सः ॥ १७

प्राकारान्तररथ्याश्च वेदिकाश्चैत्यसंश्रयाः ।
श्वभ्राश्च पुष्करिण्यश्च सर्वं तेनावलोकितम् ॥ १८

G. 5. 15. 13
B. 5. 12. 18
L. 5. 7. 18

---

हि; D2 °ष्ट्वा तु; G1 भूयस्तांस्तान्; M3 भूयस्तावद् (for अदृष्टांश्च). —$^{d}$) Ś1 D1.2.4.10.11 दिशं (D1.4 पुरीं) रावण (D11 वरुण)पालितां. —After 12, T2 reads $14^{cd}$.

13 G1 om. $13–14^{b}$. —$^{a}$) D11 आपणाश्च (subm.) (for आपानशाला). Ś1 Ñ2 V1 B D2.6.10 विविधास् (for विचितास्). —V1 om. (hapl.) $13^{bc}$. —$^{b}$) D1.4 तस्य (for तथा). —Ś1 D10 om. $13^{c}–15^{b}$. Ñ1 D1–4.11 om. (hapl.) $13^{cd}$. —$^{c}$) Ñ2 V2 B D6 T2 M1 विविधा (for विचिता). —$^{d}$) V2 B3 भूतक्रीडा-; B1 मालाकार- (for भूयः क्रीडा-). V2 [अ]पि (for च). ❀ Cv: भूयः क्रीडागृहाणि चेत्यत्र चिन्तासमाप्तिसूचक इति शब्दो द्रष्टव्यः. ❀

14 Ś1 D10 om. 14; G1 om. $14^{ab}$ (for both, cf. v.l. 13). Ñ1 D1.3.4.11 transp. $14^{ab}$ and $15^{ab}$. D2 reads $14^{ab}$ after $12^{ab}$. —$^{a}$) B2 -कक्षांश्च; D11 -रथ्यानि M1 -वीथ्यश्च; Cv.r.m.g.t as in text (for -रथ्याश्च). V2 निष्कूटांतरमासाद्य. —D6 om. $14^{b}$. —$^{b}$) M2 सर्वतः (for °शः). —V1 om. $14^{c}–15^{b}$. Ñ1 D1–4.11 om. $14^{cd}$. Ñ2 V2 B1–3 D6 G1 (only $14^{cd}$) read $10^{cd}$ and $14^{cd}$ after $12^{ab}$. T2 reads $14^{cd}$ after 12. —$^{cd}$) T2 बबुधे; G1 हनुमान् (for भूयोऽपि). Ñ2 V2 B D6 इति कृत्वा मतिं तत्र हनुमान्मारुतात्मजः.

15 Ś1 V1 D10 om. $15^{ab}$ (cf. v.l. 13 and 14). D6 om. $15–16^{e}$. Ñ2 B G1 om. $15^{ab}$. Ñ1 D1.3.4.11 transp. $14^{ab}$ and $15^{ab}$. —$^{a}$) V2 D1.4.5.8 भूमि (V2 निशा)गृहांश्; T2 भौमान्गृहांश्. D8 विल-; M1 चित्र- (for चैत्य-). D2.11 भूमीगृहाश्चैत्यगृहा. —Ñ1 illeg. for $^{b}$. —$^{b}$) D1.4 गृहाणि (for °ति-). D2.11 गृहाश्च (D11 °णि) गृहका अपि; D3 गृहाणि गृहकान्यपि; D8 तथा चैत्यगृहानपि; T1.3 G2 M1 गृहानतिगृहाणि च (G2 M1 °नपि); M2 गृहातिगृहकानि च. —$^{c}$) Ś1 D10 निष्पतंश्; D5 न्यप° (for निप°). D4 उत्पत्याभिपतंश्चापि. —$^{d}$) Ś1 D2.10 प्रवि- (for तिष्ठन्). D3 om. गच्छन्. Ś1 Ñ1 B4 D1–4.8.10.11 M3 पुनः (for क्वचित्). V2 गच्छंस्तिष्ठन्पुनः पुनः. ❀ Cv: गृहस्य दूरेणैकान्ते स्वैरविहारार्थं निर्मिता गृहा गृहातिगृहकाः ।; Cr.m.g as in Cv. ❀

16 D6 om. $16^{a–c}$ (cf. v.l. 15). —$^{a}$) Ś1 D10 आपानभूमि-; D3.11 अपावर्तंश्च; D8 अपावृतानि; G1.2 अपवृण्वंश्च (for °वृण्वंश्च). Ñ2 V1 B द्वा (V1 पु)राणि समुपा (B3 च समा)वृण्वन्. —$^{b}$) Ñ1 V2 कपाटान्; B2.4 G M1.3 कवाटानि (for कपा°). B2 [अ]पवाटयन्; D2 विवाट°; D5 [अ]वपाट°; D11 च पीड°; T G1 M2.3 Cr.g [अ]ववाट°; Ck.t as in text (for [अ]वघट्ट°). Ś1 D10 कवाटान्यवपा (D10 °पवा [meta.])टयन्; D1.4 कपाटानवघाटयन्. —Ś1 D10 om. $16^{cd}$. —$^{c}$) V2 निःसरंश्; D1.3.11 M3 निपतंश्; D3 T2 उत्पतंश्; D4 नियतं; Cm.g.t as in text (for निष्पतंश्). —$^{d}$) D2 न्यपतन्; T2 निष्पतन् (for उत्प°). D7–9 इव (for अपि). D1.4 निष्क्रामन्प्रविशन्पुनः; D3 निविशन्नापतन्नपि. —B1.3 om. $16^{ef}$. —$^{e}$) Ś1 Ñ1 V B4 D10.11 अल्पम्; D2 अन्यम्; D3 स्वल्पम् (for सर्वम्). D3 [अ]वकाशे. Ś1 Ñ1 V2 D1.5.10.11 च (for स). Ñ2 B2 अन्यानप्यवकाशांश्च. —$^{f}$) D11 स (for वि-). —After 16, B2 ins.:

319* त्वरमाणस्तथोद्विग्नो न दृष्ट्वा कुत्र जानकीम् ।

—Then B2 cont.; while Ñ2 V B1.3.4 (B1.3 after $16^{cd}$ owing to om.) D6 ins. after 16:

320* स कपिः शीघ्रसंचारी प्रभञ्जन इवापरः ।

[V2 पुनः (for कपिः). Ñ2 V2 B4 D6 -संचारः (for °री).]

17 $^{a}$) Ñ2 V1 B1.4 D6 -मात्रः सन्; V2 (also) -मात्रं तु; B2 -मात्रश्च; B3 -मात्रः स (for -मात्रोऽपि). —After $17^{a}$, Ñ2 V1 B D6 ins.:

321* परिबभ्राम वानरः ।
न हि यत्र गतिस्तस्य.

[(l. 2) B1 [आ]गतिस् (for गतिस्).]

—$^{b}$) Ś1 स; V2 तु; D1.4 [ऽ]त्र (for स). Ñ2 B1.2 D6 transp. न and स. V1 B3.4 सोवकाशो हि विद्य (B4 दृश्य)ते; T2 सावकाशो न विद्यते. —$^{d}$) D4.11 यः (for यं). D3 transp. यं and कपिर्. D4 [आ]जगाम (for ज°). Ś1 D10 वानरो निर्जगाम सः; Ñ1 ** स कपिकुंजरः (illeg.); Ñ2 V1 B D6 न किंचिन्न चचा (B4 °का)र सः; G1 न जगाम महाकपिः. ❀ Cr: यः कपिर्न जगाम स इति पाठः. ❀

18 $^{a}$) D2 -रथ्यांश्; D7–9 Ct -वीथ्यश्; Cv.r.m.g as in text (for -रथ्याश्). —$^{b}$) B3 प्रश्रयाः; Cv.r.m.g

G. 5. 15. 14
B. 5. 12. 19
L. 5. 7. 18

राक्षस्यो विविधाकारा विरूपा विकृतास्तथा ।
दृष्टा हनूमता तत्र न तु सा जनकात्मजा ॥ १९
रूपेणाप्रतिमा लोके वरा विद्याधरस्त्रियः ।
दृष्टा हनूमता तत्र न तु राघवनन्दिनी ॥ २०
नागकन्या वरारोहाः पूर्णचन्द्रनिभाननाः ।
दृष्टा हनूमता तत्र न तु सीता सुमध्यमा ॥ २१
प्रमथ्य राक्षसेन्द्रेण नागकन्या बलाद्धृताः ।
दृष्टा हनूमता तत्र न सा जनकनन्दिनी ॥ २२
सोऽपश्यंस्तां महाबाहुः पश्यंश्चान्या वरस्त्रियः ।
विषसाद महाबाहुर्हनूमान्मारुतात्मजः ॥ २३
उद्योगं वानरेन्द्राणां प्लवनं सागरस्य च ।
व्यर्थं वीक्ष्यानिलसुतश्चिन्तां पुनरुपागमत् ॥ २४
अवतीर्य विमानाच्च हनूमान्मारुतात्मजः ।
चिन्तामुपजगामाथ शोकोपहतचेतनः ॥ २५

इति श्रीरामायणे सुन्दरकाण्डे दशमः सर्गः ॥ १० ॥

as in text (for -संश्रयाः). D2 वैदिकांश्चैत्यसंश्रयान्; D3 वैदिकाश्चैव संश्रयाः. —D10 om. $18^{c}$–$20^{b}$. —$^{c}$) Ñ1 V2 D1.4.6.8 शुभ्राश्च; Ñ2 V1 B1.3.4 श्वभ्राणि; B2(*sup. lin.* also as in Ñ2) विभ्राणि; D3.6 शुभ्राणि; D11 शुभाश्च; G1 गुहाश्च; M3 दीर्घिकाः; Ct as in text (for श्वभ्राश्च). —$^{d}$) Ñ2 V1 B1–3 D6 सर्वा(B2 °म)स्तास्तेन वीक्षिताः; B4 सर्वास्तेन निरीक्षिताः; D1.3.4 सर्वं तेनै(D3 °ना)व लंघितं.

19 D10 om. 19 (cf. v.l. 18). —$^{a}$) Ñ2 D6 विविधास्तत्र; B3 विकृताकाराः (for विविधा°). —$^{b}$) Ñ2 V1 B1–3 D6 सुरूपा; B4 स्वरूपा(sic) (for वि°). V2 D1.4 G2 विकृताननाः. Ś1 Ñ1 स्वरूपा विविधाश्च(Ñ1 °कृताश्च) याः; D2.3.11 सु(D3 स)रूपा विविधा(D3 °कृता)श्च(D2 °श्र) याः. —B2 om. $19^{c}$–$20^{b}$. T1 reads *inf. lin.* $19^{c}$–21. —$^{c}$) B3 D1.4.11 दृष्ट्वा (sic) (for दृष्टा). —Ś1 T3 om. (hapl.) $19^{d}$–$22^{c}$. D2 om. (hapl.) $19^{d}$–$20^{c}$. —$^{d}$) Ñ1 न त्वेका; Ñ2 V D3.6.11 न त्वेव; B1 न ह्येव; B4 नात्रैव; D1.4 न दृष्टा (for न तु सा). B3 न सा दशरथस्नुषा; T2 न तु राघवनंदिनी; G2 न तु सीता सुमध्यमा.

20 D8.10 om. $20^{ab}$ (for D10, cf. v.l. 18). Ś1 T3 om. 20; D2 om. $20^{abc}$; B3 om. $20^{ab}$; T1 reads 20 *inf. lin.* (for all, cf. v.l. 19). G2 reads 20 twice. —$^{a}$) V2 चैव (for लोके). —$^{b}$) Ñ2 V1 B1.3.4 D6 श्रेष्ठा; D1.3.4 सिद्ध-; D7.9 M2 परा (for वरा). Ñ1 V2 D11 देवगंधर्वयोषितः; G1 विद्याधरवरस्त्रियः; G2 (first time) तथा यक्षवरांगनाः. —B2 reads $20^{cd}$ after $22^{ab}$. D8 transp. $20^{cd}$ and $21^{ab}$. —$^{c}$) V2 तेन (for तत्र). —T1 om. (hapl.) $20^{d}$–$21^{c}$. —$^{d}$) D5 -कामिनी (for -नन्दिनी). Ñ V B1.2.4 D1–4.6.10.11 न सा(D2 दृष्टा [hypm.]) दशरथस्नुषा; B3 T2 G2(second time) न सा जनकनंदिनी; T2 (also) न सा राघवसुंदरी; G2(first time) न तु सा जनकात्मजा.

21 Ś1 T3 om. 21 (cf. v.l. 19). T1 om. $21^{abc}$ (cf. v.l. 20). Ñ2 V1 B D6 om. 21. D8 transp. $20^{cd}$ and $21^{ab}$. —$^{b}$) D2 पूर्णाङ्ग; D9 पूर्णं (for पूर्ण-). —D3.8 om. $21^{cd}$. —T1 reads $21^{d}$ *inf. lin.* —$^{d}$) Ñ1 V2 D1.2.4.10.11 न सा जनकनंदि(D1.4.11 °द)नी; D7.9 न तु सा जनकात्मजा.

22 Ś1 T3 om. $22^{abc}$ (cf. v.l. 19). B2 transp. $^{ab}$ and $^{cd}$ ($22^{cd}$ read twice). T1 reads $22^{ab}$ *inf. lin.* —$^{b}$) Ñ V B1.2 D1–4.6.11 T1 M1 देव-; D10 G1 राज-; Cv.r.m.g.t as in text (for नाग-). Ñ2 हृता बलात्; V2 हृताश्च याः; D8 °स्कृताः (for बलाद्धृताः). B3.4 बलाद्बलवता हृता. ❀ Cv: प्रमथ्येत्यादि। प्रसह्य प्रत्यग्रबन्दीकृता नागकन्या उच्यन्ते। पूर्वश्लोकेऽन्यासां नागकन्यानामुपादानात्।; Cr: बलाद्धृता नागकन्या इत्यभिधानादत्र बन्दीकृतानां ग्रहणम्। पूर्वत्र तूढानां नागकन्यानाम्। अतो न पुनरुक्तिः।; so also Cm.g.t. ❀ —After $22^{ab}$, B2 reads $20^{cd}$. —$^{c}$) V2 तेन (for तत्र). —$^{d}$) Ñ1 B2(second time) D2.11 न सा दशरथस्नुषा; V2 D1.4 न त्वेव जनकात्मजा; T2 न सा राघवसुंदरी; G2 न तु सीता सुमध्यमा. —After 22, Ñ1 (partly illeg.) ins.:

322* प्रमदानां कुलं तत्र रतिजानिवधूतमम्।
दृष्टं सार*ते पुत्र*******सि।
इति चिन्ता**** ********।

23 $^{a}$) Ś1 Ñ2 V B D1.2.4.6.10 अपश्यंस्; G1 योपश्यंस. —$^{b}$) Ś1 B2 D10 अन्या; D2 त्वन्या (for चान्या). —After $23^{ab}$, M2 wrongly repeats $23^{c}$ and $23^{b}$. —$^{c}$) Ś1 Ñ1 V2 D1–4.10.11 महातेजा; Ñ2 V1 B1.2.4 D6 तदा तत्र; B3 कपिस्तत्र; M3 मुहुर्धीमान् (for महाबाहुर्). D8 G1 M1 विषादमगमद्धीमान् (M1 °द्वीरो). —$^{d}$) Ś1 D10 पवनात्मजः; Ñ1 दीर्घ(also वीर्य)विक्रमः (for मारुतात्मजः). ❀ Cr: "विषादमगमद्धीमान्हनुमान्मारुतात्मजः" इति पाठः ❀

24 Ś1 D2 om. (hapl.) 24–$25^{b}$. Ñ2 V1 B D6 om. 24. —$^{a}$) Ñ1 तद्योगं. D4 वानरेंद्रस्य (for °न्द्राणां). —$^{c}$) D10 व्यक्तं (for व्यर्थं). Ñ1 illeg. after वीक्ष्या up to 25. —$^{d}$) D7–9 उपागतः; D10 उपेयिवान् (for उपागमत्).

25 Ś1 D2 om. $25^{ab}$; Ñ1 illeg. for 25 (for both, cf. v.l. 24). —$^{a}$) D3.11 विमानात्तु; D6 G2 °नाग्राच्;

## ११

विमानात्तु सुसंक्रम्य प्राकारं हरियूथपः ।
हनूमान्वेगवानासीद्यथा विद्युद्घनान्तरे ॥ १

संपरिक्रम्य हनुमान्रावणस्य निवेशनात् ।
अदृष्ट्वा जानकीं सीतामब्रवीद्वचनं कपिः ॥ २

G. 5.15.0
B. 5.13.2
L. 5. 8.4

( G2 °ग्राद् ); Cm.k.t as in text ( for °नाच ). —$^{b}$ ) Ñ2 V1 B2-4 D6 चिंतयामास दुःखितः ; D10 हनुमानरुवनात्मजः . —After 25$^{ab}$, Ñ2 V1 B D6 ins. :

323* न प्रकाशमिह स्थातुं शक्यते राक्षसालये ।
राजा हि रावणः क्रूर इति संचिन्त्य बुद्धिमान् ।
परिक्रम्य ततो दीनः पुनर्ध्यानमुपागमत् ।
ततो लङ्कां प्रयत्नेन विचिन्त्य पवनात्मजः ।
रजन्यामर्धशेषायां प्राकारे निपसाद सः । [5]
निराशो मोघसंकल्पश्चिन्तयन्विविधा गतीः ।
विक्रान्तः सागरं क्रान्तो मग्नश्चिन्तामहार्णवे ।
स स्वहृष्टेन मनसा प्राकारस्थो महाकपिः ।
अपश्यञ्जानकीं सीतां विललाप सुदुःखितः ।

[ ( l. 1 ) B2 transp. न and प्रकाशमिह. —( l. 2 ) B4 राक्षसः ( for रावणः ). —( l. 3 ) V1 B4 उपागतः ( for °गमत् ). —( l. 4 ) B1.3 D6 विचिंत्य( sic ) ( for विचिन्त्य ). —( l. 5 ) B4 ह ( for सः ). —( l. 6 ) B3 मुक्त- ( for मोघ- ). Ñ2 B3 D6 विविधां गतिं. —( l. 7 ) B1.3 सागर- ( for °रं ). V1 भ्रांतो; B1 -[ आ ]क्रांतो; B4 तीर्णो ( for क्रान्तो ). —( l. 8 ) B3 [ अ ]कुंठेन ( for [ अ ]हृष्टेन ). —( l. 9 ) B4 नापश्यज् ( for अप° ). B2 तत्र ( for सीतां ). ]

—V1 B1.3.4 om. from 25$^{c}$ to 5.11.4. Ñ2 B2 D6 om. from 25$^{c}$ to 5.11.2. —$^{c}$ ) D2 -[ आ ]जगाम ( for -जगाम ). Ś1 [ अ ]सौ; D2.10.11 [ आ ]शु ( for [ अ ]थ ). —$^{d}$ ) D11 सकोप- ( for शोकोप- ). —After 25, Ś1 V2 D1-4.10.11 ins. :

324* ध्यात्वा क्षणं ततो भूयो विचेतुमुपचक्रमे ।
हृदि कृत्वा प्रयत्नं तु प्रयत्नं भजते विधिः ।

[ ( l. 1 ) V2 D1.3.4 तदा ( for ततो ). —D1.3.4 om. l. 2. —( l. 2 ) Ś1 स्वं; D10 च; D11 स ( for तु ). V2 प्रयत्ने ( for second °त्नं ). ]

Colophon : Ś1 Ñ V B D2.6.10.11 om. D3 reads colophon after 5.11.1. —*Sarga name* : D1.3.4 अंतःपुरविचयः. —*Sarga no.* (figures, words or both) : D1.4 om.; D3 15; D5.7-9 S 12. —After colophon, G concludes with श्रीरामाय नमः.

## 11

Ś1 Ñ1 V2 D2.4.10-11 continue the previous Sarga. M2 begins with श्रीरामाय नमः.

1 V1 B1.3.4 om. 1-4; Ñ2 B2 D6 om. 1-2 ( for both, cf. v.l. 5.10.25 ). —$^{a}$ ) D5.7-9 T2 M1 Cv.r.m स ( for सु- ). Ś1 Ñ1 D2.10 स विमानाच्च निष्क्रम्य; V2 D11 स विमानाद्विनिःक्रम्य; D1.3.4 स विमानं तु संक्रम्य. —$^{b}$ ) T2 प्रासादान् ( for प्राकारं ). M2 प्रासादं हरिपुंगवः . —$^{c}$ ) V2 अथ हनुमान् ( hypm. ) ( for हनूमान् ). Ñ1 यथा वेगेन हनुमान्. —$^{d}$ ) Ś1 Ñ1 V2 D1.2.10 घनाद्घनं; D3.6 च( D4 घ )-नाद्घनं; Cv.r.m.k.t as in text ( for घनान्तरे ). D11 यथा विद्युदिवाघनं ( sic ). —After 1, D3 reads colophon of 5.10.

2 Ñ2 V1 B D6 om. 2 ( cf. v.l. 1 ). —$^{b}$ ) D5.7-9 Cv.r.m निवेशनात्; G2 Cvp निवेशनं; Ct निवेशनान् ( as in text ). —For 2$^{ab}$, Ś1 Ñ1 V2 D1-4.10.11 subst. :

325* रावणान्तःपुरं सर्वं विचित्य स महाकपिः ।

[ D3 रम्यं; D11 दिव्यं ( for सर्वं ). V2 विचिन्वन्; D1.4 विविच्य; D2.3 विचित्य. Ñ1 मारुतात्मजः ( for स महाकपिः ). ]

—Then Ś1 Ñ1 V2 D2.10.11 cont. ; while D1.3.4 cont. l. 1 and 3 and ins. l. 4 after 2 :

326* न ददर्श ततः सीतां मैथिलीं जनकात्मजाम् ।
चन्द्रलेखामिव नवां व्योम्नि नीलाभ्रसंवृताम् ।
तत्र प्रासादहर्म्येषु विमानभवनेषु च ।
निष्कुटेषु च रम्येषु तथा सर्ववनेषु च ।

[ ( l. 1 ) V2 D1.4 तदा ( for ततः ). Ś1 D10 न तत्र ददृशे सीतां ( for the prior half ). V2 निरीक्ष्य च पुनः पुनः ( for the post. half ). —After l. 1, Ñ1 ins. :

326( A )* राघवस्य प्रियां भार्यां यत्कृतेऽहमिहागतः ।

—( l. 2 ) Ñ1 -संयतां; V2 -संनिभां; D11 -संवृते ( for -संवृताम् ). —( l. 3 ) D3 ततः ( for तत्र ). D4 मानव- ( sic ) ( for विमान- ). D3 तथा संयमनेषु च ( for the post. half ). —V2 om. ( hapl. ) l. 4. —( l. 4 ) Ñ1 D2 निःकुटेषु. Ś1 शाल-; D10 माल- ( for सर्व- ). D2 -जनेषु ( for -वनेषु ). D1.4 स भवनेषु ( for सर्व° ). Ñ1 जलजेषु वनेषु च; D3 तथासत्वगृहेषु च ( for the post. half ). ]

—$^{d}$ ) Ś1 V2 D1-4.10.11 निरीक्ष्य च मुहुर्मुहुः ; Ñ1 अभिप्रेक्ष्य पुनः पुनः . —After 2, Ś1 V2 D2.10.11 ins. ; D1.3.4 cont. after l. 4 of 326* ; whereas Ñ2 B2 D6 ins. before 3 :

327* नेह सीतेति हनुमांश्चक्रे बुद्धिं महाकपिः ।

[ V2 नेयं ( for नेह ) and महामतिः ( for °कपिः ). Ñ2 B2 D6 चिंतयामास वानरः ( for the post. half ). ]

—Thereafter Ś1 D1-4.10.11 read 6 ( followed by 333* ). —After 2, Ñ1 ins. :

G. 5. 15. 0
B. 5. 13. 3
L. 5. 8. 9

भूयिष्ठं लोडिता लङ्का रामस्य चरता प्रियम् ।
न हि पश्यामि वैदेहीं सीतां सर्वाङ्गशोभनाम् ॥ ३

पल्वलानि तटाकानि सरांसि सरितस्तथा ।
नद्योऽनूपवनान्ताश्च दुर्गाश्च धरणीधराः ।
लोडिता वसुधा सर्वा न च पश्यामि जानकीम् ॥ ४

इह संपातिना सीता रावणस्य निवेशने ।
आख्याता गृध्रराजेन न च पश्यामि तामहम् ॥ ५

किं नु सीताथ वैदेही मैथिली जनकात्मजा ।
उपतिष्ठेत विवशा रावणं दुष्टचारिणम् ॥ ६

---

328* सीता नेहेति नेहेति सकलान्तःपुरे कपिः ।
विमानाद्विचरंस्तत्र बुद्धिं चक्रे महामतिः ।

—Thereafter Ñ1 reads st. 6.

3 V1 B1.3.4 om. 3 (cf. v.l. 1). Ñ2 B2 D6 ins. 327* before 3.—a) D5.6 भूयिष्ठा. Ś1 Ñ V2 B2 D1–4.6.10.11 विचिता; D7–9 S Cr.m.g.k.t लोलि( S °ळि )ता ( for लोडिता ).—b) Ś1 D2.10 [ अ ]तुग( Ś1 D2 °र )तां ( for चरता ). Ś1 B2 D2.3.11 प्रियां ( for प्रियम् ). G1 परमप्रियां ( for चरता प्रियम् ). —D1.4 om. 3cd. —c) Ś1 नानु-; Ñ1 D10 नैव; Ñ2 V2 B2 D2.3.6.11 न च ( for न हि ). G3 ***श्यामि. —d) Ñ1 T1.3 सर्वांगसुंदरीं. —After 3, Ñ2 D6 ins.:

329* अपश्यञ्जानकीं सीतां वेदिकाश्चैत्यसंश्रयाः ।

[ D6 प्राकारांतररथ्याश्च ( for the prior half ). ]

4 V1 B om. 4 ( for V1 B1.3.4, cf. v.l. 1 ). —a) Ś1 Ñ D1–4.6.10.11 तडागानि ( for तटाका° ). —c) Ś1 Ñ2 D2.6.10 नद्यश्चोपवनांता( D6 °त )श्च; Ñ1 कुल्या नद्यो नदावंता (sic); V2 कुल्या नदा वनांताश्च; D1.4 नदकूपवनानां ( D1 °नांताश्च ) च; D3 G1 उद्यानोपवनांताश्च; Cv.r.m.g as in text. —d) Ś1 Ñ V2 D1–4.6.10.11 दुर्गाणि. Ś1 D6 धरणीधर: (sic); V2 D11 °धरान् ( for °धराः ). —e) Ś1 Ñ V2 D2.3.10.11 विचिता; D7–9 S लोलि ( S °ळि )ता ( for लोडिता ). D1.4 विचिता बहुधा सर्वं; D6 विचिंत्य बहुधा सर्वं. —f) D8 T1.3 M3 तु ( for च ). D10 पश्यामि च ( by transp. ). Ñ1 मैथिलीं. —After 4, Ś1 Ñ1 V2 D1–4.6( repeating after 331* ).10.11 ins.; Ñ2 B cont. after 331*:

330* सीतां कमलपत्राक्षीं रामस्य महिषीं प्रियाम् ।
न सोऽस्ति शैलो भूमिर्वा सरितः काननानि च ।
यत्र नार्या मया सीता मार्गिता चरता महीम् ।

[ ( l. 2 ) Ñ1 स नास्ति ( by transp. ) ( for न सोऽस्ति ). Ñ2 B D6 ( second time ) न संति भुवि शैला वा( B3 °लास्ते ); V2 न सास्ति भूमिर्वा शैलो; D6 ( first time ) न सास्ति भूमिः शैलो वा ( for the prior half ). V2 नद्यश्च; D6 ( first time ) नरः (sic) ( for सरितः ). Ñ2 B2.4 D2.3.6 ( both times ) वा ( for च ). —( l. 3 ) Ñ1 न यत्र ( by transp. ). V2 यत्र चार्या. Ñ2 B D6 ( second time ) येष्वार्या न( B3 आर्या येन [ sic ] ) प्रयत्नेन ( for the prior half ). Ñ2 B D6 ( second time ) मया ( for महीम् ). ];

while Ñ2 ins. after 4; B ins. before 5 ( preceded by 330* ) and D6 cont. after 330* ( first time ):

331* यत्कृते वानराः सर्वे विक्षिप्ताः सर्वतो दिशः ।
वयं चाप्रतिमं तीर्णाः सागरं मकरालयम् ।
तां न पश्यामि वैदेहीं धर्मज्ञां धर्मदर्शिनीम् ।

[ ( l. 3 ) B2 transp. तां and न. B1 धर्मचारिणीं ( for °दर्शिनीम् ). ]

5 Before 5, B ins. 331* and 330*. —a) Ñ2 B3.4 इति ( for इह ). —c) D6 गृहराजेन ( sic ); G3 गृध्ररा**. —d) G3 damaged for न च. D4 om. च ( subm. ). Ś1 Ñ2 D6 T2 जानकीं; Ñ1 V1 B D2.10.11 मैथिलीं ( for तामहम् ). D7.9 न च सा दृश्यते तु किं.

6 Ñ2 V B D6 G1 om. 6. Ś1 D1–4.10.11 read 6 ( followed by 333* ) after 327*. Ñ1 reads 6( followed by 333* ) after 328*. —a) D7.9 T1 G2 Cr तु; Cv.m.g.k.t as in text ( for नु ). T2 [ अ ]च; Cr.m.g as in text ( for [ अ ]थ ). Ś1 Ñ1 D1–4.10.11 कथं हि ( Ñ1 तु; D3 च ) सीता ( for किं नु सीताथ ). —After 6ab, M2 ins.:

332* उपविष्टा विशालाक्षी रावणेन हृता बलात् ।

—c) T3 अव-; Cv.g as in text ( for उप- ). Ś1 उपतिष्ठेदमत्या सा; Ñ1 चिरमेवावतिष्ठेत; D2.10 उपतिष्ठेत्तम( D2 °त वि )वशा; D11 उपतिष्ठेत्तु विवशा; T2 उपातिष्ठद्विशालाक्षी. —d) D4 *** दुष्टचारणं; D7–9 Ct रावणेन हृता बलात्. ❀ Ct : 'रावणं दुष्टचारिणम्' इति पाठे तु यथाश्रुतमेव. ❀

—After 6, Ś1 Ñ1 V2 D1–4.10.11 ins.:

333* नेह स्यास्यति वैदेही रामपत्नी यशस्विनी ।
अन्यं क्रमिष्ये दुर्धर्षं काननं प्रमदालयम् ।
विचित्य लङ्कां यत्नेन हनुमान्मारुतात्मजः ।
रजन्यां यामशेषायां प्राकारे निपपात ह ।
स त्वहृष्टेन मनसा प्राकारस्थो महाकपिः ।　[ 5 ]
क सा सीतेति हनुमांश्चिन्तयामास वानरः ।

[ ( l. 2 ) Ñ1 V2 D4 अन्यु( Ñ1 V2 °न्य )त्क्रमिष्ये; D11 अन्यद्गमिष्ये. D10 दुर्दर्शं ( for °र्धर्षं ). Ś1 कंचन; D2.10 कांचनं ( for काननं ). V2 प्रमदावनं. —For l. 3–5, cf. 323* ( l. 4, 5 and 8 respy. ). —( l. 3 ) Ñ1 D1–3 विचिंत्य (sic). D3 तरत्नेन; D4 यत्नेह ( sic ) ( for यत्नेन ). Ñ1 लघुविक्रमः ( for मारुतात्मजः ). —( l. 4 ) Ś1 D10 राजधान्यामशेषायां

क्षिप्रमुत्पततो मन्ये सीतामादाय रक्षसः ।
बिभ्यतो रामबाणानामन्तरा पतिता भवेत् ॥ ७
अथवा ह्रियमाणायाः पथि सिद्धनिषेविते ।
मन्ये पतितमार्याया हृदयं प्रेक्ष्य सागरम् ॥ ८
रावणस्योरुवेगेन भुजाभ्यां पीडितेन च ।
तया मन्ये विशालाक्ष्या त्यक्तं जीवितमार्यया ॥ ९
उपर्युपरि वा नूनं सागरं क्रमतस्तदा ।
विवेष्टमाना पतिता समुद्रे जनकात्मजा ॥ १०
आहो क्षुद्रेण चानेन रक्षन्ती शीलमात्मनः ।
अबन्धुर्भक्षिता सीता रावणेन तपस्विनी ॥ ११
अथवा राक्षसेन्द्रस्य पत्नीभिरसितेक्षणा ।
अदुष्टा दुष्टभावाभिर्भक्षिता सा भविष्यति ॥ १२
संपूर्णचन्द्रप्रतिमं पद्मपत्रनिभेक्षणम् ।
रामस्य ध्यायती वक्त्रं पञ्चत्वं कृपणा गता ॥ १३

G. 5. 15. 33
B. 5. 13. 13
L. 5. 8. 21

( for the prior half). V2 विनिपात ( for निप° ). —(l. 5) Ś1 Ñ1 D10 स तु हृष्टेन; V2 स प्रहृ°; D1.4 सोप्रहृ°; D3 तस्वहृ° ( for स स्वहृ° ). —(l. 6) Ś1 D2.10 क्वासौ सीतेति; Ñ1 क सा वस्तीति ( sic ); D3 नेह सी° ( for क सा सीतेति ). Ñ1 चिंतयंस्तु महाकपिः; D3 स्वचित्तेनावधारयन् ( for the post. half ). ]; whereas G2 reads 15 and 11–14 after 6.

7 $^{a}$) Ś1 Ñ1 B4 D2.5.10.11 उत्पतितो. —$^{b}$) Ś1 Ñ B3 D2.9–11 राक्षसः; B1( m. as in text ) रावणः ( for रक्षसः ). —$^{c}$) Ñ1 विभीतो; D2 वित्रस्तो; G3 damaged ( for बिभ्यतो ). D1.4 -बाणैश्च ( for -बाणानाम् ). Ś1 D10 वित्रस्ता राक्षसं( D10 °वणं ) दृष्ट्वा; Ñ2 V1 B D6 प्रच्यु( B3 °च्यु )ता रावणस्यांकाद्. —$^{d}$) Ś1 D1–4.10.11 अं( Ś1 चां; D10 सां )-कान्नि- ; Ñ1 V2 लंकां नि- ; B1( m. as in text ).3 अथवा ( for अन्तरा ). Ñ2 V1 B D6 भुवि ( for भवेत् ).

8 $^{a}$) Ñ2 V1 B D6 तस्या वा( B4 °श्च ) ( for अथवा ). D4 क्रियमाणायाः. —B3 om. ( hapl. ? ) 8$^{bc}$. G3 mostly damaged for $^{b}$. —$^{c}$) Ś1 Ñ1 V2 D1–4.10.11 नूनं स्फुटितम्; Ñ2 V1 B1.2.4 D6 शंके हृदयम् ( for मन्ये पतितम् ). —$^{d}$) Ñ2 V1 B1.2( marg. as in B3 ) D6 स्फुटितं; B3 फलितं; B4 ज्ञानितं ( sic ) ( for हृदयं ). Ś1 Ñ1 V2 D1–5.9–11 वीक्ष्य. Ñ2 V1 B D6 रावणं; T2 संगरं ( for सागरम् ).

9 $^{b}$) V1 B D6 भुजयोः. V1 B2.4 D6.11 पीडनेन ( for पीडितेन ). V1 B4 वा ( for च ). —$^{c}$) T1.3 तदा ( for तया ). —$^{d}$) Ñ2 V1 B D6 जीवितं त्यक्तम् ( by transp. ).

10 $^{a}$) G3 damaged from परि up to साग in $^{b}$. Ś1 Ñ V2 D2.5.7.9–11 T2 M2 सा ( for वा ). —$^{b}$) Ñ2 V1 B2–4 D6 गच्छतस् ( for क्रम° ). D5.11 तथा. —Ñ1 D11 repeat ( var. ) 10$^{cd}$ after 15$^{ab}$. —$^{c}$) Ś1 Ñ1( first time ).2 V1.2 B D1–10.11 ( both times ) विचेष्टमाना. —G3 damaged from प up to द्रे in $^{d}$. Ñ1 ( second time ) निश्चेष्टा पतिता सा वा. —$^{d}$) Ñ1 ( first time ) V2 D1.3.4.8 M1 सागरे. Ś1 Ñ1( both times ).2 V B2–4 D1–4.6.10.11( both times ) जानकी ध्रुवं ( for जनकात्मजा ). B1 जानकी सुमुखी ध्रुवं.

11 G2 reads 15 and 11–14 after 6. —$^{a}$) Ś1 Ñ1 D1–5.7–9.11 M3 Cv.r.g.k अहो; Ñ2 V1 B D6 अथ; Ct आहो ( as in text ). Ñ1 क्षत्रेण; B2( *sup. lin.* as in text ) क्रुद्धेन ( for क्षुद्रेण ). Ś1 Ñ V1 B D1.3.4.6.10 वा तेन; D11 G3 M1 पापेन; G2 चान्येन ( for चानेन ). V2 अथ क्षीणेन धर्मेण. —$^{b}$) D6 रक्षसा ( sic ) ( for रक्षन्ती ). Ś1 D10 उत्तमं; D11 आत्मना ( for आत्मनः ). —$^{c}$) Ñ2 D6 अवश्यं; B1 ( marg. after corr. as in text ) सुबंधुर् ( for अबन्धुर् ). B3 भविता ( sic ) ( for भक्षिता ). —$^{d}$) V2 D6 यशस्विनी; M1 मनस्विनी. —After 11, Ñ1 ins. :

334* दुरात्मना तेन देवी जानकी रामवल्लभा ।

10 $Ś_1$ $D_{10}$ om. $10^{ab}$. —$^{b}$) $\tilde{N}_1$ $D_{1-5.7-9.11}$ $G_{1.2}$ $M_{1.2}$ Ct प्रमथिता; $V_2$ उपहृता; Ck as in text (for अपहृता). —$^{c}$) $\tilde{N}_1$ वासि च; $D_{10}$ त्वमभि- (for त्वमसि). $\tilde{N}_2$ $V_2$ B $D_6$ वैदेही (for भद्रं ते). —$^{d}$) $M_3$ मया (for मम). $D_1$ भामिनी (for पृच्छतः). $Ś_1$ $\tilde{N}$ $V_2$ B $D_{2.4.6.10.11}$ तत्त्व($D_4$ °न्म)माख्याहि भाविनि($Ś_1$ $B_2$ $D_4$ भामिनि; $\tilde{N}_1$ $D_{10}$ शोभने); $D_3$ तत्त्वमाख्यातुमर्हसि. —After 10, $D_{5.7-9}$ S ins. :

664* यथा हि तव वै दैन्यं रूपं चाप्यतिमानुषम् ।
तपसा चान्वितो वेषस्त्वं राममहिषी ध्रुवम् ।

[(l. 1) $D_5$ तथा (for यथा). $D_8$ $G_2$ दैन्यं तु($G_2$ च); $M_1$ वै देव्या (for वै दैन्यं). $D_{7-9}$ $G_1$ चाप्रति- (for चाप्यति-). —(l. 2) $D_5$ वेपं (for वेषस्). $T_2$ राज- (for राम-).]

11 $^{a}$) $D_{11}$ त्वस्य (for तस्य). —$^{b}$) $D_1$ राजहर्षित- (for रामकीर्तन-). —$^{d}$) $D_4$ -[आ]स्थितं (for -[आ]श्रितम्). $Ś_1$ $D_{10}$ हनुमंतं द्रुमाश्रिता; $\tilde{N}_2$ $V_2$ B $D_6$ वृक्षांतरगतं कपिं; $G_1$ रामसत्कथयाश्रितं. ❀ Cv : रामसत्कथयाश्रितमिति सम्यक्पाठः. ❀ —After 11, $\tilde{N}_1$ ins. :

665* हर्षगद्गदया वाचा विभीता रावणस्य च ।
राक्षसीगणमीक्षन्ती भर्त्सयन्ती च चक्षुषा ।;

while $D_{5.7-9}$ S ins. :

666* पृथिव्यां राजसिंहानां मुख्यस्य विदितात्मनः ।
स्नुषा दशरथस्याहं शत्रुसैन्यप्रतापिनः ।

[(l. 1) $G_3$ transp. the post. halves of l. 1 and 2. —(l. 2) $D_{7.9}$ -प्रणाशिनः; $T_{1.3}$ $G_{2.3}$ -प्रमाथिनः; Cg as above (for -प्रतापिनः).]

12 $^{b}$) $Ś_1$ $\tilde{N}_1$ $B_{1.3.4}$ $D_{1.3-5.10.11}$ विदेहस्य (for वैदेहस्य). —$^{c}$) $G_2$ $M_2$ transp. च and नाम. $Ś_1$ $D_1$ तस्याहं; $\tilde{N}$ $V_2$ B $D_{2-4.6}$ विख्याता; $D_{7.9}$ चोक्ताहं (for नाम्नाहं). $D_{10}$ सीता नामासि भद्रं ते (sic); $D_{11}$ सीतेति नाम तस्याहं;

समा द्वादश तत्राहं राघवस्य निवेशने ।
भुञ्जाना मानुषान्भोगान्सर्वकामसमृद्धिनी ॥ १३
ततस्त्रयोदशे वर्षे राज्येनेक्ष्वाकुनन्दनम् ।
अभिषेचयितुं राजा सोपाध्यायः प्रचक्रमे ॥ १४
तस्मिन्संभ्रियमाणे तु राघवस्याभिषेचने ।
कैकेयी नाम भर्तारं देवी वचनमब्रवीत् ॥ १५
न पिबेयं न खादेयं प्रत्यहं मम भोजनम् ।
एष मे जीवितस्यान्तो रामो यद्यभिषिच्यते ॥ १६
यत्तदुक्तं त्वया वाक्यं प्रीत्या नृपतिसत्तम ।
तच्चेन्न वितथं कार्यं वनं गच्छतु राघवः ॥ १७
स राजा सत्यवाग्देव्या वरदानमनुस्मरन् ।
मुमोह वचनं श्रुत्वा कैकेय्याः क्रूरमप्रियम् ॥ १८
ततस्तु स्थविरो राजा सत्यधर्मे व्यवस्थितः ।
ज्येष्ठं यशस्विनं पुत्रं रुदन्राज्यमयाचत ॥ १९
स पितुर्वचनं श्रीमानभिषेकात्परं प्रियम् ।
मनसा पूर्वमासाद्य वाचा प्रतिगृहीतवान् ॥ २०

G. 5. 31. 18
B. 5. 33. 24
L. 5. 27. 20

---

G3 सीता नाम्ना च नामाहं. —$^{d}$) D10 पत्नी (for भार्या). Ñ1 रामस्य महिषी प्रिया. ꕥ Cv : सीता च नामेत्यत्र नामशब्दः प्रसिद्धौ ।; So also Cr.m.k. ꕥ

13 $^{a}$) M1 [आ]सं; Cv.g as in text (for [अ]हं). Ś1 Ñ1 D2–4.10.11 वत्सरान्द्वादश पुरा; Ñ2 V2 B D6 उषिता वर्षमेवैकं(Ñ2 D6 °कं वै; V2 °कैकं); D1 संवत्सरान्द्वादश पुरा (hypm.). —$^{b}$) B4 श्वशुरस्य (for राघवस्य). ꕥ Cv.r : तत्रासमिति तु सम्यक् (Cr °ति पाठः सम्यक्) ।; Cg : द्वादश समा द्वादश संवत्सरान् । अत्यन्तसंयोगे द्वितीया. ꕥ —$^{d}$) B सर्वभोग-; G3 सर्वकर्म-; Cr.g as in text (for सर्वकाम-). Ś1 D10 -फलांस्त्वहं; Ñ1 D1.2.4.11 -फलान्बहून्; Cr.g as in text (for -समृद्धिनी). D3 पत्या रामेण लालिता. —After 13, Ñ1 ins.:

667* राघवस्य कृतज्ञस्य कौशलेयसमीपतः ।

14 $^{a}$) T M1.3 तत्र (for ततस्). —$^{b}$) Ś1 Ñ1 D4.10 राज्ये च; D1 राज्यम्; G1 रामं च (for राज्येन). Ś1 D2.10.11 [इ]क्ष्वाकुनंदनः. —$^{c}$) D1 अभिषिंचयितुं. —$^{d}$) Ś1 Ñ1 D1.2.4.10.11 [ऽ]करोन्मतिं (for प्रचक्रमे). —For 14, Ñ2 V2 B D6 subst.:

668* ततः संवत्सरादूर्ध्वं न्यमन्त्रयत तं पिता ।
राज्येनेक्ष्वाकुवंशस्य सामात्यः सपुरोहितः ।

[(l. 1) D6 स्वमंत्रयत. V2 आमंत्रयत मत्पिता (for the post. half). —Ñ2 om. l. 2. —(l. 2) B3 राज्यम्; B4 (with hiatus) राज्ये (for राज्येन).]

15 $^{a}$) D4 T2 अस्मिन्; Cg as in text (for तस्मिन्). D2 संभ्रियमाणा; D11 सा भ्रियमाणे. D1.3.4 च; D2 [इ]व (for तु). Ñ2 V2 B D6 ततः संकीर्त्यमाने तु(D6 °नेषु). —$^{c}$) B4 तु स्व- (for नाम). —$^{d}$) Ñ V2 B D2.6.7.9.11 इदं (for देवी). ꕥ Ct : नाम प्रसिद्धमित्यर्थः. ꕥ

16 $^{a}$) Ś1 Ñ1 D1–4.10.11 न पित्रा(D2 जीवा)मि न खादामि; Ñ2 V2 B D6 न पास्ये न च भोक्ष्येहं. —$^{b}$) Ñ2 प्रगूढं; B2 प्रत्यूढं; D2.11 प्रत्यूहं (for प्रत्यहं). Ś1 D4.10 न च; V2 हीन-; B4 ननु; D8.11 मे न (for मम). D6 भाजने (for भोजनम्). D1.3 न च निद्रां करोम्यहं. ꕥ Cv : भोजनमित्याहार्यस्य सर्वस्याभिधानम् ।; Cr.g : भुज्यत इति भोजनम् । (Cr कर्मणि ल्युट्) ।; Cm : मम भोजनमित्यत्र प्रथमार्थे षष्ठी. ꕥ —$^{c}$) D4 ते (sic) (for मे). —$^{d}$) D1 राघवस्य (sic) (for रामो यदि). Ñ2 V2 B D6 transp. रामो and यदि.

17 $^{a}$) Ñ1 V2 B D2.4.11 यदुक्तं तु(Ñ1 D2.4 तत्; B2 हि; D11 मे); D6 यदुक्ते तु (for यत्तदुक्तं). Ñ1 D4 पुरा (for त्वया). B4 पूर्वं; D11 कार्यं (for वाक्यं). —$^{b}$) D1.4 मे नृपसत्तमः. —Ñ1 illeg. for 17$^{cd}$. —$^{c}$) Ś1 D10 तत्ते न; D1.8 न चेन्न; D2 नाब्रुवन्; D5 तच्च न; D11 तच्चैनं (for तच्चेन्न). T2 अवितथं (for न वितथं). Ñ2 V2 B D6 तच्चैवा(V2 B2.4 °थैवा)वितथं तेस्तु; G3 तच्चेदवितथाकार्यं (sic).

18 Ñ1 transp. $^{ab}$ and $^{cd}$. —$^{a}$) Ñ2 V2 B D6 वचनात्तस्या; D2 सत्यवाक्येन (for सत्यवाग्देव्या). —$^{c}$) Ñ2 V2 B D6 दुर्वचः (for वचनं). —$^{d}$) Ñ2 V2 B D6 तु तद् (for क्रूरम्). D1 अद्भुतं (for अप्रियम्). D11 क्रूरमत्परं (sic).

19 $^{a}$) Ś1 Ñ V2 B1.2 D1–3.11 स; B3 च; D4.5.7–9 T1.3 M2 तं (for तु). D6 ततः संश्रावितो राजा. —D1 om. 19$^{b}$–20$^{c}$. —$^{b}$) Ś1 सति धर्मे; D2.3.5.6.11 T1.3 G1 सत्यधर्म-; M3 सत्ये धर्मे (for सत्यधर्मे). V2 सत्यधर्मसमन्वितः; B3 सत्यधर्मपरायणः; D4 सत्यधर्मव्यवस्थितं; G3 सत्यधर्मपथे स्थितः. —Ñ1 illeg. for 19$^{c}$–20$^{b}$. —$^{c}$) B3 राज्यं (for पुत्रं). —$^{d}$) B3 पुत्रं रामम्; T2 रामं राज्यम् (for रुदन्राज्यम्). D4 रुदन्नोवाच किंचन. —After 19, D11 ins.:

669* रामो राज्यं तं च हित्वा सर्वेषां देवसंमताम् ।
यदन्यन्मन्यसे देवि तच्च ब्रूहि ददामि ते ।

20 D1 om. 20$^{abc}$; Ñ1 illeg. for 20$^{ab}$ (for both, cf. v.l. 19). —$^{ab}$) Ñ2 V2 B D6 T2 (with hiatus) श्रुत्वा (for श्रीमान्). —$^{b}$) Ñ2 V2 B D6 राज्यादपि महत्तरं (for $^{b}$). —For 20$^{ab}$, Ś1 D2–4.10.11 subst.:

670* अभिषेकाप्रियतरं श्रुत्वा स वचनं पितुः ।

G. 5. 31. 19
B. 5. 33. 25
L. 5. 27. 21

दद्यान्न प्रतिगृह्णीयान्न ब्रूयात्किंचिदप्रियम् ।
अपि जीवितहेतोर्हि रामः सत्यपराक्रमः ॥ २१
स विहायोत्तरीयाणि महार्हाणि महायशाः ।
विसृज्य मनसा राज्यं जनन्यै मां समादिशत् ॥ २२
साहं तस्याग्रतस्तूर्णं प्रस्थिता वनचारिणी ।
न हि मे तेन हीनाया वासः स्वर्गेऽपि रोचते ॥ २३
प्रागेव तु महाभागः सौमित्रिर्मित्रनन्दनः ।
पूर्वजस्यानुयात्रार्थे द्रुमचीरैरलंकृतः ॥ २४
ते वयं भर्तुरादेशं बहुमान्य दृढव्रताः ।
प्रविष्टाः स्म पुरादृष्टं वनं गम्भीरदर्शनम् ॥ २५
वसतो दण्डकारण्ये तस्याहममितौजसः ।
रक्षसापहृता भार्या रावणेन दुरात्मना ॥ २६
द्वौ मासौ तेन मे कालो जीवितानुग्रहः कृतः ।
ऊर्ध्वं द्वाभ्यां तु मासाभ्यां ततस्त्यक्ष्यामि जीवितम् ॥ २७

## इति श्रीरामायणे सुन्दरकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

[ $D_{4}$ ज्ञात्वा स कांक्षितं पितुः ( for the post. half ).]
—$^{c}$ ) $D_{11}$ आस्वस्य (sic); $G_{3}$ आस्वाद्य; Cg as in text ( for आसाद्य ). —$^{d}$ ) $V_{2}$ B राज्यं; $D_{2.4}$ वचः ( for वाचा ). $V_{2}$ $B_{3.4}$ न तु; $D_{4.10}$ परि- ( for प्रति- ). $B_{1}$ न चैच्छत ( for -गृहीतवान् ). $D_{11}$ $T_{2}$ वचनं प्रगृहीतवान्.

21 $^{a}$ ) $D_{1}$ दत्तं ( for दद्यान् ). —$D_{4}$ om. after प्रति up to 22$^{a}$. —$^{b}$ ) $Ś_{1}$ सत्यम् ( for किंचिद् ). $Ñ_{2}$ $V_{2}$ B $D_{6-9}$ ऋतं ( $V_{2}$ $B_{3}$ $D_{7-9}$ सत्यं; $B_{4}$ दृढं ) ब्रूयान्न चानृतं; $D_{2}$ न कुर्याच्च वचोनृतं. —$^{c}$ ) $D_{1.11}$ जीवति ( for जीवित- ). —$^{d}$ ) $Ś_{1}$ -परायणः ( for °क्रमः ).

22 $D_{4}$ om. 22$^{a}$ (cf. v.l. 21 ). —$^{a}$ ) $Ś_{1}$ ( before corr. ) सोपिधौत- ( for स विहाय ). $V_{2}$ [ उ ]त्तमराज्यानि ( hypm. ) ( for [ उ ]त्तरीयाणि ). —$^{b}$ ) $T_{2}$ वरार्हाणि ( for महार्हाणि ). ❀ Cv : स विहायोत्तरीयाणि । अत्रोत्तरीयशब्दो वासोमात्रे वर्तते । बहुवचनप्रयोगात् । ; Cr.m.g : उत्तरीयाणि वासांसि ( Cr.m °सीत्यर्थः ). ❀ —After 22$^{ab}$, $D_{1.3}$ ins. :

671* मनश्चकार विपिने राघवः शत्रुकर्शनः ।

[ $D_{3}$ दधार चीराणि ततो ( for the prior half ).]

—$^{c}$ ) $D_{3}$ च महा- ( for मनसा ). —$^{d}$ ) $D_{4}$ जनन्या ( for जनन्यै ). $Ñ_{2}$ $V_{2}$ B $D_{6}$ वनमास्थि( $D_{6}$ °श्रि )तः.

23 $^{a}$ ) $D_{2.6}$ तस्य गता ( for तस्याग्रतस् ). $D_{8}$ शीघ्रं; $T_{1.3}$ तूष्णीं ( for तूर्णं ). —$^{b}$ ) $Ś_{1}$ $Ñ_{1}$ $V_{2}$ B $D_{1-4.6.10.11}$ चीरवासिनी( $B_{1-3}$ $D_{10}$ °ससः ); Ct as in text ( for वनचारिणी ). $Ñ_{2}$ प्रविष्टा चीरवाससी. —$^{c}$ ) $D_{4}$ नहि तेन विहीनाया.

24 $^{a}$ ) $Ñ_{2}$ $V_{2}$ B $D_{6}$ महाबुद्धिः; $D_{8}$ $M_{1}$ °प्राज्ञः ( for °भागः ). —$^{b}$ ) $Ñ_{2}$ $V_{2}$ B $D_{6}$ भ्रातृवत्सलः; $D_{8}$ $M_{1}$ मित्रदर्शनः ( for मित्रनन्दनः ). —$^{c}$ ) $Ś_{1}$ Ñ $V_{2}$ B $D_{1-4.6.10.11}$ [ अ ]नुयात्रार्थं; $D_{5}$ °यात्रार्थी ( for °यात्रार्थे ). —$^{d}$ ) $B_{2.3}$ $D_{5.7-9}$ कुश- ( for द्रुम- ). $D_{6.11}$ अलंकृतां.

25 $D_{1.4}$ आदेशाद् ( for आदेशं ). —$^{b}$ ) $Ś_{1}$ $D_{10}$ प्रागेव तु; $Ñ_{1}$ $B_{4}$ $D_{1-3.6.11}$ बहुमत्वा; $D_{4}$ बहुमाना ( for बहुमान्य ). —$^{c}$ ) $Ś_{1}$ $Ñ_{1}$ $D_{1-4.10.11}$ स्मो दुराधर्षं; $Ñ_{2}$ $D_{6}$ स्म पुरादिष्टं; $V_{2}$ B स्म( $B_{3}$ स्मः )पुरं( $B_{4}$ गृहं ) त्यक्त्वा; $T_{2}$ स्म पुरा घोरं; $T_{3}$ स्म पुरामृष्टं ( for स्म पुरादृष्टं ). —$^{d}$ ) $D_{8}$ वरं ( for वनं ). $V_{2}$ B गंभीरमोजसा. ❀ Cr.m.t : पुरा अदृष्टमिति( Cr °ति पद )च्छेदः ।; So also Cg.k. ❀

26 $^{a}$ ) $D_{1}$ वसतिं (sic) ( for वसतो ). —$^{b}$ ) $B_{4}$ अलिनौजसः (sic).

27 $V_{2}$ $B_{1-3}$ om. 27. —$^{a}$ ) $D_{1}$ कालोयं; $D_{2.4.6}$ $M_{2}$ मे कालौ; $D_{11}$ मे काले; $T_{3}$ कालो मे ( by transp. ) ( for मे कालो ). —$^{b}$ ) $D_{3.4.8}$ -[ अ ]नुग्रहे ( for -[ अ ]नुग्रहः ). $D_{8}$ कृतौ ( for कृतः ) $D_{6.11}$ जीवि( $D_{11}$ °व )तानुग्रहे कृते. —$^{c}$ ) $Ś_{1}$ ताभ्यां ( for द्वाभ्यां ). —After 27, $Ś_{1}$ Ñ $B_{4}$ $D_{3.4.6.10.11}$ ins. :

672* रावणो विकृताकारो राक्षसोऽतिभयानकः ।
समुद्रपारो दुष्प्रापः कालः परिमितश्च मे ।

[ ( l. 1 ) $B_{4}$ $D_{3.4}$ विकृताचा( $B_{4}$ °हा )रो; $D_{6}$ विकृतिकारो ( for °ताकारो ). $Ś_{1}$ $D_{10}$ [ ऽ ]तिभयंकरः; $B_{4}$ [ ऽ ]भिभयानकः. $D_{6}$ राक्षस्योभयनाशकाः ; $D_{11}$ राक्षस्योतिभयानकाः ( for the post. half ). —( l. 2 ) $B_{4}$ $D_{6}$ -पारे ( for -पारो ). $Ñ_{1}$ $D_{6}$ दुष्परः ( for दुष्प्रापः ). $D_{11}$ ते ( for मे ). $B_{4}$ समरनिष्ठुरः ( for परिमितश्च मे ).

Colophon : $Ñ_{2}$ $V_{2}$ B $D_{6}$ om. —*Sarga name* : $Ś_{1}$ $D_{1-4.10.11}$ सीतावाक्यं; $Ñ_{1}$ हनुमत्सीतासंवादे सीतावाक्यं. —*Sarga no.* ( figures, words or both ) : $D_{1.2.4.10.11}$ om.; $Ś_{1}$ 29; $D_{3.5.7.9}$ T G $M_{1.3}$ 33; $M_{2}$ 32. —After colophon, G concludes with श्रीरामाय नमः.

# ३२

तस्यास्तद्वचनं श्रुत्वा हनूमान्हरियूथपः ।
दुःखाद्दुःखाभिभूतायाः सान्त्वमुत्तरमब्रवीत् ॥ १

अहं रामस्य संदेशाद्देवि दूतस्तवागतः ।
वैदेहि कुशली रामस्त्वां च कौशलमब्रवीत् ॥ २

यो ब्राह्ममस्त्रं वेदांश्च वेद वेदविदां वरः ।
स त्वां दाशरथी रामो देवि कौशलमब्रवीत् ॥ ३

लक्ष्मणश्च महातेजा भर्तुस्तेऽनुचरः प्रियः ।
कृतवाञ्शोकसंतप्तः शिरसा तेऽभिवादनम् ॥ ४

G. 5. 31. 27
B. 5. 34. 4
L. 5. 28. 6

## 32

☞ V1 illeg. for Sarga 32 (cf. v.l. 5.30.3); Ñ2 V2 B D6 cont. the previous Sarga. M2 begins with श्रीरामाय नमः.

1 B2 reads 1ᵃ – 2ᵇ in marg. —ᵇ) Ñ2 V2 B1.2.4 D6 हरिसत्तमः ; B3 D7.9 °पुंगवः ; D1.3 T1.3 G3 मारुतात्मजः (for हरियूथपः). —ᶜ) Ś1 D10 महा- ; Ñ2 V2 B1 D2.4.6.11 दुःखं (for दुःखाद्). Ñ B1.2.4 D6 -[अ]भिपन्नात्मा; V2 -[अ]भिभूतात्मा; B3 -[अ]भिपन्ना*; D11 -[अ]भिभूतानां (for °भूतायाः). —ᵈ) Ś1 Ñ V2 B1.4 D1–4.6.10.11 वाक्यम् ; D5 शांतम् (for सान्त्वम्). B2 वाक्यं च किंचिदब्रवीत्; B3 वैदेहीं वाक्यमब्रवीत्. ❀ Ck.t : दुःखाद्दुःखाभिभूता (Ck °दुःखं प्रपन्ना)या इत्यलुगार्षः । दुःखपरम्पराखिन्नायाः. ❀ —After 1, Ś1 Ñ B4 D1–4.6.10.11 ins. :

673* त्वां मार्गमाणा रामार्थे क्लिश्यन्ते दिक्षु वानराः ।
क्षुत्तृष्णाभ्यां परिश्रान्ताः सिद्धिं मुनिगणा इव ।
रघूणां च हरीणां च प्राणास्त्वयि समाहिताः ।
सा त्वं दिष्ट्या मया दृष्टा नास्ति धन्यतरो मम ।

[ (l. 1) D11 मार्गमाणे (sic) (for °णा). B4 दृश्यंते (for क्लिश्यन्ते). —(l. 2) B4 तैस्तैस्तपोभिर्नियमैः; D1–4.6.11 क्षुत्तृष्णाभ्व (D1.2 °भ्यां)परिम्लानाः(D6 °क्लांताः) (for the prior half). D3 सुर- (for मुनि-). —(l. 3) D1 वानराश्च रघूणां च (for the prior half). B4 समाश्रिताः ; D3 °गताः (for समाहिताः). —(l. 4) Ś1 दृष्ट्या; B4 अद्य; D2.4.11 दृष्टा (for दिष्ट्या). D2.4 दिष्ट्या; D6.11 दृष्ट्या (for दृष्टा). Ñ D6.10.11 मया (for मम). ]

2 B2 reads 2ᵃᵇ in marg. (cf. v.l. 1). M2 om. (hapl.) 2. —ᵇ) V2 B1–3 D6 इह (for देवि). Ś1 D1.3.10 M1 समागतः ; Cr.m.g.k.t as in text (for तवा°). T2 G1 देवि दूतस्त्वमागतः. ❀ Cr.m : तवागतः समीपमिति शेषः ।; Cg : तव दूतस्त्वां प्रति प्रेषितो दूतः. ❀ —V2 B1.3 om. 2ᶜ – 3. —ᶜ) D10 कुशलं (for °ली). —ᵈ) Ñ B2 D3.7.9 G3 स त्वां; D4 त्वां* ; D6 सत्वो (sic) (for त्वां च). Ś1 Ñ2 B2.4 D1–4.6.10.11 कौशल्यम् (for °लम्). —After 2, Ś1 Ñ B4 D1.3.4.6.10.11 ins. :

674* दाता भोक्ता प्रहर्ता च श्रेष्ठो लोके धनुर्धरः ।

[ B4 जेता योक्ता; D1 कर्ता भोक्ता; D3 पाता भोक्ता (for दाता भोक्ता). D11 च हर्ता (for प्रहर्ता). Ñ2 D6 सीते गोप्ता च भर्ता च (for the prior half). D3 ज्येष्ठो (for श्रेष्ठो). B4 D1.3.4 लोक- (for लोके). Ñ2 D6 धनुष्मतां (for °धरः). ]
—Thereafter Ñ1 cont. :

675* हन्ता शत्रुकुलानां च विधाता *च विश्वधृक् । ;

while D1.3 cont. :

676* रामः प्रहरतां श्रेष्ठः कौशल्यानन्दवर्धनः ।

3 V2 B1.3 om. 3 (cf. v.l. 2). B2 D2 om. (hapl.) 3. —ᵃ) Ś1 Ñ B4 D1.3.4.6.10.11 दैवं च; Cm.t as in text (for वेदांश्च). D9 wrongly repeats वेदांश्च. —ᵇ) Ñ2 B4 D6 वेत्ति; D4 om. (hapl.) (for वेद). —ᵈ) Ś1 B4 D1.3.4.6.10.11 कौशल्यम् (for °लम्).

4 ᵃ) D1.3.4 तु (for च). D10 om. महा-. Ñ2 V2 B1.3 -बुद्धिः ; B2 D6 -बाहुः ; T2 -वीर्यो (for -तेजा). —ᵇ) B4 तेवरजः ; D3 त्वनु° (for तेऽनुचरः). Ñ2 V2 B1–3 D6 सुमित्रानंदि(V2 D6 °द)वर्धनः. —ᶜ) D4 -संपन्नः (for -संतप्तः). B3 कृतवान्नाक्षसंतप्तः (corrupt). —ᵈ) B1 (with hiatus) अभि- (for तेऽभि-). D11 -वादिनं (sic) (for -वादनम्). —After 4, Ñ2 V2 B1–3 D6 ins. :

677* मातृवत्स्मरति त्वां हि नित्यं लक्ष्मीविवर्धनः ।
यः पुरा छद्मनारण्ये कृत्वा रूपं मनोहरम् ।
काञ्चनं मृगसंस्थानं रावणो लोकरावणः ।
हृतवांस्त्वां महामायः सर्वभूतभयंकरः ।
वरदानमदोन्मत्तो लोकान्सर्वानचिन्तयन् । [5]
स तं रामो मम भ्राता ज्येष्ठः पितृसमस्तदा ।
धर्मात्मा धर्मतत्त्वज्ञो राजीवशुभलोचनः ।
विन्ध्याधायतयुक्तेन शरेणानतपर्वणा ।
कृत्वा च सुमहानादं मारीचो निपपात ह ।
प्रीत्यर्थं तद्वचःश्लाघी पृष्ठतोऽनुससार ह । [10]
एतस्मिन्नन्तरे वाक्यं यदुक्तं परुषं त्वया ।
स ते प्रणमते नित्यं लक्ष्मणो देवि देवरः ।

[ (l. 1) B2 नंदि- (for लक्ष्मी-). —(l. 2) V2 यत् (for यः). Ñ2 B1 D6 मनोरमं (for °हरम्). —(l. 4) V2 हृतवांस् (for हृतवांस्). B3 महाकायः (for °मायः). —(l. 5) V2 -बल- (for -मद-). Ñ2 D6 वरदानात्सुदुर्मत्तो (for the prior half). D6 लोकान्वान * चिंतयन् (for the post. half). —(l. 6) Ñ2 D6 सदा; B2 तथा (for तदा). —(l. 7) Ñ2 D6 धर्मवान्; V2 B1.3 धर्मतो (for धर्मात्मा). B2 -दल- (for -शुभ-).

G. 5. 31. 0
B. 5. 34. 5
L. 5. 28. 7

सा तयोः कुशलं देवी निशम्य नरसिंहयोः ।
प्रीतिसंहृष्टसर्वाङ्गी हनूमन्तमथाब्रवीत् ॥ ५
कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे ।
एति जीवन्तमानन्दो नरं वर्षशतादपि ॥ ६
तयोः समागमे तस्मिन्प्रीतिरुत्पादिताद्भुता ।
परस्परेण चालापं विश्वस्तौ तौ प्रचक्रतुः ॥ ७
तस्यास्तद्वचनं श्रुत्वा हनूमान्हरियूथपः ।
सीतायाः शोकदीनायाः समीपमुपचक्रमे ॥ ८
यथा यथा समीपं स हनूमानुपसर्पति ।
तथा तथा रावणं सा तं सीता परिशङ्कते ॥ ९
अहो धिग्धिक्कृतमिदं कथितं हि यदस्य मे ।
रूपान्तरमुपागम्य स एवायं हि रावणः ॥ १०
तामशोकस्य शाखां सा विमुक्त्वा शोककर्शिता ।
तस्यामेवानवद्याङ्गी धरण्यां समुपाविशत् ॥ ११

—(l. 8) B2 D6 -मुक्तेन (for -युक्तेन). —(l. 9) B2 स मारीचः पपात ह (for the post. half). —(l. 10) B3 पत्यर्थं (for प्री°). Ñ2 त्वद्वचः-; B2 (also as above) तद्वथः- (for तद्वचः-). —B3 om. l. 11. —(l. 12) Ñ2 तं (for ते). B8 स त्वां प्रणम्य शतवान् (sic) (for the prior half).]
—Thereafter B3 cont.:

678* तदा शून्ये गृहे च त्वं रावणेन हृता सती।

5 Ñ2 V2 B1–3 D6 om. 5–12. —$^{a}$) B4 वाक्यं (for देवी). —$^{b}$) Ś1 B4 D10 वीरयोर्; G2 प्रविश्य (sic) (for निशम्य). D3 -देवयोः (for -सिंहयोः). —$^{c}$) Ś1 B4 D1.10 श्रुत्वा; D7.9 प्रति-; Cr.m.g as in text (for प्रीति-). D11 -संकृष्ट- (for -संहृष्ट-). —$^{d}$) Ñ1 ततो; T2 तथा (for अथ).

6 Ñ2 V2 B1–3 D6 om. 6 (cf. v.l. 5). —$^{a}$) Ñ1 D5.10 तव; D1 प्रति; Cr.m.k.t as in text (for बत). B4 कल्याणी च यथार्थेयं; D11 कल्याणी च तथाप्येवं. —$^{b}$) B4 D5.8.9 मां; D7 G2.3 M2.3 Cm.g.k.t मा (for मे). ❀ Cm: बतेति हर्षे ।; Ck.t: गाथायाः संवादित्वदर्शनजो हर्षो बतेत्यनेन सूच्यते. ❀ —$^{c}$) Ñ1 एहि; D1.9 इति (sic); D2 पतिर् (sic) (for एति). D1.3 जीवितम् (for जीवन्तम्). B4 D11 पतिं जीवंतमानंदे. —After 6, Ś1 Ñ1 B4 D1–4.10.11 T2 ins.:

679* ततः संजातविश्रम्भा सीता शशिनिभानना।

[ B4 D1 -विश्वासा; D11 -संरंभा; T2 -संहर्षा (for -विश्रम्भा).]
—Thereafter T2 cont. 680*.

7 Ñ2 V2 B1–3 D6 om. 7 (cf. v.l. 5). —$^{a}$) D5 T1.3 G2 M2.3 तया(G2 °योः) समागते. —For $7^{ab}$, Ś1 Ñ1 B4 D1–4.10.11 subst., while T2 cont. after 679*:

680* तया समागतश्चापि हनुमान्प्रीतिमानसः।

[ D4 तथा संमानितश्चापि (for the prior half). Ś1 D10 प्रीतिमान्बभौ; B4 T2 °नभूत्; D2.4 प्रीत° (for प्रीतिमानसः).]
—$^{c}$) Ś1 D10 वाचाल्यं; D5 चान्योन्यं (sic); M1 चालापे (for चालापं). —$^{d}$) G3 विश्वस्तस् (sic) (for °स्तौ).

8 Ñ2 V2 B1–3 D6 om. 8 (cf. v.l. 5). —$^{a}$) Ś1 ततस् (for तस्यास्). D1–3.10 तु; Ct as in text (for तद्). —$^{b}$) Ś1 B4 D1.7–10 G2.3 मारुतात्मजः (for हरियूथपः). —$^{c}$) Ñ1 -संतप्तः; B4 D3.7.9.11 -तप्तायाः; D1.2.4.5 -दीप्तायाः (for -दीनायाः). ❀ Cr.m.g: उपचक्रमे गन्तुमिति शेषः (Cg प्रापेति वार्थः)।; Ck: उपचक्रम इति। शाखाया अवरुह्य पुनश्चेति शेषः।; Ct: उपचक्रमे तच्छाखातोऽप्यर्वाचीनां शाखामवरुह्य समीपं गन्तुं यत्नवानभूदित्यर्थः. ❀

9 Ñ2 V2 B1–3 D6 om. 9 (cf. v.l. 5). Ñ1 D2 om. $9^{a}$–$10^{b}$. —$^{a}$) Ś1 B4 D1.3.4.10.11 यथा समीपं सीताया. —$^{d}$) D8 सीताद्रुः-; M1 सीता तं (by transp.) (for तं सीता). —For $9^{cd}$, Ś1 B4 D1.3.4.10.11 subst.:

681* तथा रावण इत्येवं तं सीता पर्यशङ्कत।

[ B4 इत्येप (for °वं). Ś1 D10 सा (for तं). D1.3 प्रत्यशंकत; D11 पर्यशंकितं (sic) (for पर्यशङ्कत).]

10 Ñ2 V2 B1–3 D6 om. 10 (cf. v.l. 5). Ñ1 D2 om. $10^{ab}$ (cf. v.l. 9). —$^{a}$) D3 अतो वै; D11 अहो वै; T1.3 अहो किं (for अहो धिग्). Ś1 B4 D1.3.4.10 किं कृतम्; D5.8 G1 M1.3 Cm.g दुष्कृतम्; D11 वैकृतम्; Cr.k.t as in text (for धिक्कृतम्). D4 om. इदं. —$^{b}$) Ś1 D10 (erroneously repeats) कथितं हि मे; B1 विप्रकाशितं; D1.3.4.11 हि यद्द्य मे (for हि यदस्य मे). —$^{d}$) Ś1 D10.11 [आ]याति (for [अ]यं हि).

11 Ñ2 V2 B1–3 D6 om. 11 (cf. v.l. 5). —$^{a}$) B4 तम् (for ताम्). Ś1 Ñ1 D1.2.4.7.9.11 शाखां तु; B4 शाखांतं; D3 शाखां च; D5 G1.3 सा शाखां (by transp.) (for शाखां सा). —$^{b}$) Ś1 D2.10 मुक्त्वा सा; Ñ1 D1.4 त्यक्त्वा सा; D3 त्यक्ता सा; D7–9 G3 विमुक्ता; D11 मुक्ता सा (for विमुक्त्वा). B4 मुक्त्वा शोकेन कर्पिता. —$^{c}$) Ś1 D1–4.10.11 भयात्तस्य; Ñ1 B4 भयातुरा(Ñ1 °त्या [sic]) (for तस्यामेव). —$^{d}$) D3 धरायां (for धरण्यां). ❀ Cv: तामशोकस्येति। ननु शिंशपावृक्षस्य शाखां गृहीत्वा स्थितेत्युक्त्वा कथमशोकस्य शाखां विमुक्त्वेत्युच्यते। न दोषः। शिंशपाशोकाधिष्ठानसंरूढो(°ढ) एकीभूय स्थिताविति(°त इ)ति परिकल्प्यते। तेनेदं च पूर्वोक्तं च सर्वं सर्वं समीचीनम्।; Cr.m.t: अशोकस्याशोकवनस्थशिंशपावृक्षस्येत्यर्थः।; Cg: यद्यपि पूर्वं शिंशपाशाखावलम्बनमुक्तं तथापि शिंशपाशाखा अशोकसंवलितेति क्वचिच्छिंशपेत्युच्यते

अवन्दत महाबाहुस्ततस्तां जनकात्मजाम् ।
सा चैनं भयवित्रस्ता भूयो नैवाभ्युदैक्षत ॥ १२
तं दृष्ट्वा वन्दमानं तु सीता शशिनिभानना ।
अब्रवीद्दीर्घमुच्छ्वस्य वानरं मधुरस्वरा ॥ १३
मायां प्रविष्टो मायावी यदि त्वं रावणः स्वयम् ।
उत्पादयसि मे भूयः संतापं तन्न शोभनम् ॥ १४
स्वं परित्यज्य रूपं यः परिव्राजकरूपधृत् ।
जनस्थाने मया दृष्टस्त्वं स एवासि रावणः ॥ १५

उपवासकृशां दीनां कामरूप निशाचर ।
संतापयसि मां भूयः संतापं तन्न शोभनम् ॥ १६
यदि रामस्य दूतस्त्वमागतो भद्रमस्तु ते ।
पृच्छामि त्वां हरिश्रेष्ठ प्रिया रामकथा हि मे ॥ १७
गुणान्रामस्य कथय प्रियस्य मम वानर ।
चित्तं हरसि मे सौम्य नदीकूलं यथा रयः ॥ १८
अहो स्वप्नस्य सुखता याहमेवं चिराहृता ।
प्रेषितं नाम पश्यामि राघवेण वनौकसम् ॥ १९

G. 5. 31. 38
B. 5. 34. 20
L. 5. 28. 17

---

क्वचिदशोक इति। अतो न कश्चिद्दोषः. ❀ —After 11, Ñ1 ins.:

682* ततो हनूमानमतिमान्महातेजाः स्वल * तः ।;

while D8 T1.3 G2.3 M1.3 ins.:

683* हनूमानपि दुःखार्तां तां दृष्ट्वा भयमोहिताम् ।
[ T1.3 G2 M1 दुखार्तस् ( for °र्तां ). ]

12 Ñ2 V2 B1-3 D6 om. 12 (cf. v.l. 5). —a) Ś1 D10 अवदस्स(D10 °स्सु-) ; D1 अविदत (sic) ( for अवन्दत ). —After $12^{ab}$, Ñ1 ins. (sic) :

684* दीनं च भाषत * * नूनय प्रशयस्विनम् ।
मा देवि भेर्पीमा तुष्टं नाहं या * स्मि रावणः ।

—c) D5 [ए]वं; D11 [ए]व (for [ए]नं). Ś1 D2.7-10 T2 G1 Cm.t -संत्रस्ता; Cg as in text (for -वि°). —d) Ñ1 बालाभ्युदैक्षत; D1 नैवाभ्यवैक्ष्य च; D3.5 नैवाभ्युदै (D5 °पे )क्ष्यत; D7-9 नैनमुदैक्षत; T2 नैवाभ्यपद्यत (for नैवाभ्युदैक्षत ).

13 a) D3 दृष्ट्वा तं (by transp.). Ñ1 D5.7-9 च (for तु). Ñ2 V2 B1.2.4 D6 वंदमानं तु तं दृष्ट्वा; B3 इति तं वल्गु मानंतं ( metri causa ). —b) B3 दृष्ट्वा (for सीता). Ś1 D1-4.9-11 चंद्र-; Ñ1 पद्म- (for शशि-). —cd) D4 दीर्घशब्दस्य; G3 °मुच्छ्वास्य (for °मुच्छ्वस्य). Ś1 Ñ1 D1.10 -स्वरं( Ś1 °नं ); D4 -[अ]क्षरं (for -स्वरा). Ñ2 V2 B D6 दीर्घमुष्णं च( D6 वि ) निःश्वस्य वानरं वाक्यमब्रवीत्.

14 a) Ś1 D3.10 माया- (for मायां). D4.11 मायाविन् (for °वी). Ñ2 V2 B2-4 D6 मायाबलं( B3 °रूपं) समाश्रित्य; B1 मायाबलमुपाश्रित्य. —D3 om. $14^{b}-15^{b}$. —b) D6 वा (for त्वं). —After $14^{ab}$, D11 reads $16^{cd}$. —D11 om. $14^{cd}$. —c) Ś1 D3.10 उन्मादयसि; Ñ V2 B D1.2.6 संताप° (for उत्पाद°). Ś1 Ñ V2 B D1-3.6.8.10 मां (for मे). —d) Ś1 Ñ1 B D1-3.6.10 संतप्तां; Cg.t as in text (for संतापं). B3 G3 ते न (for तन्न). —After 14, Ñ1 ins.:

685* मृतः किं हन्यते कश्चिद्धत्वा किं लभते फलम् ।
मां मृतामिति जानीहि न किंचित्ते फलं भवेत् ।

15 D4 om. $15^{ab}$ (cf. v.l. 14); Ñ2 V2 B D6 G3 om. (hapl.) 15-16. —a) Ñ1 स्वकं (hypm.); D10 स्वे (sic); T3 स्वयं (hypm.); M2 Ck सं-; Ct as in text (for स्वं). D1.2 च; D11 तं; M2 स (for यः). —b) Ś1 Ñ1 D2.3.5.7-11 T2 G1 M2 -रूपवान्; D1 T1 G2 M1 °धृक् (for -रूपधृत्). —d) Ñ1 स त्वम् (by transp.). Ś1 Ñ1 D1-4.7.9-11 T1 एव हि (for एवासि). Ñ1 D2.4.11 राक्षसः (for रावणः).

16 Ñ2 V2 B D6 G3 om. 16 (cf. v.l. 15). —a) Ñ1 यो मे (for दीनां). —b) Ś1 -रूपी; D3 -रूपिन् (for -रूप). Ś1 D1.4.10.11 M1 निशाचरः. —Ñ1 D2.4 om. $16^{c}-18^{b}$. D11 reads $16^{cd}$ after $14^{ab}$. —c) Ś1 D10 त्वं चेज्जिहीर्षसि पुनः. —d) Ś1 D3.5.10.11 T1.2 M2 संतप्तां; D1 संत्रस्तां (for संतापं). D8 G2 M1 न तु (for तन्न). —After 16, D3.5.7-9 S ins.:

686* अथवा नैतदेवं हि यन्मया परिशङ्कितम् ।
मनसो हि मम प्रीतिरुत्पन्ना तव दर्शनात् ।

[ (l. 1) D5 एतद् (sic) (for एवं). D3 त्वयि (for परि-). —(l. 2) G2 मम तव; Ct as above (for हि मम). ]

17 Ñ1 D2.4 om. 17 (cf. v.l. 16). Ś1 D10 om. 17-18. D1.11 om. $17-18^{b}$. —a) Ñ2 V2 B D6 अथ (for यदि). —b) D3 स्वागतं (for आगतो). —c) D3 कथां कथय रामस्य.

18 Ś1 D10 om. 18; Ñ1 D1.2.4.5.11 om. $18^{ab}$ (for all except D5, cf. v.l. 16 and 17). D9 repeats 18 after 19. —c) D1.3 भूयो (for सौम्य). Ñ1 D2.4.11 चित्तं जिहीर्षसेनार्य( D11 °से पाप ). —d) Ñ V2 D1-4.11 इवांभसा( D1.2 °सः [ sic ] ); B1-3 इवोष्णगः; B4 इवोर्मयः; D6 इव प्लुवः (for यथा रयः). —After 18, Ñ2 V2 B D6 read 21.

19 a) D6 आर्द्रा (for अहो). B2 D5 सुखिता; D11 दुःखित्वं (for सुखता). Ś1 Ñ1 D10 अहो स्वप्नस्तु सुखदो. —b) D2.5.7.9 G3 एव (for एवं). Ś1 D10 -विधा हृता; Ñ B2 D6 विनाकृता; V2 B1 D11 निराकृता; B3 G1 चिराद्धृता;

G. 5. 31. 39
B. 5. 34. 21
L. 5. 28. 18

स्वप्नेऽपि यद्यहं वीरं राघवं सहलक्ष्मणम् ।
पश्येयं नावसीदेयं स्वप्नोऽपि मम मत्सरी ॥ २०
नाहं स्वप्नमिमं मन्ये स्वप्ने दृष्ट्वा हि वानरम् ।
न शक्योऽभ्युदयः प्राप्तुं प्राप्तश्चाभ्युदयो मम ॥ २१
किं नु स्याच्चित्तमोहोऽयं भवेद्वातगतिस्त्वियम् ।
उन्मादजो विकारो वा स्यादियं मृगतृष्णिका ॥ २२
अथवा नायमुन्मादो मोहोऽप्युन्मादलक्षणः ।
संबुध्ये चाहमात्मानमिमं चापि वनौकसम् ॥ २३
इत्येवं बहुधा सीता संप्रधार्य बलाबलम् ।
रक्षसां कामरूपत्वान्मेने तं राक्षसाधिपम् ॥ २४
एतां बुद्धिं तदा कृत्वा सीता सा तनुमध्यमा ।
न प्रतिव्याजहाराथ वानरं जनकात्मजा ॥ २५
सीतायाश्चिन्तितं बुद्ध्वा हनूमान्मारुतात्मजः ।
श्रोत्रानुकूलैर्वचनैस्तदा तां संप्रहर्षयत् ॥ २६

---

B4 चिरं बभौ; D1.3 M1 चिरं हृता; D2.9 °ह्नता; D4 पुरा हृता; Ck.t as in text (for चिराहृता). —$^c$) Ñ2 V2 B1–3 D6 त्वामि-; B4 त्वां हि; D1 तेन; D11 M3 नानु-; Ck.t as in text (for नाम). —After 19$^c$, D1 erroneously repeats 19$^b$. —$^d$) Ś1 D1.11 वनौकसा. —After 19, D9 repeats 18.

20 $^a$) Ñ1 D1 हि (for ऽपि). D5 यद् (for यदि). Ñ2 V2 B D6 रामं; D2 वीर (for वीरं). —$^b$) Ñ2 B1 पश्येहं; B2.4 D6 पश्येयं; B3 पश्यामि (for राघवं). —$^c$) M3 वा (for न). Ś1 Ñ1 D1–3.10.11 विषीदेयं; D4 विषादोयं (for [अ]वसीदेयं). Ñ2 V2 B D6 जीवेय(B1 °ह)मिति (V2 °मपि; B1.3.4 °मभि-) पश्यंती. —$^d$) Ś1 Ñ1 D10 मम न; V2 B3 D2 हि(B3 *) मम; T2 [ऽ]यं मम; Cg as in text (for ऽपि मम). D6 शोभनः; D8 वत्सरी (sic) (for मत्सरी).

21 Ñ2 V2 B D6 read 21 after 18. —$^a$) Ñ2 B D6 अहो; V2 अहं (for नाहं). V3 G1 इदं (for इमं). —$^b$) B2.3 D4 दृष्टश्(D4 °ष्टो,) (for दृष्ट्वा). V2 B D6 च (for हि). B2.3 D4 वानरः. —$^c$) D2 अशक्यो. V2 प्राप्तः (sic); D6.10 प्राप्तं (sic) (for प्राप्तुं). —$^d$) T1.3 जातश्च; T2 G3 M1.2 प्रियश्च (for प्राप्तश्च). G3 [अ]भ्यधिको; Ct as in text (for [अ]भ्युदयो). Ś1 Ñ V2 B1.4 D1–4.6.10 मया; B2 महान्; B3 यथा (for मम).

22 $^a$) Ś1 Ñ V2 B4 D1–3.6.10.11 तु मे; B1–3 D4 नु मे (for नु स्याच्). D2.4.11 -संमोहो (for -मोहोऽयं). —$^b$) D11 व्यातगतेस् (sic) (for वातगतिस्). D2 स्वयं; D5 T3 त्वयं (for त्वियम्). Ñ2 V2 B D6 उत मारुत(Ñ2 D6 वा भूत)विक्रिया(V2 °क्रमः); D3 भवेद्वा वातविभ्रमः. —Ñ2 om. 22$^c$–23$^b$. —$^c$) Ś1 Ñ1 V2 B D1–4.6.10.11 उन्मादो वा (for उन्मादजो). —$^d$) Ś1 D10 वेयं; D1.6.7.9.11 T1 अयं (for इयं).

23 Ñ2 om. 23$^{ab}$ (cf. v.l. 22). —$^b$) B1 D6 मोहादि; B2.4. D1.3.4.10 मोहो हि; M1 मोदो हि; Cr.m.g.t as in text (for मोहोऽपि). B1 D1.3.4 -लक्षणं. B3 मोहादुन्मादलक्षणं; D2 मोहो यस्माच्च लक्ष्मणः (sic). —$^c$) B3 संरोध्ये; B4 संवेद्मि; M1 प्रबुध्ये; Cr as in text (for संबुध्ये). D3.6.9.11 वा (for च). D1.4 संबुध्यै चात्मनात्मानम्. —$^d$) Ś1(m. after corr. as in text) तेषां; D11 इदं (for इमं). D1 शोक- (sic); D2.11 वापि (for चापि). D10.11 वनौकसां (sic).

24 $^a$) Ś1 D10 बुद्ध्या (for सीता). —$^c$) V2 B राक्षसं; D4 राक्षसी- (sic) (for रक्षसां). Ś1 D10 -रूपाणां; Ñ V2 B D2.3.11 G2 -रूपित्वान् (for -रूपत्वान्). —B4 om. 24$^d$–26$^a$. —$^d$) Ś1 D2 मन्ये; D10 सत्व (sic) (for मेने). V2 B1–3 वानराधिपं; T2 राक्षसेश्वरं (for राक्षसाधिपम्).

25 B4 om. 25 (cf. v.l. 24). Ñ1 repeats 25$^{ab}$ after 25. Ñ2 V2 B1–3 D6 transp. $^{ab}$ and $^{cd}$. —$^a$) Ś1 Ñ1(first time) D1.4.11 एवं. Ś1 G3 ततः; D4.5 तथा (for तदा). Ñ2 D6 परीक्षती कपिश्रेष्ठं; B2 तां बुद्धिं तु तदा कृत्वा. —$^b$) D3 सा सीता (by transp.); G1.2 सीता सु- (for सीता सा). G3 जनकात्मजा (for तनुमध्यमा). Ñ1(second time).2 V2 B1–3 D6 वैदेही वाक्यमब्रवीत्. —After 25$^{ab}$, Ñ1(after 25$^{ab}$ [r.]).2 V2 B1–3 D6 ins.; while D11 ins. after 25:

687* अनुमानैः कपिश्रेष्ठ भूयो मे वक्तुमर्हसि ।
यथा रामस्य दूतस्त्वं कश्च रामो वनौकसाम् ।

[(l. 1) D11 हनूमन् (subm.) (for अनुमानैः). Ñ1 B3 D11 भूयो वक्तुमिहा(B3 °मथा)र्हसि (for the post. half). —(l. 2) Ñ2 B3 D6 कथं (for यथा). Ñ V2 D11 च राम- (for रामस्य). D11 कश्च राजा कपीश्वरः (for the post. half).] —Thereafter B3 cont.:

688* समुद्रस्य परे पारे गमनं वा कथं भवेत् ।

—$^c$) Ś1 D10 जिज्ञासंती तदा भूयो; Ñ1 D2.4.11 जिज्ञास(Ñ1 °स्य)ते तदा(D4.11 स सा) भूयो; Ñ2 V2 B1–3 D6 अजिज्ञासत्ततो भूयो; D1.3 न प्रतिव्याहरद्भूयो.

26 B4 om. 26$^a$ (cf. v.l. 24). —$^a$) Ś1 D10 सीतायाश्च मतं बुद्ध्वा; Ñ V2 B1–3 D6 सीतायास्तद्वचः(Ñ V2 °स्तु वचः) श्रुत्वा; D1 सीतायास्त्वेव बहुधा; D2.4.11 सीतायास्त्वेव तद्बुद्ध्वा; D3 सीतया चैवमुक्तः स; D5.7–9 M1 सीताया लिखितं बुद्ध्वा. —$^b$) Ś1 D10 हरियूथपः (for मारुतात्मजः). Ñ2 V2 B D6 वायुपुत्रः प्रतापवान्. —$^d$) D5 M2 तथा; D11 तथैस् (for तदा). D7–9.11 T2 G2.3 M2 Cr.k.t संप्रहर्षयन्; Cg as in text. Ś1 तथैस्तां प्रत्यनंदयत्; Ñ1

आदित्य इव तेजस्वी लोककान्तः शशी यथा ।
राजा सर्वस्य लोकस्य देवो वैश्रवणो यथा ॥ २७
विक्रमेणोपपन्नश्च यथा विष्णुर्महायशाः ।
सत्यवादी मधुरवाग्देवो वाचस्पतिर्यथा ॥ २८
रूपवान्सुभगः श्रीमान्कन्दर्प इव मूर्तिमान् ।
स्थानक्रोधप्रहर्ता च श्रेष्ठो लोके महारथः ।
बाहुच्छायामवष्टब्धो यस्य लोको महात्मनः ॥ २९

अपकृष्याश्रमपदान्मृगरूपेण राघवम् ।
शून्ये येनापनीतासि तस्य द्रक्ष्यसि यत्फलम् ॥ ३०
नचिराद्रावणं संख्ये यो वधिष्यति वीर्यवान् ।
रोषप्रमुक्तैरिषुभिर्ज्वलद्भिरिव पावकैः ॥ ३१
तेनाहं प्रेषितो दूतस्त्वत्सकाशमिहागतः ।
त्वद्वियोगेन दुःखार्तः स त्वां कौशलमब्रवीत् ॥ ३२

G. 5. 31. 53
B. 5. 34. 34
L. 5. 28. 33

$D_{1-4.10}$ तथ्यैस्तां( $D_2$ तथैनां ) प्रत्यहर्षयत्( $\tilde{N}_1$ °यन् ); $\tilde{N}_2$ $V_2$ B $D_6$ अथ तां सम( $B_3$ प्रत्य )भाषत. ❀ Cg : संप्रहर्षयत्संप्राहर्षयत्. ❀ —After 26, $Ś_1$ $\tilde{N}$ $V_2$ B $D_{1-4.6.10.11}$ ins. :

689* यः स विग्रहवान्धर्मः साधुः सत्यपराक्रमः ।
परित्राता च दाता च सर्वभूतहिते रतः ।
बलवान्मातरिश्वेव महेन्द्र इव दुर्जयः ।

[ (l. 1) $V_2$ $D_1$ तु ( for स ). $D_1$ सविग्रहो ( for विग्रहवान् ). $D_3$ तस्य; $D_4$ सत्यं ( for सत्य- ). $Ś_1$ $\tilde{N}_1$ $D_{1-4.10.11}$ -प्रतिश्रवः( $D_{1.2.10}$ °यः ) ( for -पराक्रमः ). —( l. 2 ) $\tilde{N}_1$ परिपाता ( for °त्राता ). $Ś_1$ $D_{3.10}$ च सर्वस्य; $\tilde{N}_1$ $D_{1.4.11}$ प्रदाता च ( for च दाता च ). $D_2$ परित्राणप्रदानाच्च ( for the prior half ). —After the prior half of l. 2, $\tilde{N}_1$ ins. some lines which are illeg. $B_2$ -लोक- ( for -भूत- ). —$\tilde{N}_1$ illeg. for l. 3. —( l. 3 ) $V_2$ बलवान्स ( hypm. ). $D_2$ मारुत इव ( for मातरिश्वेव ). $D_1$ वज्रभृत् ( for दुर्जयः ).]

27 $^b$) $Ś_1$ $\tilde{N}$ B $D_{1.2.4.6.11}$ यथा शशी ( by transp. ). —$^c$) $\tilde{N}_2$ $V_2$ B $D_6$ प्रियः ( for राजा ). —$D_3$ om. from लो up to स्प in 28$^d$. —$^d$) $Ś_1$ $\tilde{N}_1$ $D_{10.11}$ रामो; $D_{1.2}$ राजा ( for देवो ). $\tilde{N}_2$ $V_2$ B $D_6$ राजा वैश्रवणोपमः; $D_3$ यथा वैश्रवणः प्रभुः.

28 $D_4$ om. up to स्प in $^d$ ( cf. v.l. 27 ). —$^a$) $B_{1.3}$ [ उ ]पपन्नस्य; $D_8$ [ उ ]दितः श्रीमान् ( for [ उ ]पपन्नश्च ). —$^b$) $\tilde{N}_2$ $V_2$ B $D_6$ -बलः ( for -यशाः ). —After 28$^{ab}$, $\tilde{N}_1$ ins. :

690* जितवानजाम * * ( illeg. )यः सत्ये तु समाश्रितः ।

—After मधुर in $^c$, $D_9$ erroneously repeats विष्णुर्महायशाः । सत्यवादीमधुर. —$^d$) $T_2$ वैवस्वतो ( for वाचस्पतिर् ).

29 $\tilde{N}_1$ illeg. for 29$^c$. —$^c$) $Ś_1$ $D_{10}$ क्रोधस्थाने; $\tilde{N}_2$ $V_2$ B $D_{6.11}$ जितक्रोधः; $D_{1.3.4}$ स्थाने क्रोधः( $D_1$ °ध- ); $D_2$ स्थाने लोके; $D_{7-9}$ Ck स्थानक्रोधे( $D_8$ °धी ); $M_2$ Cm.g स्थानक्रोधः; Ct as in text ( for स्थानक्रोध- ). $T_2$ -प्रहर्षश्च ( for °हर्ता ). —$^d$) $B_3$ श्रेष्ठ- ( for श्रेष्ठो ). $D_1$ $M_2$ लोक- ( for लोके ). $Ś_1$ $D_{10}$ धनुष्मतां; $\tilde{N}_1$ महाबलः; $M_1$ °यशाः ( for महारथः ). —$^e$) $Ś_1$ $B_3$ $D_{1-4.10.11}$ अवष्टभ्य; $\tilde{N}_1$ समाश्रित्य; $T_3$ °ष्टब्धा ( for °ष्टब्धो ). —$^f$) $D_1$ तस्य; $T_2$ लोके; Cr.m.g as in text ( for यस्य ). $Ś_1$ $D_{2-4.10.11}$ $T_3$ लोका; $T_2$ यस्य; $G_3$ लोके ( for लोको ). —After 29, $Ś_1$ $\tilde{N}_1$ $V_2$ $D_{1-4.10.11}$ ins., $D_5$ $T_{2.3}$ ins. l. 1 only after 29 :

691* देवा इव महेन्द्रस्य मोदन्ते विगतज्वराः ।
तं तादृशमनाधृष्यं देवानामपि दुर्जयम् ।
महेन्द्रसदृशं शौर्ये क्षमायां ब्रह्मणः समम् ।

[ ( l. 3 ) $Ś_1$ $\tilde{N}_1$ -सदृशो ( for सदृशं ). $D_2$ सौम्ये ( for शौर्ये ). $Ś_1$ $\tilde{N}_1$ $V_2$ $D_{2.10}$ क्षमया ( for क्षमायां ). $\tilde{N}_1$ $V_2$ ब्रह्मणोपमं ( for °णः समम् ). ];

while $B_3$ ins. :

692* तस्य रामस्य रूपं वा बलं वा किं च पौरुषम् ।
त्रिषु लोकेषु न स्थातुमपकारी रणे प्रभुः ।

30 $\tilde{N}_1$ illeg. for 30$^a$. —$^a$) $\tilde{N}_2$ $V_2$ $B_{1-3}$ $D_6$ अपवाह्य; $B_4$ °क्रम्य; $D_1$ अवकृष्य ( for अपकृष्य ). $Ś_1$ $D_{2.4.10}$ [ आ ]श्रमात्तं तु ( for °मपदान् ). $D_{11}$ अपहृत्याश्रमं तं तु. —$^b$) $V_2$ राघवः ( sic ); $B_2$ चापरं ( for राघवम् ). —$^c$) $B_4$ $D_6$ [ उ ]पनीतासि ( for [ अ ]प° ). —$^d$) $D_{7.9}$ $T_2$ $G_3$ $M_2$ तत् ( for यत् ). $Ś_1$ $\tilde{N}_1$ $D_{4.10.11}$ फलं( $D_4$ मूलं ) द्रक्ष्यसि तस्य च ( $D_{4.11}$ सः ); $\tilde{N}_2$ $V_2$ $B_{1-3}$ $D_6$ तस्य संद्रक्ष्यसे( $B_2$ °दृश्यते ) फलं; $B_4$ $D_2$ फलं द्रक्ष्यति तस्य सः; $D_{1.3}$ तस्याशु द्रक्ष्यसे स्वयं ( $D_3$ क्षयं ); $D_5$ तस्य द्रक्ष्यामि तत्फलं.

31 $\tilde{N}_1$ illeg. for 31$^a$. —$^{ab}$) $Ś_1$ $B_4$ $D_{2.4.10.11}$ कुपितो; $\tilde{N}_2$ $D_{1.3.7-9}$ $M_1$ Ct अचिराद्; Ck.t as in text ( for नचिराद् ). $D_{3.10}$ $G_{2.3}$ $M_{2.3}$ संखे ( sic ); $M_1$ संघे ( for संख्ये ). $Ś_1$ $\tilde{N}_1$ $B_4$ $D_{2.4.10}$ घातयिष्यति; $\tilde{N}_2$ $V_2$ $B_{1.2}$ $D_{5.6}$ स( $D_5$ यो ) हनिष्यति; Ck.t as in text ( for यो वधिष्यति ). $D_{1.3}$ वधिष्यति स राघवः ( for $^b$ ). $B_3$ नचिराद्रावणबलं भविष्यति न संशयः. —$\tilde{N}_1$ illeg. from 31$^c$ up to त in 32$^a$. —$^c$) $B_1$ $D_{5.7.9}$ क्रोध- ( for रोष- ). $\tilde{N}_2$ $V_2$ B $D_6$ -प्रदीप्तैर्; $D_{2.8}$ T -प्रयुक्तैर् ( for -प्रमुक्तैर् ). $V_2$ इक्ष्वाभं ( sic ) ( for इषुभिर् ). $Ś_1$ $D_{10}$ रोषमुक्तैः शरैस्तीक्ष्णैर्. —$^d$) $B_2$ सविषैर् ( for ज्वलद्भिर् ). $\tilde{N}_2$ $V_2$ $B_{2-4}$ $D_{3.6.11}$ पन्नगैः ( for पावकैः ). —After 31, $B_3$ ins. :

693* रावणं शतधा तूर्णं करिष्यति सबान्धवम् ।

32 $\tilde{N}_1$ illeg. up to त in $^a$ ( cf. v.l. 31 ). —$^a$) $V_2$ हि ( for [ अ ]हं ). $D_4$ प्रेक्षीतो ( sic ) ( for प्रेषितो ). —$^b$)

G. 5. 31. 54
B. 5. 34. 34
L. 5. 28. 34

लक्ष्मणश्च महातेजाः सुमित्रानन्दवर्धनः ।
अभिवाद्य महाबाहुः सोऽपि कौशलमब्रवीत् ॥ ३३
रामस्य च सखा देवि सुग्रीवो नाम वानरः ।
राजा वानरमुख्यानां स त्वां कौशलमब्रवीत् ॥ ३४
नित्यं स्मरति रामस्त्वां ससुग्रीवः सलक्ष्मणः ।
दिष्ट्या जीवसि वैदेहि राक्षसीवशमागता ॥ ३५
नचिराद्द्रक्ष्यसे रामं लक्ष्मणं च महारथम् ।
मध्ये वानरकोटीनां सुग्रीवं चामितौजसम् ॥ ३६
अहं सुग्रीवसचिवो हनूमान्नाम वानरः ।
प्रविष्टो नगरीं लङ्कां लङ्घयित्वा महोदधिम् ॥ ३७
कृत्वा मूर्ध्नि पदन्यासं रावणस्य दुरात्मनः ।
त्वां द्रष्टुमुपयातोऽहं समाश्रित्य पराक्रमम् ॥ ३८
नाहमस्मि तथा देवि यथा मामवगच्छसि ।
विशङ्का त्यज्यतामेषा श्रद्धत्स्व वदतो मम ॥ ३९

## इति श्रीरामायणे सुन्दरकाण्डे द्वात्रिंशः सर्गः ॥ ३२

D11 उप- ( for इह ). —$^{c}$) D6 तद्- ( for त्वद् ). Ñ2 V2 B2.3 D6 शोकार्तः ( for दुःखार्तः ). B4 शोकार्तस्त्वद्वियोगेन. —$^{d}$) D5 सदा; G M1.2 स त्वा ( for स त्वां ). Ś1 Ñ1 B1.3.4 D2–4.6.11 कौशल्यम्; G1 कुशलम्. B3 स त्वां वाक्यमथाब्रवीत्.

33 D4 om. ( hapl. ) 33–34. D1.3.11 transp. 33 and 34. G1.3 M1.2 transp. $^{ab}$ and $^{cd}$. —B3 om. $33^{bc}$. —$^{b}$) Ñ2 B1.2.4 G M1.2 -नंदि- ( for -[आ]नंद- ). D6 -वर्धिताः (sic); G3 -नर्धनः (sic) ( for -वर्धनः ). —$^{c}$) M2 -तेजाः ( for -बाहुः ). —$^{d}$) Ś1 Ñ V2 B D1.3.6–9.11 T1 G1 M3 त्वां; D2.10 त्वा ( for ऽपि ). Ś1 Ñ1 B D1–3.6.10.11 कौशल्यम्; G1 कुशलम्.

34 D4 om. 34 ( cf. v.l. 33 ). Ś1 D2.5 om. ( hapl. ) 34. D1.3.11 transp. 33 and 34. G1.3 M1.2 transp. $^{ab}$ and $^{cd}$. —$^{a}$) Ñ1 राघवस्य; G2 रामस्य तु ( for रामस्य च ). Ñ B1–3 D6.11 वीरः ( for देवि ). V2 D10 महावीरः. —$^{b}$) Ñ2 V2 B2–4 D6 वीर्यवान् ( for वानरः ). —V2 om. $34^{cd}$. —After $34^{c}$, Ñ1 ins. :

694* सूर्यपुत्रो महाद्युतिः ।
किष्किन्धायाः पतिः श्रीमान्.

—$^{d}$) D10 G2.3 M1.2 त्वा ( for त्वां ). Ñ1 B D6.10.11 कौशल्यम्; G1.3 कुशलम्. D1.3 स ते पादौ नमस्यति.

35 $^{a}$) D4 स्मरंति ( for स्मरति ). Ś1 D10 रा( D10 ना [sic] )मस्ते; Ñ2 V2 B D5–9 M2 ते रामः; G3 काकुत्स्थः ( for रामस्त्वां ). —$^{b}$) Ś1 D1–4.10.11 सुग्रीवश्च ( for ससुग्रीवः ). D1 सु- ( for स- ). Ñ1 सहसुग्रीवलक्ष्मणः; Ñ2 V2 B D6.8 G3 M2 सुग्रीवः सहलक्ष्मणः. —$^{c}$) Ñ2 D11 जीवति (sic). —$^{d}$) D1.3 राक्षसीनां वशं गता.

36 $^{a}$) D1.2.5 अचिराद्. Ñ1 D2.4.11 नचिराद्द्रक्ष्यसि पतिं. —$^{b}$) Ñ1 D3 T2.3 G3 M3 -बलं ( for -रथम् ). Ñ2 B3 D6 स( D6 सु )सुग्रीवं सलक्ष्मणं; V2 B1.2.4 सुग्रीवं सहलक्ष्मणं. —$^{c}$) Ś1 D10 मुख्यं ( for मध्ये ). —$^{d}$) Ś1 D1.2.4.10.11 G3 च महौजसं; Ñ1 च महाबलं; D3 विपुलौजसं; D8 T2.3 M1 अमितौजसं. Ñ2 V2 B D6 मरुतामिव वासवं.

37 $^{a}$) B2 तद्वीर- ( for सुग्रीव- ). —$^{b}$) Ñ2 D6 वीर्यवान् ( for वानरः ). D1.3 हनूमान्मारुतात्मजः. —After $37^{ab}$, Ś1 Ñ V2 B D1–4.6.10.11 ins. :

695* दूतोऽहं राजसिंहस्य रामस्याक्लिष्टकर्मणः ।
त्वत्सकाशमनुप्राप्तो रामवाक्यप्रचोदितः ।

[ ( l. 1 ) Ñ B1.3 D6 [ऽ]स्मि ( for ऽहं ). —( l. 2 ) B1 इह ( for अनु- ). Ñ1 -प्रदेशितः; B1 D1.3.4 -प्रणोदितः; B3 -समीरितः ( for -प्रचोदितः ). Ś1 D10 रामस्यादेशतो ह्यहं ( for the post. half ). ]

—$^{c}$) D11 प्रविष्टा (sic) ( for प्रविष्टो ).

38 $^{a}$) Ś1 D10 मूर्ध्नि दत्त्वा ( for कृत्वा मूर्ध्नि ). —$^{c}$) Ñ1 द्रष्टुं त्वामुपयातोस्मि; Ñ2 V2 B1–3 D6 कृत्स्ना च विचिता ( B3 चरिता ) लंका; B4 प्रविष्टो विततां लंकां. —$^{d}$) Ś1 B1–3 D1–4.6.10.11 स्वमाश्रित्य ( for समा° ). Ñ1 ययो * * ( illeg. ) ( for पराक्रमम् ).

39 $^{a}$) B3 सो ( for न ). —$^{b}$) Ś1 Ñ1 B3 D10 G3 त्वम्; Cr.g.k.t as in text ( for माम् ). V2 B1–3 D3 अधि-; D6 अभि- ( for अव- ). B1 D11 -गच्छति. —G3 om. $39^{cd}$. —$^{c}$) D5 विसंज्ञां; T2 शंका च ( for विशङ्का ). V2 D1 त्यजताम् (sic). Ś1 D2.10 विशंका भव वैदेहि; Ñ1 B4 D4.11 विशंकां त्यज( Ñ1 B4 त्यज्य [ archaic ] ) वैदेहि; B3 विसंज्ञा दुःखिता त्वं हि. —$^{d}$) Ś1 Ñ1 B4 D2.10.11 श्रद्धेहि ( for श्रद्धत्स्व ). T3 वचनं; M2 च वचो ( for वदतो ). Ñ2 V2 B1.2 D6 वदतः संप्रतीहि( V2 D6 °ह ) मे; B3 वदंतं मां प्रतीहि सा; D1.3 वदतः श्रद्धधस्व मे; D4 श्रद्धत्स्व वचो मम ( subm. ). —After 39, Ñ2 V2 B D6 ins. :

# ३३

तां तु रामकथां श्रुत्वा वैदेही वानरर्षभात् ।
उवाच वचनं सान्त्वमिदं मधुरया गिरा ॥ १

क्व ते रामेण संसर्गः कथं जानासि लक्ष्मणम् ।
वानराणां नराणां च कथमासीत्समागमः ॥ २

यानि रामस्य लिङ्गानि लक्ष्मणस्य च वानर ।
तानि भूयः समाचक्ष्व न मां शोकः समाविशेत् ॥ ३

कीदृशं तस्य संस्थानं रूपं रामस्य कीदृशम् ।
कथमूरू कथं बाहू लक्ष्मणस्य च शंस मे ॥ ४

G. 5. 32. 3
B. 5. 35. 4
L. 5. 29. 4

696* मलयगिरितटस्थितोऽहमेको
लवणजलश्च हि गोष्पदीकृतो मे ।
अनृतमपि मयेह नोक्तपूर्वं
वचनमिदं मम मैथिलि प्रतीहि ।

[ (l. 1) Ñ2 -तटीं गतो; V2 B1.4 -तटीस्थितो; D6 -तटात्संस्थितो (for -तटस्थितो). —(l. 2) Ñ2 V2 om. हि. B3.4 D6 -जलधिश्च (for -जलश्च हि). —(l. 3) B1.4 D6 च (for [इ]ह). V2 अनृतमनुक्तपूर्वं मयेह. —After l. 3, Ñ2 V2 B1.2.4 D6 cont. the lines of 5.30. 3 and 5-8.

[ (l. 1) Ñ2 V2 B1.2.4 D6 श्रुत्वा च( B2 हि ) सैवं च वि( Ñ2 सुवि; V2 *वि; D6 सुख )संज्ञकल्पा. —(l. 2) Ñ2 D6 विमूढचित्ता च; V2 B1.2.4 विमूढचेताश्च( V2 °त्र ). —(l. 3) Ñ2 B2 [ए]नं; D6 [ए]वं ( for [ए]व ). —(l. 5) Ñ2 V2 B1.2.4 D6 स्वप्नो ममा( Ñ2 न चा; B2 मया )यं तु( V2 न; B4 D6 तु )शयेन( B1 शयनेन ) चाहं. —(l. 6) Ñ2 V2 B1.2.4 D6 भये( V2 भृशे )न शोकेन च दह्यमाना. —(l. 7) Ñ2 B1.2.4 D6 निद्रा हि; V2 निद्रा तु (for सुखं हि ). Ñ2 V2 B1.2.4 D6 यदा- ( V2 B2 सदा; B1 यथा )विहीना ( for यतोऽस्मि हीना ). —(l. 8) V2 B1.2.4 तेनाहमिंद्र-( B1.2.4 °दु- ). B4 -प्रतिमाननेन मे. Ñ2 D6 तेनाहमिंद्रप्रतिमेन भर्त्रा. —(l. 10) Ñ2 V2 B1.2.4 D6 संमोहिता ( for संपीडिता ). —(l. 12) Ñ2 D6 ध्यानेन; V2 B1.4 तमेव; B2 सदैव (for तथैव ). —(l. 14) Ñ2 V2 B1.2.4 D6 न त्वेव ( Ñ2 D6 तमेव ) बुद्धया परितर्कयामि. —(l. 15) Ñ2 V2 B1.2.4 D6 तत्र ( for तस्य ). —(l. 16) Ñ2 V2 -रूपं ( for -रूपश्च ). B1.4 व्यक्तं स्वरूपश्च; B2 व्यक्तं च रूपं च. —(l. 17) Ñ2 V2 B1.2.4 D6 नमोस्तु रुद्राय तथैव वज्रिणे( B1.4 चक्रिणे ). —(l. 19) Ñ2 V2 B1.2.4 D6 अनेन वाक्यं यदिहाद्य कीर्तितं. —(l. 20) Ñ2 V2 B1.2.4 D6 तन्निखिलं तथास्तु मे( B1.4 ममास्तु वै ). ]

—Ñ2 V2 B1.2.4 D6 further cont.; B3 cont. after 696*; Ś1 Ñ1 D1-4.10.11 ins. after 39:

697* तं पुष्पवर्षैरभिवर्षमाणं
महाबलं तत्र तदा निषण्णम् ।
कौतूहलाच्छोकपरिप्लुताङ्गी
सीताभ्यगच्छत्त्वरिता तदानीम् ।

[ (l. 1) Ś1 Ñ1 B1.4 D10.11 अभिवृष्यमाणं; D1.3 अवकीर्यमाणं; D4 अभिषिच्यमाणं ( for अभिवर्षमाणं ). —(l. 2) D1 निषक्तं ( for निषण्णम् ). —(l. 3) D1 कुतूहलाच्. Ś1 D10 कुतूहलाद्धर्षपरिप्लुताक्षी; D11 कौतूहली धर्ष°. —(l. 4) D1 [अ]चि-; D3 [अ]वि ( for [अ]भि- ). V2 [अ]थ गच्छत्. Ś1 त्वरितं ( for °ता ). Ś1 D10 समीपं; Ñ1 D1-4.11 हरीशं ( for तदानीम् ). ]

Colophon: B3 om.; D5 reads colophon in marg. —*Sarga name*: Ś1 हनूमद्भाषणं; Ñ1 हनूमत्सीतासंलापः; Ñ2 V2 B1.2 D6.10 हनूमत्संभाषणं; B4 हनूमदाभाषणं; D1.3 सीताविश्वास( D3 °सः )नः; D2.11 हनुमद्वाक्यं; D4 अशोकवनिकाप्रवेशे हनुमद्वाक्यं. —*Sarga no.* ( figures, words or both ): Ñ1 D1.2.4.10.11 om.; Ś1 30; Ñ2 B1.2 D6 31; V2 22; B4 D3.5.7-9 T G M1.3 34; M2 33. —After colophon, G concludes with श्रीरामाय नमः.

## 33

V1 illeg. for Sarga 33 ( except 76[ab] and 77[ab] ( followed by 746* ) ( cf. v.l. 5.30.3 ). B3 continues the previous Sarga. M2 begins with श्रीरामाय नमः.

1 D5 damaged for 1-20. —[a]) D1 तं तु राममयं दृष्ट्वा. —[b]) Ñ2 V2 B D1-4.6.10.11 T1 G1 M1.3 वानरर्षभं ( for °र्षभात् ). —[c]) G1.3 M2 मधुरं ( for वचनं ). Ś1 Ñ V2 B D4.6.10 तत्त्वम्; D1.3 शांतम्; D2.11 सीता; T3 सम्यग्; G3 सौम्यम् ( for सान्त्वम् ). —[d]) D2 प्रियं; D11 त्विदं ( for इदं ). D9 reads मधुरया गिरा in marg. —After 1, D3 ins.:

698* ततः संजातविश्रम्भा सीता शशिनिभानना ।
हरिवीरमुवाचेदं वाक्यं कमललोचना ।

2 D5 missing ( cf. v.l. 1 ). —[a]) B2-4 G1.3 कुतो ( for क्व ते ). T2 संयोगः ( for संसर्गः ). —[b]) B2 जानाति ( for °नासि ). —[c]) D4 om. ( hapl. ) नराणां. Ś1 Ñ1 B3 D10 नराणां वानराणां ( by transp. ).

3 D5 missing ( cf. v.l. 1 ). Ñ2 V2 B1-3 D6 om. 3. —[a]) D2.4.11 रामस्य यानि (by transp.); D1.3.7.9 चिह्नानि; Cv.m.g as in text ( for लिङ्गानि ). M1 लिंगानि रामस्य ( by transp. ). —[b]) Ñ1 महात्मनः; T2 * वानरः G2 च यानि वै ( for च वानर ). —[c]) D8.11 G1 M1.2 त्वमाचक्ष्व. —[d]) Ś1 D10 मे शंका ( for मां शोकः ). D9 reads समाविशेत् in marg.

4 D5 missing ( cf. v.l. 1 ). Ñ1 illeg. for 4—29[b]. —[b]) D7-9 तस्य च ( for रामस्य ). Ś1 कीर्तनं; D4 वानर

G. 5.32.4
B. 5.35.5
L. 5.29.4

एवमुक्तस्तु वैदेह्या हनूमान्मारुतात्मजः ।
ततो रामं यथातत्त्वमाख्यातुमुपचक्रमे ॥ ५
जानन्ती बत दिष्ट्या मां वैदेहि परिपृच्छसि ।
भर्तुः कमलपत्राक्षि संस्थानं लक्ष्मणस्य च ॥ ६
यानि रामस्य चिह्नानि लक्ष्मणस्य च यानि वै ।
लक्षितानि विशालाक्षि वदतः शृणु तानि मे ॥ ७
रामः कमलपत्राक्षः सर्वभूतमनोहरः ।
रूपदाक्षिण्यसम्पन्नः प्रसूतो जनकात्मजे ॥ ८
तेजसादित्यसंकाशः क्षमया पृथिवीसमः ।
बृहस्पतिसमो बुद्ध्या यशसा वासवोपमः ॥ ९
रक्षिता जीवलोकस्य स्वजनस्य च रक्षिता ।
रक्षिता स्वस्य वृत्तस्य धर्मस्य च परंतपः ॥ १०
रामो भामिनि लोकस्य चातुर्वर्ण्यस्य रक्षिता ।
मर्यादानां च लोकस्य कर्ता कारयिता च सः ॥ ११
अर्चिष्मानर्चितोऽत्यर्थं ब्रह्मचर्यव्रते स्थितः ।
साधूनामुपकारज्ञः प्रचारज्ञश्च कर्मणाम् ॥ १२

---

(for कीदृशम्). —$^{c}$) G1 कथमूरुः कथं बाहुर्. —After 4, D11 ins.:

699* हस्तपादानि मुख्यानि यादृशानि तथैनयोः ।

**5** D5 missing (cf. v.l. 1). Ñ1 illeg. for 5 (cf. v.l. 4). —$^{ab}$) D3 G3 स (for तु). Ñ2 V2 B1.3.4 D6 हनुमान्वैदेह्या. M1 पवनात्मजः (for मारुता°).

**6** D5 missing (cf. v.l. 1). Ñ1 illeg. for 6 (cf. v.l. 4). —$^{a}$) D2.4.11 जानाना; M2 जानकी (for जानन्ती). T1.3 G3 M1 यदि (for बत). D1 जानामि नाम; D3 जानमानापि (for जानन्ती बत). Ś1 D10 वैदेही (for दिष्ट्या मां). Ñ2 V2 B D6 जानासि (B2–4 °सि) परमं (Ñ2 पुरुषं) दिष्ट्या. —$^{b}$) Ś1 D10 दिष्ट्या मां; Ñ2 V2 B D6 यन्मां त्वं; D1 G1.3 वैदेही (for वैदेहि). Ś1 D1.10.11 परिपृच्छति (for °सि). —D1 om. (hapl.?) $6^{d}$–$7^{c}$. —After 6, Ñ2 D6 read $10^{ab}$ for the first time, repeating it in its proper place.

**7** D5 missing (cf. v.l. 1). Ñ1 illeg. for 7 (cf. v.l. 4). D1 om. $7^{abc}$ (cf. v.l. 6). B1–3 om. 7–9. D6 om. 7. —$^{a}$) D2–4.11 देवि (for यानि). Ñ2 लक्ष्याणि; V2 लक्ष्माणि; B4 D2–4.11 लिंगानि (for चिह्नानि). T2 चिह्नानि रामस्य (by transp.). —$^{b}$) D2.4.11 मे (for वै). —$^{c}$) D4 T2 लक्षणानि; D10 ललितानि (for लक्षितानि). Ñ2 V2 विशालाक्षि समस्तानि. —$^{d}$) T2 वै (for मे). Ś1 Ñ2 V2 B4 D1–4.10.11 तानि वै (Ś1 B4 D1.3.10 मे) शृणु तत्त्वतः.

**8** D5 missing (cf. v.l. 1). B1–3 om. 8 (cf. v.l. 7). Ñ1 illeg. for 8 (cf. v.l. 4). B4 om. 8–9. —$^{b}$) M3 -सत्त्व- (for -भूत-). Ś1 Ñ2 V2 D6 -हिते रतः; D4 -मनोरमः (for -मनोहरः). D7–9 पूर्णचंद्रनिभाननः. —After $8^{ab}$, Ś1 D10.11 ins.:

700* गुणवाञ्शीलसम्पन्नः सर्वलोकहिते रतः ।

[D11 रूप- (for शील-). Ś1 सर्वभूतमनोरमः (for the post. half).]

**9** D5 missing (cf. v.l. 1). Ñ1 illeg. for 9 (cf. v.l. 4). B om. 9 (cf. v.l. 7 and 8). —$^{a}$) D11 दिव्य- (for [आ]दित्य-). —$^{b}$) Ñ2 V2 D6 सदृशः क्षितेः (for पृथिवीसमः. —D2 om. $9^{c}$–11. —$^{d}$) D9 * * वोपमः.

**10** D5 missing (cf. v.l. 1). Ñ1 illeg. for 10 (cf. v.l. 4). D2 om. 10 (cf. v.l. 9). D1.11 om. (hapl.) $10^{ab}$. Ñ2 D6 read $10^{ab}$ for the first time after 6, repeating it here. cf. 5.29.6. —$^{a}$) Ś1 D1.3.10 (repeats erroneously वंशस्य) स्वस्य वंशस्य (for जीवलोकस्य). —T2 om. (hapl.) $10^{bc}$. —$^{b}$) G3 M2.3 [अ]भि- (for च). Ñ2 (both times) V2 B D6 (both times) धर्मस्य परि-; D1 जनकस्य च (for स्वजनस्य च). B1 om. $10^{c}$–11. —Ś1 D10 om. (hapl.) $10^{c}$–$11^{b}$. Ñ2 V2 B2–4 D3.6 om. $10^{cd}$ —$^{c}$) D1 जीवलोकस्य; D1.9.11 G1 स्वस्य वंश (D9 G1 धर्म)स्य (for स्वस्य वृत्तस्य). —$^{d}$) G1 स्ववृत्तस्य (for धर्मस्य च). —After 10, D1.3 read 14 and $20^{ab}$ respy.

**11** D5 missing (cf. v.l. 1). Ñ1 illeg. for 11 (cf. v.l. 4). B1 D2 om. 11 (cf. v.l. 10 and 9). Ś1 D10 om. $11^{ab}$ (cf. v.l. 10). —$^{a}$) D11 भाविनि (for भामिनि). D3.4.11 सर्वस्य; T1.3 लोकेस्मिन्; Ck.t as in text (for लोकस्य). —$^{b}$) D1 शत्रोर्वर्णस्य (corrupt); D11 G1.2 M3 चातुर्वर्णस्य (for चातुर्वर्ण्यस्य). —T2 om. (hapl.?) $11^{c}$–$13^{b}$. —$^{c}$) D4 लोकानां (for लोकस्य). —$^{d}$) Ś1 D1.3.4.10.11 स्थापयिता; Ck.t as in text (for कारयिता). D11 हि (for च). D3 यः (for सः). —For 11, Ñ2 V2 B2–4 D6 subst. and read after 12:

701* यथास्थानं च लोकस्य भर्ता स्थापयिता च सः ।
दृढभक्तिर्मृदुर्दान्तः सर्वभूतहिते रतः ।

[(l. 1) B4 दाता दांतश् (for यथास्थानं). B2 लोकानां (for लोकस्य). B4 च स्थापिता (for स्थापयिता). —B2.3 om. l. 2. —(l. 2) B4 मृदुः ख्यातः (for मृदुर्दान्तः).]

—Thereafter Ñ2 V2 B2–4 D6 read $16^{ab}$.

**12** D5 missing (cf. v.l. 1). Ñ1 illeg. for 12 (cf. v.l. 4). T2 om. 12 (cf. v.l. 11). Ñ2 V2 B transp. 12 and 13. —$^{ab}$) Ś1 D10 अर्चितश्चायं; D1.3 अर्चित-

राजविद्याविनीतश्च ब्राह्मणानामुपासिता ।
श्रुतवाञ्शीलसम्पन्नो विनीतश्च परंतपः ॥ १३
यजुर्वेदविनीतश्च वेदविद्भिः सुपूजितः ।
धनुर्वेदे च वेदे च वेदाङ्गेषु च निष्ठितः ॥ १४
विपुलांसो महाबाहुः कम्बुग्रीवः शुभाननः ।
गूढजत्रुः सुताम्राक्षो रामो देवि जनैः श्रुतः ॥ १५
दुन्दुभिस्वननिर्घोषः स्निग्धवर्णः प्रतापवान् ।
समः समविभक्ताङ्गो वर्णं श्यामं समाश्रितः ॥ १६
त्रिस्थिरस्त्रिप्रलम्बश्च त्रिसमस्त्रिषु चोन्नतः ।
त्रिवलीवांस्त्र्यवनतश्चतुर्व्यङ्गस्त्रिशीर्षवान् ॥ १७

G. 5. 32. 12
B. 5. 35. 18
L. 5. 29. 18

श्चान्यैर्; D2 T1.3 G1 M1 अर्चितो नित्यं ( D2 रामः ); D4.11 अर्चितव्योन्यैर् ( for अर्चितोऽस्यर्थं ). Ś1 D1–4.10.11 ब्रह्म-चारि-; Cr.m.g.k.t as in text ( for °चर्य- ). D3 M1.2 -व्रतोदितः; Cr.m.g.k.t as in text ( for -व्रते स्थितः ). Ñ2 V2 B D6 अर्चिता चार्चनीयानां ब्रह्मचारी दृढव्रतः.—$^{c}$ ) Ś1 Ñ2 V2 B2–4 D2–4.6.10 उपचारज्ञः; D1 स्तुतिवचनं ( sic ); Ck.t as in text ( for उपकारज्ञः ). —$^{d}$ ) D1 प्राग्विनीतश्च; D2 प्रजारक्षः; T1.3 M1 Ck प्रकारज्ञश्च; G1 विचारज्ञश्च; Cv.r.m.g as in text ( for प्रचारज्ञश्च ). B3 D2.3 स ( D2.3 स्व )कर्मणां. —After 12, Ñ2 V2 B2–4 D6 read 701*; while B1 reads 16$^{ab}$.

13 D5 missing ( cf. v.l. 1 ). Ñ1 illeg. for 13 ( cf. v.l. 4 ). T2 om. 13$^{ab}$ ( cf. v.l. 11 ). D6 om. 13. Ñ2 V2 B transp. 12 and 13. —$^{a}$ ) V2 B D1 राजा ( for राज- ). D7–9 -नीत्यां ( for -विद्या- ). Ś1 Ñ2 B D1–4.10.11 -विनीतानां ( for °तश्च ). —$^{b}$ ) D7.9.11 उपासकः; M1 उप-स्थितः ( for उपासिता ). —$^{c}$ ) D7–9 M1 ज्ञानवाञ्; Cg as in text ( for श्रुतवाञ् ). ❀ Cg : शीलसम्पन्नः सदाचार-सम्पन्नः । पूर्वं यज्ञादिकर्मानुष्ठातृत्वमुक्तमिति न पुनरुक्तिः. ❀ —For 13$^{cd}$, Ñ2 V2 B subst. :

702* रामो विद्याविनीतश्च विजेता च परात्रणे ।

[ B4 विद्वान् ( for विद्या- ). V2 B1.2 विनेता ( for °जेता ). ]

—After 13, Ś1 reads 19$^{cdef}$.

14 D5 missing ( cf. v.l. 1 ). Ñ1 illeg. for 14 ( cf. v.l. 4 ). Ś1 om. 14–16. B4 om. 14$^{ab}$. Ñ2 V2 B1–3 D6 transp. $^{ab}$ and $^{cd}$. D1 reads 14 after 10. —$^{a}$ ) Ñ2 B1 D6 ऋजुर्विद्या-; V2 विद्यावेद-; B2 D1.3.4.10.11 ऋजुर्वेद-; Cm.k.t as in text ( for यजुर्वेद- ). D3 ऋजुर्वेदे विनीतात्मा. ❀ Ck : यजुर्वेदविनीतश्चेति चकारादन्येषां समुच्चयः । so also Ct. ❀ —$^{b}$ ) B2 विद्वद्भिश्च ( for वेद-विद्भिः ). V2 B1.3 D2.4.6.10.11 च ( D10 स ) पूजितः ( for सुपू° ). —$^{c}$ ) B2 D4 om. ( hapl. ); M3 Cg वेदेषु ( for वेदे च ). B4 धनुर्वेदेषु वेदेषु. ❀ Cg : वेदेषु यजुर्व्यतिरिक्त-वेदेषु । अनेन स्वस्य यजुर्वेदत्वं सूचितम्. ❀ —$^{d}$ ) D1 सर्वांगेषु ( for वेदाङ्गेषु ).

15 D5 missing ( cf. v.l. 1 ). Ñ1 illeg. for 15 ( cf. v.l. 4 ). Ś1 om. 15 ( cf. v.l. 14 ). —$^{a}$ ) V2 विपुलांगो ( for °सो ). —$^{b}$ ) B1.4 प्रतापवान्; T2 M2 महा-हनुः ( for शुभाननः ). —D1 repeats 15$^{cd}$ after 16$^{ab}$. —$^{c}$ ) B1 दृढजत्रुः; B3 श्यामदेहः; D3.10 गूढजानुः ( sic ); D11 गूढयंत्रः ( for गूढजत्रुः ). D1 ( both times ) स ताम्राक्षोः G2 सुताम्रोष्ठो ( for सुताम्राक्षो ). V2 गूढयंत्रश्च ताम्राक्षो. —$^{d}$ ) D1–4.7–11 नाम ( for देवि ). T1.3 transp. देवि and रामो. D11 जन- ( for जनैः ). Ñ2 V2 B D6 रामः सत्यपराक्रमः.

16 D5 missing ( cf. v.l. 1 ). Ñ1 illeg. for 16 ( cf. v.l. 4 ). Ś1 om. 16 ( cf. v.l. 14 ). Ñ2 V2 B D6 read 16$^{ab}$ after 12 ( except B1 all preceded by 701* ). —$^{a}$ ) D3 -स्वर- ( for -स्वन- ). —After 16$^{ab}$, D1 repeats 15$^{cd}$. —$^{c}$ ) D7.9 समश्च सुविभक्तांगो. —$^{d}$ ) Ñ2 V2 B D1–4.6.10.11 गूढगुल्फ( V2 D11 गुरुगूढ; B1 दृढगुल्फ; B3 गुरुदंढ; D1 गूढव्यूढ; D2.4 गूढो गूढ; D10 गुरुगूंढ )शिरास्थिकः. —After 16, Ñ2 V2 B D1.2.4.6.10.11 read 19$^{cdef}$; while D3 ins. after 16 :

703* किष्कुर्हस्ते वितस्तौ च नल्वं हस्तचतुःशतम् ।
षण्णवत्यङ्गुलो छेदश्चतुष्किष्कुरुदाहृतः ।
देवांशो नृपतिः स स्यात्शस्यते तेन हेतुना ।
दंष्ट्राचतुष्कसंयुक्तं पुरुषास्यं भवेद्यदि ।
आदेहपतनं यावद्भाजनं भवति श्रियः । [5]
अक्षिणी ताररहिते सिताश्च वचनं शुभम् ।
मनः कर्म तथा शुक्लं विधायां यशसा सह ।
जिह्वोष्ठौ तालुनाभे च गुदं नेत्रे स्तनौ नखाः ।
हस्तौ पादौ यशस्यंते पद्माभा दश देहिनाम् ।
कक्षाक्षिवक्षपृष्ठं च मुखं चैव कृकाटिका । [10]
स्त्रीणां वाप्यथवा पुंसां षडुन्नतमिति स्मृतम् ।
व्यासः प्रजानुरागेण व्यासारातिः प्रतापतः ।
व्याप्तलोकत्रयः कीर्त्या त्रिभिर्व्यापी नृपो भवेत् ।
उदरे वलयस्तिस्रो गम्भीरा यस्य देहिनः ।
गम्भीरावर्तनाभिश्च स प्रशस्तो नृपोत्तमः । [15]
गुरुब्राह्मणदेवानां विनतस्त्रिषु शस्यते ।
भयाद्वा वृत्तिहेतोर्वा न नमेदिह कस्यचित् ।

—Thereafter D3 reads 19$^{cdef}$.

17 D5 missing ( cf. v.l. 1 ). Ñ1 illeg. for 17 ( cf. v.l. 4 ). Ś1 Ñ2 V2 B D1–4.6.10.11 transp. $^{ab}$ and $^{cd}$. —$^{a}$ ) Ś1 Ñ2 V2 B D1–4.6.10.11 त्रित्रिकस्; Cv as in text ( for त्रिस्थिरस् ). V2 B त्रिप्रलंबी ( for °लम्बश्च ). —$^{b}$ ) Ś1 D10 महास्यो घननिस्वनः; Ñ2 D6 महा-स्योष्ठहनु( Ñ2 °नू )स्फिकः( Ñ2 °चः ); V2 महास्योचहनुस्वनः;

G. 5. 32. 13
B. 5. 35. 18
L. 5. 29. 19

चतुष्कलश्चतुर्लेखश्चतुष्किष्कुश्चतुःसमः ।
चतुर्दशसमद्वंद्वश्चतुर्दंष्ट्रश्चतुर्गतिः ॥ १८
महोष्ठहनुनासश्च पञ्चस्निग्धोऽष्टवंशवान् ।
दशपद्मो दशबृहत्त्रिभिर्व्याप्तो द्विशुक्लवान् ।
षडुन्नतो नवतनुस्त्रिभिर्व्याप्नोति राघवः ॥ १९
सत्यधर्मपरः श्रीमान्संग्रहानुग्रहे रतः ।
देशकालविभागज्ञः सर्वलोकप्रियंवदः ॥ २०
भ्राता च तस्य द्वैमात्रः सौमित्रिरपराजितः ।
अनुरागेण रूपेण गुणैश्चैव तथाविधः ॥ २१

---

B1.2.4 महान्त्यष्टौ महात्मनः; B3 महास्यौष्ठहनुश्च सः; D1.4 महास्योष्ठो महास्वनः; D2 महद्दौष्ठमहास्वनः; D3.11 महास्योष्ठहनुस्वनः. —After $17^{ab}$, D7-9 S ins.:

704* त्रिताम्रस्त्रिषु च (D9 *) स्निग्धो गम्भीरस्त्रिषु नित्यशः ।

—c) T3 Ct त्रिवलीमांस् ; M3 त्रिवशीवांस् ; Cv.r.m.g.k as in text ( for त्रिवलीवांस् ). Ś1 D10 विनीतश्च; D1 त्रिवीनस्तु (sic); D3 त्रिविनतश्; Cv as in text (for र्‍यवनतश् ). Ñ2 V2 B D4.6 त्रिवलीक ( D4 °माँ ) स्त्रिविनतश् ( D6 °नतश्च ); D11 त्रिवली च त्रिविनतश्. —d) T2 चतुर्दंतस् ; G3 चतुर्वर्गस् ; Cv as in text ( for °र्व्यङ्गस् ). Ś1 Ñ2 V2 B2.4 D1–4.6.10.11 चतुर्गंधस ( V2 °र्दंतस् ; B4 °स्कंदस् [sic] ) त्रिकालवित् ; B1.3 चतुर्व्यंग ( B3 °दश ) त्रिविष्ठितः.

8 a) Ś1 Ñ1 बहु-; Ñ2 V B D6 च (V2 तु) स-; D11 मंत्र- (for बद्ध-). —b) Ś1 Ñ1 D1–4.6.8.10 G1 -भूषितैः (for -रूषितैः). —c) D7.9 M1 भीमैः (for पीनैः). Ś1 Ñ V B D1–4.6.10.11 भ्रा (V2 रा) जमानं शुभैः (V B भुजैः) पीनैः (Ś1 Ñ D10 °तैः).

9 a) Ñ1 महद्भिः (for महति). D2 M3 स्फटिकैः; D11 स्फाटिकैस्. D9.11 चित्रं (D11 °त्रैः) (for चित्रे). G1 स्फाटिकैः-

G. 5. 45. 9
B. 5. 49. 10
L. 5. 45. 10

अलंकृताभिरत्यर्थं प्रमदाभिः समन्ततः ।
वालव्यजनहस्ताभिरारात्समुपसेवितम् ॥ १०
दुर्धरेण प्रहस्तेन महापार्श्वेन रक्षसा ।
मन्त्रिभिर्मन्त्रतत्त्वज्ञैर्निकुम्भेन च मन्त्रिणा ॥ ११
उपोपविष्टं रक्षोभिश्चतुर्भिर्बलदर्पितैः ।
कृत्स्नैः परिवृतं लोकं चतुर्भिरिव सागरैः ॥ १२
मन्त्रिभिर्मन्त्रतत्त्वज्ञैरन्यैश्च शुभबुद्धिभिः ।
अन्वास्यमानं सचिवैः सुरैरिव सुरेश्वरम् ॥ १३
अपश्यद्राक्षसपतिं हनूमानतितेजसम् ।
विष्ठितं मेरुशिखरे सतोयमिव तोयदम् ॥ १४
स तैः संपीड्यमानोऽपि रक्षोभिर्भीमविक्रमैः ।
विस्मयं परमं गत्वा रक्षोधिपमवैक्षत ॥ १५
भ्राजमानं ततो दृष्ट्वा हनुमान्राक्षसेश्वरम् ।
मनसा चिन्तयामास तेजसा तस्य मोहितः ॥ १६
अहो रूपमहो धैर्यमहो सत्त्वमहो द्युतिः ।
अहो राक्षसराजस्य सर्वलक्षणयुक्तता ॥ १७
यद्यधर्मो न बलवान्स्यादयं राक्षसेश्वरः ।
स्यादयं सुरलोकस्य सशक्रस्यापि रक्षिता ॥ १८

---

श्चित्ररत्नैश्च. —$^{b}$) Ñ2 V B रूप-; D6 रौप्य- ( for रत्न-). Ś1 D7–10 -चित्रिते; Ñ1 -संभृते; B3 -संस्थिते; D1 -संवृते; D4.11 -संवृतैः ( for -संस्कृते ). —$^{c}$) Ñ2 V B D6 -[ उ ]-पेते ( for -[ आ ]स्तीर्णे ). M1 उत्तमास्तरणैस्तीर्णे. —Note hiatus between $^{c}$ and $^{d}$. —$^{d}$) Ñ1 D1.2.4.5.7–9 S सू( D8 द्यु )पविष्टं (all to avoid hiatus).

10 $^{c}$) B2 D1 व्याल- ( for वाल- ). —$^{d}$ ) T3 समभिसेवितं. Ś1 Ñ V B1.3.4 D3.6.10 स्त्रीभिः समुपवीजि( Ś1 Ñ °जीवि)तं; B2 स्त्रीभिश्च परिवीजितं; D1.4 तन्वंगीभिः सुवीजितं; D2.11 T1 स्त्रीभिः स( T1 आरात्स )मभिवी( D11 °पू )जितं.

11 $^{a}$ ) D4 दुर्धर्पेण; D10 अधरेण ( for दुर्धरेण ). Ñ2 V B D6 महोदरप्रहस्ताभ्यां. —$^{cd}$ ) Ñ1 रक्षसा ( for मन्त्रिणा ). Ñ2 V B1–3 D6 तथैव रणशूरेण निकुंभेन महात्मना.

12 $^{a}$ ) Ñ1 B3 अथोपविष्टं; V2 D10 तपो°; B4 D1–4 उपास्यमानं; T2.3 M3 सुखो° ( for उपो° ). T1.3 G2 सचिवैश् ( for रक्षोभिश् ). —$^{b}$ ) D11 बहुभिर् ( for चतुर्भिर् ). Ñ2 V B D6.7.9 -दर्पितं ( for -दर्पितैः ). Ś1 D10 बलिभिर्भीमविक्रमैः; Ñ1 D1.4 सततं( Ñ1 बलिभिर् ) बलवत्तरैः. —$^{c}$ ) Ś1 Ñ V B D1.3.4.6.7.9–11 T1 M2 Ck.t कृत्स्नं ( for कृत्स्नैः ). D2 T3 लोकैश् ; D11 लोके; Ck.t as in text ( for लोकं ). D5.8 T2 G M1.3 कृत्स्नः( T2 M1 °त्स्नैः; G2.3 °त्स्नं ) परिवृतो लोकश्. —$^{d}$ ) B2 इव सागरः; D2 परिसागरैः.

13 D6 om. 13.—$^{a}$) B4 चतुर्भिर् ( for मन्त्रिभिर् ). ❀ Cr : मन्त्रिभिः प्रशस्तमन्त्रयुक्तैः। अतः सचिवैरिति न पौनरुक्त्यम् ।; so also Cg. ❀ —$^{b}$ ) D7–9 T1 शुभदर्शिभिः; T2 G2 बहुबुद्धिभिः; G3 बहुभिर्बुधैः ( for शुभबुद्धिभिः ). Ñ2 V B अमात्यैः शुभदर्शनैः. —For $13^{ab}$, Ś1 Ñ1 D1–4.10.11 subst. :

1028* ताभ्यां मन्त्रार्थविद्भ्यां च सारणेन शुकेन च ।

[ Ś1 Ñ1 D10 सुमंत्र- ( for मन्त्रार्थ- ). D11 सागरेण ( for सारणेन ). Ś1 Ñ1 D10 समेतं( Ñ1 रणेन ) शकुनेन च ( for the post. half ). ]

—$^{c}$ ) Ś1 D10 आत्मसामान्य-; D2.7.9 T G1 आश्वा( D3 उपा )स्य° ( for अन्वास्यमानं ). M3 रक्षोभिः ( for सचिवैः ). —$^{d}$ ) Ñ2 V B महेश्वरं ( for सुरे° ).

14 G2 om. ( hapl. ) $14 - 16^{b}$.—$^{b}$ ) Ñ V B1.2.4 D2.3.6 G3 M1 अमितौजसं; B3 कपिकुंजरः; D1.4 इति तेजसं ( for अतितेजसम् ). —$^{c}$ ) Ś1 D1–4.10.11 धिष्ठितं; Ñ V1 B D6 वेष्टितं; V2 विस्मितं ( for विष्ठितं ). Ñ2 B2.4 D2.6 मेरुशिखरैः. —$^{d}$ ) D6 तोपरं (sic) ( for तोयदम् ). —After 14, D8 reads $16^{cd}$ for the first time, repeating it in its proper place.

15 G2 om. 15 ( cf. v.l. 14 ). —$^{a}$ ) Ś1 Ñ V B D1–4.6.10.11 बंधनैः ( for स तैः सं- ). —$^{b}$ ) Ś1 D10 -कर्मभिः ( for -विक्रमैः ). —$^{c}$ ) B3 ज्ञात्वा ( for गत्वा ). —$^{d}$ ) Ñ2 V B D6 रक्षःपतिम्. D3 उदैक्ष्यत ( for अवैक्षत ).

16 G2 om. $16^{ab}$ ( cf. v.l. 14 ). D8 repeats $16^{cd}$ here ( cf. v.l. 14 ). —$^{d}$ ) Ñ1 D1–4.11 G2 त( Ñ1 चा )स्य विस्मितः ; Ñ2 V2 B2 D6 मोहितस्तदा; B3 तस्य मारुतिः ( for तस्य मोहितः ).

17 D2 reads $17^{ab}$ in marg. —$^{a}$ ) Ś1 Ñ1 B1 D1.4.10 वीर्यम् ( for धैर्यम् ). B4 D2.3.11 अहो वीर्यमहो रूपम्( D3 सत्त्वम् ). —$^{b}$ ) D3 रूपम् ( for सत्त्वम् ). Ś1 Ñ1 B4 D1–4.10.11 बलं ( for द्युतिः ). —$^{d}$ ) Ś1 Ñ1 B4 D1–4.10.11 -संपदः; V2 B3 D6 G3 M1 -संयुता ( for -युक्तता ).

18 $^{a}$ ) Ś1 Ñ V B D1–4.6.10.11 यदि नाधर्मबहुलः ( Ñ2 V B1.2[ m. also ].3 D6 °परवान् ; B2 °रतिमान् ; D4 °बहुभिः ). —$^{cd}$ ) B1 नर-; B2 सर्व-; D2 स्वर्ग- ( for सुर- ). D9 om. स्य सशक्र. Ś1 Ñ1 B4 शक्रस्यापि च( B4 °स्याभि- ); D3 Ñ2 V B1–3 D6 स्वर्लोकस्यापि; D1.4 सशक्रस्याभि-; D3 शत्रुः कस्यापि ( for सशक्रस्यापि ). —After 18, D5.7–9 S ins. :

1029* अस्य क्रूरैर्नृशंसैश्च कर्मभिर्लोककुत्सितैः ।

[ M1 रौद्रैर् ( for क्रूरैर् ). ]

तेन बिभ्यति खल्वस्माल्लोकाः सामरदानवाः ।
अयं ह्युत्सहते क्रुद्धः कर्तुमेकार्णवं जगत् ॥ १९

इति चिन्तां बहुविधामकरोन्मतिमान्कपिः ।
दृष्ट्वा राक्षसराजस्य प्रभावममितौजसः ॥ २०

इति श्रीरामायणे सुन्दरकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

## ४८

तमुद्वीक्ष्य महाबाहुः पिङ्गाक्षं पुरतः स्थितम् ।
रोषेण महताविष्टो रावणो लोकरावणः ॥ १
स राजा रोषताम्राक्षः प्रहस्तं मन्त्रिसत्तमम् ।
कालयुक्तमुवाचेदं वचो विपुलमर्थवत् ॥ २
दुरात्मा पृच्छ्यतामेष कुतः किं वास्य कारणम् ।
वनभङ्गे च कोऽस्यार्थो राक्षसीनां च तर्जने ॥ ३

G. 5. 46. 3
B. 5. 50. 5
L. 5. 46. 3

---

19 B3 om. 19.—[a]) D7.9 T1 सर्वे; Cv.m.g as in text; Ctp के न (for तेन). Ś1 D10 तेन खल्वद्य बिभियुर् (D10 °हुर्); Ñ1 तेनास्य बिभ्यति खलु; Ñ2 V B1.2 D6 त्रसंति तेन खल्वस्माल्; B4 बिभ्यत्यस्मात्प्रवीरास्ते; D1.4 बिभ्यत्यस्माद्धि वीराद्धि; D2 तेन खल्वस्य विभ्रांता; D3 बिभ्यत्यस्माद्‌तो वीराल्; D8 के न बिभ्यति खल्वस्माल्; D11 बिभ्यत्यतस्माद्वीरात्तु (sic). ※ Ct : 'के न बिभ्यति' इति पाठे के नेति पदच्छेदः. ※—[b]) Ś1 Ñ V1 B1.2.4 D1.4.6.10.11 स (Ñ2 B1.2 D6 सा)सुर- (for सामर-). D2.3 देवाश्चा(D3 लोकाः सा)सुरमानवाः.—[c]) Ś1 Ñ1 V2 B4 D1.4.10.11 उत्सहते. Ś1 Ñ1 D1.4.10.11 वीरः (for क्रुद्धः).—[d]) D1.4 स्मर्तुम् (for कर्तुम्). Ś1 Ñ1 B4 D1–4.10.11 एकायनं (for °र्णवं).

20 B4 om. 20.—[a]) D6 प्रतिचिंतां च विविधां.—[b]) B3 चकार (for अकरोन्). D5 T2 G2.3 M3 हरिः (for कपिः). Ś1 Ñ V B1.2 D1–4.6.10.11 चकार हनुमांस्तदा (Ñ2 V B1.2 D6 °मान्कपिः).—[d]) B2 प्रकारम् (for प्रभावम्).—After 20, Ś1 Ñ2 B3 D2.6.10.11 ins.:

1030* गाम्भीर्यं च श्रियं चैव मनसा विस्मयं गतः ।

[D6 प्रियं (for श्रियं). Ñ2 B3 D2.6 च (B3 [अ]पि; D6 स) विसिस्मिये (for विस्मयं गतः).]

Colophon.—*Sarga name*: Ś1 D10 हनुमद्दर्शनं; Ñ V B D1–4.6.11 रावणदर्शनं (D1.2.4.11 °नः).—*Sarga no.* (figures, words or both): Ñ1 D1.2.4.10.11 om.; Ś1 M2 48; V2 37; B1.2 45; B3 44; B4 D3 50; D5.7–9 T G M1.3 49.—After Colophon, D2 concludes with रामः; G with श्रीरामाय नमः.

### 48

M2 begins with श्रीरामाय नमः.

1 [a]) B1 D1.2.8 तमुदीक्ष्य; B3 D10.11 समुदी (B3 °द्वी)-क्ष्य; Cg as in text (for तमुद्वीक्ष्य). B1.3 D6 T1 महाबाहुं.—[b]) D4 दूरतः (for पु°).—[c]) M3 कोपेन (for रोषेण).—[d]) Ñ1 D1–4 शत्रुरावणः; Ñ2 V B D6.11 शत्रुताप (D11 °सूद)नः (for लोकरावणः).—After 1, D5–9 S ins.:

1031* शङ्काहतात्मा दध्यौ स कपीन्द्रं तेजसा वृतम् ।
किमेष भगवान्नन्दी भवेत्साक्षादिहागतः ।
येन शप्तोऽस्मि कैलासे मया संचलिते पुरा ।
सोऽयं वानरमूर्तिः स्यात्किंस्विद्बाणोऽपि वासुरः ।

[(l. 1) G2 शंकागतात्मा. D8 च (for स).—(l. 2) D5 इव (for इह).—(l. 3) D5 संचालितः; D6–9 प्रहसिते (D8 °तं); G1 M3 संचालि(M3 °रि)ते; G3 Ck चंच° (for संचलिते).—(l. 4) T2 किं स्याद् (for किंस्विद्). D8 महासुरः (for ऽपि वा°).]

2 [a]) Ñ2 V B D6 संजात- (for स राजा). V1 B2–4 -रोषस; T3 कोप- (for रोष-).—[b]) Ś1 Ñ2 V B1.2.4 D1.2.4.10.11 रक्षसां वरं; Ñ1 रक्षसां पतिं; B3 D3 राक्षसेश्वरं (B3 °रः) (for मन्त्रिसत्तमम्).—[c]) Ś1 कलयंतम्; D3 काले युक्तम् (for कालयुक्तम्). G3 damaged from दं up to विपु in [d].—[d]) G3 अर्थवित् (for °वत्). Ś1 Ñ V B D1–4.6.10.11 वचो (D2.6 वाचा) विपुलविक्रमः.

3 [a]) D2.6 दुष्टात्मा (for दुरा°).—[b]) Ś1 B4 D1.2.4.10.11 कस्त्वं (B4 कश्च) किं वा (D1.4 किं च; D11 वा किं) प्रयोजनं; Ñ V B1–3 D2.6 कः किं चास्य (V B1 [marg.

G. 5. 46. 4
B. 5. 50. 7
L. 5. 46. 4

रावणस्य वचः श्रुत्वा प्रहस्तो वाक्यमब्रवीत् ।
समाश्वसिहि भद्रं ते न भीः कार्या त्वया कपे ॥ ४

यदि तावत्त्वमिन्द्रेण प्रेषितो रावणालयम् ।
तत्त्वमाख्याहि मा ते भूद्भयं वानर मोक्ष्यसे ॥ ५

यदि वैश्रवणस्य त्वं यमस्य वरुणस्य च ।
चारु रूपमिदं कृत्वा प्रविष्टो नः पुरीमिमाम् ॥ ६

विष्णुना प्रेषितो वापि दूतो विजयकाङ्क्षिणा ।
न हि ते वानरं तेजो रूपमात्रं तु वानरम् ॥ ७

तत्त्वतः कथयस्वाद्य ततो वानर मोक्ष्यसे ।
अनृतं वदतश्चापि दुर्लभं तव जीवितम् ॥ ८
अथवा यन्निमित्तस्ते प्रवेशो रावणालये ॥ ९
एवमुक्तो हरिवरस्तदा रक्षोगणेश्वरम् ।
अब्रवीन्नास्मि शक्रस्य यमस्य वरुणस्य वा ॥ १०
धनदेन न मे सख्यं विष्णुना नास्मि चोदितः ।
जातिरेव मम त्वेषा वानरोऽहमिहागतः ॥ ११
दर्शने राक्षसेन्द्रस्य दुर्लभे तदिदं मया ।
वनं राक्षसराजस्य दर्शनार्थे विनाशितम् ॥ १२

---

after corr. ] चात्र; D2.6 वास्य ) प्रयोजनं. —Ñ1 om. $3^{cd}$. —$^{c}$) T3 G2.3 वनभंगेन ( for °भङ्गे च ). Ś1 D3.10 वनं भग्नं किमर्थं च; Ñ2 V B D1.2.4.6.11 वनभंगः( B4 D4 °गं ) किमर्थं वा( D1.4.11 °र्थं च; D2 °र्थोयं ). —$^{d}$) Ś1 Ñ2 V B1.2 D G1 राक्षसानां. Ś1 V B D1–4.10.11 तर्जनं; Ñ2 D6 मर्दनं ( for तर्जने ). —After 3, D5.7–9 S ins.:

1032* मत्पुरीमप्रधृष्यां वै गमने किं प्रयोजनम् ।
　　आयोधने वा किं कार्यं पृच्छयतामेष दुर्मतिः ।

[ (l. 1) G3 गमनं ( for °ने ). ❀ Cv : मत्पुरीमिति कर्तृकर्मणोः कृतीति कर्मणि षष्ठीं रुद्ध्वा द्वितीयैवात्रावतिष्ठते । प्रतिशब्दो वाध्याहार्यः । ; Cr.g : मत्पुरीं प्रतीति शेषः । ; Cm.t : मत्पुरीम् ( Cm °मिति )उद्दिश्येति शेषः । ( Ct : आयोधने किंकरादिभिर्युद्धे । यद्वा मत्पुरीगमने मत्पुरीप्राप्तावित्यर्थः । आर्षः षष्ठ्यभावः । ) ; so also Ck. ❀ ]

4 G3 damaged from वचः in $^{a}$ up to प्रह in $^{b}$. —$^{c}$) Ś1 transp. भद्रं and ते. —$^{d}$) Ś1 D10 कपे त्वया ( by transp. ) ; Ñ1 D1–4 महाकपे.

5 D1.4 om.( hapl. ) 5. —$^{a}$) Ś1 Ñ1 D2.10.11 यदि वा त्वं महेंद्रेण. —$^{b}$) B2.3 राक्षसालयं. —$^{c}$) T3 transp. मा and ते. V B D5.6 T1.2 M3 मा भूत्ते( by transp. ). —$^{d}$) G1 मोक्ष्यते. Ś1 Ñ1 D10.11 भयं वानरसत्तम.

6 $^{a}$) B2 [ ए ]व; M1 [ अ ]हो ( for त्वं ). —$^{b}$) Ś1 Ñ1 V1 B1.3.4 D2–5.8.10 G2.3 वा ( for च ). —$^{c}$) Ś1 D10 त्वं तु; V D3 हरि- ; D2.5 M3 Ck.t चार- ; D8 कपि- ( for चारु ). B2 भूत्वा च कामरूपी च. —$^{d}$) Ñ2 V B D6 प्रविष्टोसि; G1 °ष्टो मत्- ; G3 प्र * * * ( for प्रविष्टो नः ). G2 M2 इतः ( for इमाम् ). Ś1 D1–4.10.11 T2 नगरीमिमां; Ñ1 रावणालयं ( for नः पुरीमिमाम् ).

7 $^{a}$) B3 प्रेरितो ( for प्रेषितो ). B1 D2 वासि; B3 चासि. —$^{b}$) Ś1 Ñ1 V2 D3 लंकां; Ñ2 V1 B D1.2.4.6.10.11 लंका- ( for दूतो ). —$^{d}$) B3 केवलं ( for वानरम् ).

8 $^{a}$) Ñ2 V D6 तत्त्वं च; B M1 तत्त्वं तु( M1 नः ) ( for तत्त्वतः ). Ś1 Ñ1 D1–4.10.11 सत्यं त्वं कथय( D1.4 वानर ) क्षिप्रं. —V2 om. $8^{bc}$. —$^{b}$) D6 मोक्ष्यसे किं विवक्षया; D11 बहुना किं प्रयोजनं. —$^{c}$) Ś1 Ñ B2–4 D2.3.10 ह्यथ; V1 B1 D1.4 ह्यत्र; D6 ह्यस्य; D11 ह्येनं ( for चापि ). —$^{d}$) D11 जीवनं ( for जीवितम् ). V B transp. दुर्लभं and जीवितम्. Ñ2 D6 जीवितं च सुदुर्लभं.

9 $^{a}$) Ñ2 V B D6 किं- ( for यन्- ). Ś1 Ñ V B D1–6.8.10.11 T2 G1 M3 Cr.m.g -निमित्तं; Cv.mp.k.t -निमित्तस् ( as in text ). T2 om. ते. —$^{b}$) V1 B2.3 राक्षसालये. —After 9, Ś1 Ñ1 D1–4.10.11 ins.:

1033* तदेव कथय क्षिप्रं बहुना किं प्रयोजनम् ।

[ D11 ततो वानर मोक्ष्यसे ( for the post. half ). ];
whereas Ñ2 V B D6 ins.:

1034* तदेतत्कथयस्वाद्य मोक्ष्यसे किं विवक्षया ।

10 $^{a}$) G2 M3 हरिश्रेष्ठस्. —$^{b}$) Ñ1 तं राक्षसवरोत्तमं; Ñ2 V B D6 तदा राक्षसपुंगवं; D1–4.10.11 तदा तं राक्षसेश्वरं. —After $10^{ab}$, Ñ2 V B D6 ins.:

1035* समीक्ष्य स महावेगो हनूमान्पवनात्मजः ।
　　धृतिमान्वाक्यसम्पन्नो रावणाय न्यवेदयत् ।

[ (l. 1) Ñ2 स समीक्ष्य ( by transp. ); B2.3 संवीक्ष्य स; D6 समीक्ष्य ( subm. ) ( for समीक्ष्य स ). B1.3 D6 मारुतात्मजः. ]

—$^{c}$) D8 [ अ ]पि ( for [ अ ]स्मि ). Ñ2 D6 ब्रवीमि नाहं ( for अब्रवीन्नास्मि ). —$^{d}$) D9 reads यमस्य in marg. Ś1 Ñ2 V2 D2.6.7.9.11 G1 M2 च; Ck.t as in text ( for वा ).

11 $^{a}$) B2 सौख्यं ( for सख्यं ). —$^{b}$) G3 damaged from स्मि up to जा in $^{c}$. B3 *स्मि( om. hapl. ); B1 नापि; D8 नाभि- ( for नास्मि ). Ñ1 देशितः; B1 D11 नोदितः. —$^{c}$) Ś1 एवं; G3 M1 ( sic ) एषा ( for एव ). Ś1 Ñ1 D1–4.10.11 [ ए ]षा हि; D5 ह्येषा; G3 त्वेव ( for त्वेषा ). Ñ2 V B D6 मम वै जातिरेवेयं( B4 °रूपोयं ).

12 $^{a}$) B2 दुर्लभे; T2 दर्शनं; Cr.m.k.t as in text ( for दर्शने ). —$^{b}$) Ś1( sic ) B2 दर्शने; T2 दुर्लभं; Cm दुर्लभे

ततस्ते राक्षसाः प्राप्ता बलिनो युद्धकाङ्क्षिणः ।
रक्षणार्थं च देहस्य प्रतियुद्धा मया रणे ॥ १३
अस्त्रपाशैर्न शक्योऽहं बद्धुं देवासुरैरपि ।
पितामहादेव वरो ममाप्येषोऽभ्युपागतः ॥ १४
राजानं द्रष्टुकामेन मयास्त्रमनुवर्तितम् ।
विमुक्तो अहमस्त्रेण राक्षसैस्त्वतिपीडितः ॥ १५
दूतोऽहमिति विज्ञेयो राघवस्यामितौजसः ।
श्रूयतां चापि वचनं मम पथ्यमिदं प्रभो ॥ १६

G. 5. 46. 18
B. 5. 50. 19
L. 5. 46. 16

इति श्रीरामायणे सुन्दरकाण्डे अष्टाचत्वारिंशः सर्गः ॥ ४८ ॥

---

(as in text). Ś1 Ñ1 D1.4.10.11 सति यन्; Ñ2 V B1 (*sup. lin.* as in B3).2.4 D2.3.6 सति तन्; B3 यत्तितं (for तदिदं). D11 मम (for मया). D7–9 Ck.t तदिदं दुर्लभं मया. —c) Ś1 D10 वनं च राक्षसेंद्रस्य. —d) Ś1 Ñ B1.2 D2.3.6.8.10 T2 Cm दर्शनार्थं (Ś1 D10 °थ); Ck.t दर्शनार्थे (as in text). D1.4 नाशितं दर्शनार्थिना.

13 a) Ñ2 V B1.3.4 D6 ये च; B2 येन; D3 अथ (for ततस्). M2 सर्वे (for प्राप्ता). —b) Ś1 D10 युद्धदुर्मदाः. —c) Ś1 Ñ1 D1–4.10 G2 M3 तु; D11 हि (for च). Ñ2 V B D6 शरीरस्य (for च देहस्य). —d) Ś1 Ñ1 D1–4.10.11 योधितास्ते; B2 (m. as in text).3.4 G1 M1 प्रतियुद्धं; G2 °योद्धा (sic); Cr.m.g.k.t as in text (for प्रतियुद्धा). —G3 damaged from रणे up to पाशै in 14a. Ñ2 V B D6 रणाजिरे; D8 मया कृतं (for मया रणे).

14 G3 damaged for अस्त्रपाशै (cf. v.l. 13). —a) Ś1 B1 शस्त्रपाशैर्; V2 अस्त्रपागेर् (sic). V2 D6 अशक्यो (for न श°). B3 आयसैर्न च शक्योहं. —b) Ñ2 G1.3 बद्धं (sic). Ś1 Ñ1 V1 B D1–4.10.11 अस्त्रायतैर्; Ñ2 D6 अप्यायतैर्; V2 अद्यापि तैर्; Ck.t as in text (for देवासुरैर्). —Ś1 D10 om. 14cd. —c) D5.7 T1.2 Cr.k.t एष; D9 ए* (for एव). Ñ2 V B1.4 D2.6 मया; B2.3 पुरा (for वरो). —d) Ñ1 D11 ह्येषो हि; D1.4 चैवास्मि-; G1 [अ]प्येष हि (for [अ]प्येषोऽभि-). G2 ह्युपस्थितः (for ऽभ्युपागतः). Ñ2 V B D2.6 पुरा (B2.3 मया) लब्धो वरो महान्; D3 ममांतिकमुपागमत्; D7.9 ममापि हि समागतः. —After 14, D3 ins.:

1036* अस्त्रमेतन्मया तस्य माननार्थं प्रतीक्षितम् ।

15 a) D3 रावणं (for राजानं). —b) Ś1 Ñ1 D10.11 न निवा (D10 विचा) रितं; D1.2.4 न निवर्तितं (for अनुवर्तितम्). B4 मया वनमुपाश्रितं. —c) Note hiatus between विमुक्तो and अहम्. Ñ2 V B1–3 D6 चाहम्; B4 D7.9 T1.2 G3 Cm.k.t [ऽ]प्यहम्; D5 T3 G1 M1.3 Cv.r.g ह्यहम्; D3 M2 (all to avoid hiatus) [ऽ]स्म्यहम् (for अहम्). Ś1 Ñ1 D3.10 विप्रमु (Ñ1 °यु) क्तो महास्त्रेण; D1.2.4 विनिर्मु- (D2 °प्रमु) क्तोहमस्त्रेण; D11 विप्रयुक्तोहमस्त्रेण; G2 विमुक्तोहं महास्त्रेण. —d) Ñ1 D1–4.11 रक्षोभिः. Ñ1 परिपीडितः; D1.5.11 T2 M3 त्वभि°; D3 तु नि°; D4 शस्त्र°; D7.9 Ct त्वभिवेदितः; D8 G1.2 M1 Cr अति (D8 G2 °भि) पीडितः (for त्वतिपीडितः). Ś1 B4 D10 रक्षोभिरतिपीडितः; Ñ2 V B1–3 D6 (all with hiatus) इति तद्वि (B2 [m. also] ते वि) दितं च मे. —After 15, B4 ins.:

1037* न मे भयं न मे पीडा नान्यस्मान्मोक्षमिच्छत(:) ।
मत्त एव भयं विद्धि सर्वलङ्कानिवासिनाम् ।

—B4 cont.; while Ñ2 V B1–3 D6 ins. after 15:

1038* प्राकृतोऽपि हि यद्वन्धो मया समनुवर्तितः ।
स कार्यवत्तया राजन्न दौर्बल्याद्वेहि तत् ।

[(l. 1) B3 om.; B4 च (for हि). Ñ2 तद्; B2 मे; B4 मद्- (for यद्). —(l. 2) B4 दौर्जन्याद् (for °र्बल्याद्). Ñ2 V D6 अवेहि.]

On the other hand, D5.7–9 S ins.:

1039* केनचिद्राजकार्येण संप्राप्तोऽस्मि तवान्तिकम् ।

[D7.9 राम-; D3 नाम (for राज-). G3 damaged from प्रा up to तवा. D7.9 (both with hiatus) आगतो (for संप्राप्तो). ❀ Ck.t: 'रामकार्येण' इति (Ct पाठः) पाठः. ❀]

16 a) G1 इह (for इति). D7.9 G2 विज्ञाय. Ś1 Ñ V B D1–4.6.10.11 इह (B3 इति; D2.11 अपि) संप्राप्तो (for इति विज्ञेयो). —b) Ś1 D10 [अ]तितेजसः; T2 G3 महौजसः (for [अ]मितौजसः). D3 रामस्यामिततेजसः. —c) D7.9 एव; D11 वापि (for चापि). —d) Ś1 Ñ1 D1–4.10.11 तथ्यम्; D6 प्राप्यम् (sic); G2 वाक्यम्; M2 सत्यम् (for पथ्यम्). Ś1 Ñ2 V2 B1–3 D3.6.10.11 नृप; Ñ1 ध्रुवं; V1 B4 (marg. also as in Ś1) वचः; D1.2.4 त्वया; D5 विभो (for प्रभो). —After 16, Ś1 Ñ1 V1 D1.4.10.11 ins.; V2 ins. before 5.49.1 (?):

1040* रामो यदाह धर्मात्मा स च राजा हरीश्वरः ।

Colophon: Ñ1 D2 om. (cont. the Sarga). —*Sarga name*: Ś1 D10 हनुमद्वाक्यं; Ñ2 V B D1.4.6 प्रहस्तवाक्यं; D3 हनूमद्वचनं; D11 प्रहस्तं प्रति हनूमद्वाक्यं. —*Sarga no.* (figures, words or both): D1.4.10.11 om.; Ś1 D6 M2 49; V2 38; B1–3 46; B4 D3 51; D5.7–9 T G M1.3 50. —After colophon, G concludes with श्रीरामाय नमः.

## ४९

G. 5. 47. 1
B. 5. 51. 1
L. 5. 47. 1

तं समीक्ष्य महासत्त्वं सत्त्ववान्हरिसत्तमः ।
वाक्यमर्थवदव्यग्रस्तमुवाच दशाननम् ॥ १
अहं सुग्रीवसंदेशादिह प्राप्तस्तवालयम् ।
राक्षसेन्द्र हरीशस्त्वां भ्राता कुशलमब्रवीत् ॥ २
भ्रातुः शृणु समादेशं सुग्रीवस्य महात्मनः ।
धर्मार्थोपहितं वाक्यमिह चामुत्र च क्षमम् ॥ ३
राजा दशरथो नाम रथकुञ्जरवाजिमान् ।
पितेव बन्धुर्लोकस्य सुरेश्वरसमद्युतिः ॥ ४
ज्येष्ठस्तस्य महाबाहुः पुत्रः प्रियकरः प्रभुः ।
पितुर्निदेशान्निष्क्रान्तः प्रविष्टो दण्डकावनम् ॥ ५
लक्ष्मणेन सह भ्रात्रा सीतया चापि भार्यया ।
रामो नाम महातेजा धर्म्यं पन्थानमाश्रितः ॥ ६
तस्य भार्या वने नष्टा सीता पतिमनुव्रता ।
वैदेहस्य सुता राज्ञो जनकस्य महात्मनः ॥ ७
स मार्गमाणस्तां देवीं राजपुत्रः सहानुजः ।
ऋश्यमूकमनुप्राप्तः सुग्रीवेण च संगतः ॥ ८
तस्य तेन प्रतिज्ञातं सीतायाः परिमार्गणम् ।
सुग्रीवस्यापि रामेण हरिराज्यं निवेदितम् ॥ ९

## 49

M2 begins with श्रीरामाय नमः.—Before 1, V2 ins. 1040*.

1 a) D1 महत् (for महा-).—b) Ś1 Ñ V B2–4 D1–4.6.10.11 -पुंगवः; B1 -यूथपः (for -सत्तमः).—G3 damaged from व in c up to वा in d.—c) Ñ1 वाचम्; D10 om. (for वाक्यम्). B4 सत्यवद्; D10 यथावद् (for अर्थ°). Ś1 Ñ V B D1–4.6.10.11 अव्यग्रम्.—d) Ś1 Ñ V B D1–4.6.10.11 उवाच पवनात्मजः.

2 D10 om. from 2b up to हरीश in 2c.—b) D9 एव (for इह). D4 प्रासं (sic) (for प्राप्तस्). D4 तदालयं (sic); D6 तवालये; D7.9 तवांतिके (D9 °कं); T1.3 त्वदंतिकं (for तवालयम्).—c) Ś1 Ñ1 D1–5.7–9.11 M1 राक्षसेश. Ñ2 V B1–3 D6 हरींद्रस्त्वां; B4 कपींद्र°; D1.4.11 हरीशस्य; T3 °स्त्वद्-; Ct as in text (for हरीशस्त्वां).—d) D2 स वै; G2.3 राजा (for भ्राता). Ñ1 D1–4.11 G1 M2 कौशल्यम् (G1 M2 °लम्); Cm.t as in text (for कुशलम्). Ś1 D10 कुशलं परिपृच्छति.

3 a) Ś1 राजन्; Ñ1 D1.2.4.10.11 राज्ञः; B3 प्रभुः (for भ्रातुः). Ñ1 मयादेशं; D3 महा° (for समादेशं). G2 भ्रातुः शृणुष्व संदेशं.—b) B4 कपींद्रस्य (for सुग्रीवस्य).—c) Ś1 D10 धर्मार्थयोर्; Ñ1 धर्मार्थाय (for धर्मार्थोप-). Ś1 Ñ1 D10.11 चैव; D1.2.4 युक्तम्; D3 पथ्यम् (for वाक्यम्). Ñ2 V B धर्मार्थस (B3 °सं)हितं युक्तम्; D6.7.9 T G3 धर्मार्थसहितं वाक्यम्.—d) B2 चान्यत्र (for चामुत्र). Ñ1 D11 चा(D11 वा)क्षयं; Ñ2 चोत्तमं; D1.4 चा(D1 वा)क्षमं; D6 (with hiatus) उत्तमं; T3 च क्षमः; Cg.k.t as in text (for च क्षमम्).

4 b) B1–3 D6 नर- (for रथ-). Ś1 V1 B1.2.4 D2.11 -वाजिनां; Ñ1 -वाजिवान् (for -वाजिमान्).—c) G3 damaged for पितेव. B सर्व- (for बन्धुर्). Ś1 D1–4.10.11 लोकानां (for लोकस्य).—d) D2 -महाद्युतिः; D9.10 -समद्युतिं.

5 a) B3 तेजोस्तस्य (sic); D11 ज्येष्ठस्य च (for ज्येष्ठस्तस्य).—b) Ś1 Ñ V B D1–4.6.10.11 प्रीतिकरः; D5.7.9 M1 प्रियतरः (for प्रियकरः). Ś1 D10 M1 पितुः; Ñ2 V B1.4 D6.11 शुभः; D1.4 सुतः; D3 प्रियः (for प्रभुः).—c) Ś1 Ñ1 B1 D1.2.4.10.11 नियोगान् (Ś1 D10 °गं); D8 M1 निर्देशात् (D8 °श-) (for निदेशान्). Ś1 D10 संप्राप्य; D11 च नि° (hypm.) (for निष्क्रान्तः).—d) Ś1 Ñ V B D1–4.6.10.11 M2 दंडकं वनं (for °कावनम्).

6 b) Ś1 Ñ2 V2 B3 D6.7.9–11 T2 सह (for चापि). Ñ2 V B D6 transp. सीतया and भार्यया.—c) Ś1 Ñ V B D1–4.6.10.11 महर्षिभिरनुक्रांतं.—d) V2 B1.3.4 D4.6.11 धर्म- (for धर्म्यं). D11 -प्रस्थानम् (for पन्थानम्). Ś1 Ñ2 V B1–3 D1–6.10.11 आस्थितः (V2 °तं) (for आश्रितः).

7 a) D7.9 जनस्थाने; G3 वने भ्रष्टा (for वने नष्टा).—b) Ś1 Ñ1 D1–4.10.11 सीता नाम यशस्विनी; Ñ2 V B1.3.4 D6 सीता नाम तपस्विनी; B2 सती सीता तपस्विनी; D7.9 भ्रष्टा सीतेति विश्रुता.—c) Ñ2 V B4 D3.6.8.11 विदेहस्य. D1.4 विदेहराजस्य सुता.

8 a) Ś1 Ñ सं- (for स). D7.9 मार्गमाणस्तु तां देवीं.—b) Ś1 Ñ1 D1.3–5.10.11 -पुत्रीं (for -पुत्रः). D1.3.6.10 महानु(D3 °भु)जः (for सहानुजः).—c) Ś1 गिरिं (for अनु-). T2 -प्राप्य (for -प्राप्तः). D10 ऋष्यमूकगिरिं प्राप्तः.—d) D1.4 महात्मना; D2 वशं गतः; G3 च संगमः; D11 M3 समागतः; Ck.t as in text (for च संगतः). D11 सुग्रीववशमागतः.

9 a) B1.4 तेन तस्य (by transp.).—b) Ñ1 तव (for परि-).—D4 om. (hapl.) 9c–10b.—c) Ś1 Ñ1 V B D1–3.10.11 च; Ñ2 D6 तु (for [अ]पि).—d) T1

ततस्तेन मृधे हत्वा राजपुत्रेण वालिनम् ।
सुग्रीवः स्थापितो राज्ये हर्यृक्षाणां गणेश्वरः ॥ १०

स सीतामार्गणे व्यग्रः सुग्रीवः सत्यसंगरः ।
हरीन्संप्रेषयामास दिशः सर्वा हरीश्वरः ॥ ११

तां हरीणां सहस्राणि शतानि नियुतानि च ।
दिक्षु सर्वासु मार्गन्ते अधश्चोपरि चाम्बरे ॥ १२

वैनतेयसमाः केचित्केचित्तत्रानिलोपमाः ।
असंगगतयः शीघ्रा हरिवीरा महाबलाः ॥ १३

अहं तु हनुमान्नाम मारुतस्यौरसः सुतः ।
सीतायास्तु कृते तूर्णं शतयोजनमायतम् ।
समुद्रं लङ्घयित्वैव तां दिदृक्षुरिहागतः ॥ १४

तद्भवान्दृष्टधर्मार्थस्तपःकृतपरिग्रहः ।
परदारान्महाप्राज्ञ नोपरोद्धुं त्वमर्हसि ॥ १५

न हि धर्मविरुद्धेषु बह्वपायेषु कर्मसु ।
मूलघातिषु सज्जन्ते बुद्धिमन्तो भवद्विधाः ॥ १६

कश्च लक्ष्मणमुक्तानां रामकोपानुवर्तिनाम् ।
शराणामग्रतः स्थातुं शक्तो देवासुरेष्वपि ॥ १७

G. 5. 47. 18
B. 5. 51. 19
L. 5. 47. 17

---

वालि- ; T2 कपि- (for हरि-). Ś1 Ñ V B D1–3.6.10.11 प्रति(V1 °वि)श्रुतं (B2 also in marg. प्रप्रज्ञातं); D9 G3 M1 Ck.t निवेदितुं.

10 D4 om. $10^{ab}$ (cf. v.l. 9). —$^{a}$) Ś1 D10 वने; Ñ V B D1–3.6.11 रणे (for मृधे). —$^{b}$) Ñ2 V1 B1–3 D6 वयस्यं तव(B1 तं च) (for राजपुत्रेण). B4 वयस्यं वालिनं तव. —$^{c}$) Ś1 D10 प्रापितो (for स्थापितो). Ś1 Ñ2 D10 राज्यं. —$^{d}$) Ñ2 V B2–4 D6 हर्यृक्षाधि-. M1 गणेश्वरं. Ś1 D2.10 हर्यृक्षप्रवरागतं(D2 °धिपः); Ñ1 D1.4.11 हर्यृक्षप्लवगाधिपः; D3 हर्यृक्षगणपूजितः. —After 10, D5.7–9 S ins.:

1041* त्वया विज्ञातपूर्वश्च वाली वानरपुंगवः।
स तेन निहतः संख्ये शरेणैकेन वानरः।

[(l. 1) G1 स; Cm.k as above (for च). —(l. 2) T1.3 G2 M3 रामेण (for स तेन). ❀ Cm: स तेन निहत इति पाठः. ❀]

11 B4 om. 11–12; M1 om. $11^{ab}$. —$^{a}$) D1.2.4–6 T2.3 -मार्गण- (for °णे). G1 स सीतामार्गसंसक्तः. —$^{b}$) Ñ2 **संगरः. —D10 om. $11^{cd}$. —$^{d}$) B1 G3 दिशः सर्वान्; D11 सर्वा दिशो (by transp.) (for दिशः सर्वा).

12 B4 om. 12 (cf. v.l. 11). —$^{a}$) B2 D1.4 हरीणां तु; D3 यं कपीनां (for तां हरीणां). —D1 repeats $^{b}$ after $^{c}$. —$^{b}$) Ś1 Ñ V B1–3 D1(both times)-4.6.10.11 प्र(Ñ2 D6 नि; B2 D11 [with hiatus] अ)युतान्यर्बुदानि च (D2 °न्यपि). —Note hiatus between $^{c}$ and $^{d}$. —$^{c}$) B1.3 D3 मार्गंतः (for मार्गन्ते). —$^{d}$) Ñ1 D1.4.5.7–9.11 S (all to avoid hiatus) ह्यधश् (for अधश्). D3 [अ]परे (for [अ]म्बरे). Ś1 D10 सुग्रीवस्याभ्यनुज्ञया; Ñ2 V B1–3 D6 पृथिव्यामपि चांबरे.

13 Ś1 D10 om. 13. —$^{b}$) B4 शौर- (sic) (for तत्र). D3 [अ]नल- (for [अ]निल-). —V1 om. $13^{cd}$. —$^{c}$) B1.4 अचिंत्य- (for असंग-). B2 (m. also as in text) -मतयः (for -गतयः). Ñ1 चान्या; D1.2.4.11 चान्ये; D3 केचिद्; D6 शीघ्रगा (hypm.) (for शीघ्रा). —$^{d}$) Ñ1 D1.2.4.11 महाकाया (for हरिवीरा). D2 -जवाः (for -बलाः).

14 $^{a}$) Ñ1 च (for तु). —$^{c}$) Ś1 Ñ1 D1.4.10 कारणात्; Ñ2 V B D2.6.11 कारणे; G1 M1 च कृते (for तु कृते). V2 (marg. also as in text) D6 पूर्णं; B1 [ऽ]हं तु; B3 वृत्तं (for तूर्णं). D3 सीतार्थमेकवेगेन. —$^{d}$) Ś1 Ñ V B D1–4.6.10.11 योजनानां शतं प्लुतः(B3.4 °तं). —After $14^{cd}$, Ñ2 V B D6 ins.:

1042* तच्छृणुष्व महाराज संदेशं मम सर्वशः।
इहलोके हितं चैव परत्र च सुखावहम्।

[(l. 1) V2 महाभाग (for °राज). B4 सर्वतः. —(l. 2) B3.4 इहलोक-. Ñ2 D6 सुखं चैव; V सुखं पथ्यं (for हितं चैव). B3 परलोक- (for परत्र च). Ñ2 D6 सुखप्रदं (for सुखावहम्).] —Ś1 Ñ V B D1–4.6.10.11 om. $14^{ef}$. —$^{f}$) D7 G2.3 त्वां (for तां). G1 सीतां द्रष्टुमिहागतः. ❀ Cm.k.t : त्वां दिदृक्षुरिहागत इति पाठः (Ck पाङ्कः). ❀ —After 14, D5.7–9 S ins.:

1043* भ्रमता च मया दृष्टा गृहे ते जनकात्मजा।
[D5 दृष्ट्वा (sic) (for दृष्टा).]

15 $^{a}$) Ś1 Ñ1 D1–4.10.11 -तत्त्वार्थस्(D11 °र्थं); B2 (m. also as in text) -सर्वार्थस् (for -धर्मार्थस्). —$^{b}$) D10 ततः (sic) (for तपः-). D3 G1.2 -श्रमः; Cr.m.g.k.t as in text (for -ग्रहः). —$^{c}$) B4 M2 परदारं (sic) (for °रान्). V1 -बाहो (for -प्राज्ञ). —$^{d}$) Ś1 नोपरुद्धं; D11 नापराद्धं (for नोपरोद्धुं). Ś1 D10 समर्हसि(Ś1 °ति); Ñ2 V B1–3 D6 इहार्हसि(B3 °ति); Ck.t as in text (for त्वमर्हसि).

16 D11 reads $16^{ab}$ twice. —$^{a}$) B1 -विरोधेषु (for -विरुद्धेषु). —$^{b}$) Ñ2 V B बहुपापेषु; D1.4.6.10.11 बहूपायेषु (for बह्वपायेषु). —$^{c}$) B3 मूलजातिषु; M1 कुलघातिषु; Cm.g.k.t as in text (for मूलघातिषु). D2 मज्जंते. —$^{d}$) D6 बुद्धिवंतो. Ñ1 विचक्षणाः (for भवद्विधाः).

17 $^{a}$) D1 T3 कश्चिद्; Cm.t as in text (for कश्च).

G. 5. 47. 19
B. 5. 51. 20
L. 5. 47. 18

न चापि त्रिषु लोकेषु राजन्विद्येत कश्चन ।
राघवस्य व्यलीकं यः कृत्वा सुखमवाप्नुयात् ॥ १८
तत्त्रिकालहितं वाक्यं धर्म्यमर्थानुबन्धि च ।
मन्यस्व नरदेवाय जानकी प्रतिदीयताम् ॥ १९
दृष्टा हीयं मया देवी लब्धं यदिह दुर्लभम् ।
उत्तरं कर्म यच्छेषं निमित्तं तत्र राघवः ॥ २०
लक्षितेयं मया सीता तथा शोकपरायणा ।
गृह्य यां नाभिजानासि पञ्चास्यामिव पन्नगीम् ॥ २१
नेयं जरयितुं शक्या सासुरैरमरैरपि ।
विषसंसृष्टमत्यर्थं भुक्तमन्नमिवौजसा ॥ २२
तपःसंतापलब्धस्ते योऽयं धर्मपरिग्रहः ।
न स नाशयितुं न्याय्य आत्मप्राणपरिग्रहः ॥ २३

—$^{b}$) D6 om. राम. V2 -शोकानु- (for -कोपानु-). Ś1 Ñ1 B4 D1–4.10.11 शराणां( Ñ1 B4 D2 बाणानां ) नतपर्वणां; B3 कामक्रोधानुवर्तिनां. —$^{c}$) Ś1 Ñ1 B4 D1–4.10.11 दीप्तानाम्; B3 शूराणाम् (for शराणाम्).

18 V1 om. $18^{ab}$. —$^{a}$) D3 जातु (for चापि). —$^{b}$) B2 (m. also as in text) विद्यति (for विद्येत). D11 पुमानस्तीह कश्चन. —$^{c}$) Ś1 Ñ1 D1.4.10.11 च; B1 कः; D3 तु (for यः). —$^{d}$) Ś1 D3.10 कृत्वा यः( D3 यः कृत्वा ) सुखमाप्नुयात्; Ñ1 D11 कृत्वा यः( D11 च ) सुखमेधते; D1.4 यः कृत्वा सुखमेधते. —After 18, Ñ2 V B1.2.4 D6 ins.; while D2 ins. after 19:

1044* तद्यदात्महितं वीर सुहृदां चैव ते क्षमम् ।

[ Ñ2 तद्यद्यात्म-; B1 तदध्यात्म- (for तद्यदात्म-). D2 चैव (for वीर). V तद्यदा मोहितं वीर; B2 तच्छृणुष्व हितं वीर ( for the prior half ). D2 यत् (for ते). ]

19 Ñ2 V B D6 transp. $^{ab}$ and $^{cd}$ repeating $19^{cd}$ in its proper place. D2 repeats $19^{cd}$ after 1044*. —$^{a}$) Ś1 D2 तं तु; Ñ1 त्वं च; Ñ2 V B1.2.4 D1.3.4.6.10.11 त्वं तु; B3 तत्तु; T3 तत्र (for तत्त्रि-). V2 धर्म-; B1–3 D6 काले; Cr -लोक-; Cm.g.t as in text (for -काल-). D4 om. from हि up to य in $20^{b}$. —$^{b}$) D2.3.7.9 धर्मम् (for धर्म्यम्). Ś1 Ñ1 D1.2.10 -[अ]नुपालितं; D3.7.9 T2 -[अ]नुयायि च; G1 M1.2 °पाति च; Cr.m as in text (for °बन्धि च). Ñ2 D6 पथ्यं धर्मानुपालितं; V B अर्थं( B3 °र्थ्यं )धर्मानु( B4 °र्थे )पालितं( B2 °संहितं ); D11 धर्मसत्त्वानुपालितं; G2.3 धर्मार्थानुपघाति च. —$^{c}$) Ñ2 V B1.2.4 D6 ( all first time ) मन्यसे; D11 प्रणम्य (for मन्यस्व). D7.9 -शार्दूले (for -देवाय). ❀ Ck : नरशार्दूलेति पाठः. ❀ —$^{d}$) V B2–4( V both times; B2.4 second time; B3 first time) जानकीं. V B2–4( V1 B2.4 second time; V2 both times; B3 first time)प्रतिपादय; B3 (second time) D1.2.11 सं( D2 both times च )प्रदीयतां (for प्रतिदीयताम्). —After 19, D2 ins. 1044*.

20 D4 om. up to य in $^{b}$ (cf. v.l. 19). —$^{a}$) D5 दृष्ट्वा (for दृष्टा). Ñ2 V2 B1.4 D6 चेयं; V1 B2.3 चेह( for हीयं ). G2 Cr सीता (for देवी). —D6 om. (hapl. see var.) $20^{b}$ – $21^{a}$. —$^{b}$) G2 द्रष्टुं; G3 Ck लब्धुं (for लब्धं). B2 Cr तदिह; D8 यदि हि (for यदिह). Ñ1 D1.2.4 दुष्करं; D11 कारणं (for दुर्लभम्). —$^{c}$) V1 B4 यच्छ्रेयं; V2 D8 तच्छेषो( D8 °षं ); B1 यः श्रेयो; G3 यच्छिष्टं; Cm.t as in text (for यच्छेषं).

21 D6 om. $21^{a}$ (cf. v.l. 20). —$^{a}$) D11 लक्षियं ते (meta.) (for °तेयं). Ś1 D10 च विजने; Ñ1 V B D1–4.11 विशालाक्षी; Ñ2 मया देवी (for मया सीता). —$^{b}$) Ś1 Ñ1 V B D1–4.10.11 मया; Ñ2 D6 दुःख-; T2.3 तदा; Cv.r.m.g as in text (for तथा). —$^{c}$) D7.9 T1.2 गृहे; Cr.m as in text (for गृह्य). Ś1 D3.10 गृहीत्वा( D10 °ता ) किं ( D3 यां ) न जानासि( D10 °मि ); Ñ1 D1.2.4.11 गृहीतां किं न जानासि; Ñ2 V B D6 आदाय तां( B2 °यैतां ) न जानीषे. —$^{d}$) D2 इह (for इव). Ñ1 V B D1–4.10.11 भोगिनीं (for पन्नगीम्).

22 $^{a}$) V2 धारयितुं; B2 जारयितुं; B4 जीवयितुं. D4 शक्यं (for शक्या). B3 नेयमेजयितुं शक्या. —$^{b}$) Ś1 B1 ससुरैः सुरैरपि; V2 अमरैः सासुरैरपि; D3.8 विबुधैः( D8 राक्षसैः ) सासुरैरपि; D5 सासुरैरपि दुर्लभा. —$^{c}$) Ś1 D10 -संपृक्तम्; B4 D1.4–9.11 T -संस्पृष्टम् (for -संसृष्टम्). —$^{d}$) D1.3.4 इवासुखं; D11 महौजसा (for इवौजसा). —After 22, Ś1 Ñ V B D1–4.6.10.11 read 32 – 33.

23 $^{ab}$) B3 D1.4 ततः (for तपः-). Ś1 D1.4.10.11 -संचय-; Ñ2 V B D6 -संतान-; D2 -संयम-; G1 -प्रभाव-; Cr.m.g.t as in text (for -संताप-). B3 च (for ते). Ñ1 ततः संतापनं प्रायो; G3 M1 तपसा खलु लब्धस्ते (for $^{a}$). D7.9 T1.2 G1.3 M1.2 सो (for यो). Ś1 Ñ V B D1.2.4.6.10.11 योय( Ś1 D2.10 सोय )मृ ( Ñ1 °यं नि; D4 यो वा वृ )द्धि-परिच्छदः (for $^{b}$). D3 तपसा यच्च संग्रामं माहात्म्यमिदमुत्तमं. —$^{c}$) G1 तु; Cg.t as in text (for स). Ś1 D10 न्यासयितुं (for नाशयितुं). Ś1 D2.5.10 T3 Cg न्याय( D2.5 T3 °य्य )म्; D1.4 त्याज्य; D11 राज्यं (sic); M1 शक्यम् (also as in text); Cr.m.k.t as in text (for न्याय्य). Ñ2 V B D6 ❀ Cg : न रामो नाशयितुं शक्तः; D3 नैतन्नाशयितुं त्याज्यं. ❀ न्याय्यं न युक्तम्। अव्ययमेतत्. ❀ —$^{d}$) Ś1 Ñ2 D1.2.4.10 आत्मत्राण-; V1 B1.2 D6 सात्मत्राण- ( V1 D6 °प्राण- ); D3 त्वया V2 स ते प्राण-; B3 सत्त्वत्राण-; B4 सा हि राम-; Ś1 B1.3 प्राण-; D11 स त्वं वाल-(sic) (for आत्मप्राण-). D10 -परिच्छदः; V2 D2 -परिग्रहं; D3 -परिग्रहात्.

अवध्यतां तपोभिर्यां भवान्समनुपश्यति ।
आत्मनः सासुरैर्देवैर्हेतुस्तत्राप्ययं महान् ॥ २४

सुग्रीवो न हि देवोऽयं नासुरो न च मानुषः ।
न राक्षसो न गन्धर्वो न यक्षो न च पन्नगः ॥ २५

मानुषो राघवो राजन्सुग्रीवश्च हरीश्वरः ।
तस्मात्प्राणपरित्राणं कथं राजन्करिष्यसि ॥ २६

न तु धर्मोपसंहारमधर्मफलसंहितम् ।
तदेव फलमन्वेति धर्मश्चाधर्मनाशनः ॥ २७

G. 5. 47. 31
B. 5. 51. 28
L. 5. 47. 29

24 Ś1 D10 om. 24.—[a]) D1.4.11 अवध्यत्वं( D11 °त्त्वं ) ( for अवध्यतां ). Ñ2 V B D1-4.6.8.11 T3 तपो( D8 °तो )भी( D11 °भैः )र्याद्; Cr.m.g as in text ( for तपोभिर्यां ). —[b]) D7 -पश्यसि ( sic ) ( for -पश्यति ). Ñ1 D1.2.4.11 भवता यदि मन्यते; Ñ2 V B2.3 D3.6 भवान्यदभिमन्यते( D3 °न्यसे [ sic ] ) ; B1.4 भवान्यदिह मन्यते ( B1 °से [ sic ] ). —[d]) V2 अत्र ( for तत्र ). D11 शृणु ( for महान् ).

25 [a]) D5 G2 हि न( by transp. ) ; D7-9 G3 M1 न च; G1 [ ऽ ]पि न ( for न हि ). —[b]) G1 [ ए ]व ( for च ). T1.3 दानवः ; G3 M2.3 राक्षसः ; Cm.g.p as in text ( for मानुषः ). D7-9 न यक्षो न च राक्षसः . ❀ Cr.m.g : न च राक्षस इति पाठः सम्यक्( Cr इति पाठः । नासुरो न च मानुष इति केषुचित्कोशेषु दृश्यते। तदनुचितम्। "नहि चिन्ता ममान्येषु प्राणिष्वमरपूजित। तृणभूता इमे सर्वे प्राणिनो मानुषादयः" इत्युत्तरश्रीरामायणे मनुष्यादिभिरवध्यत्वस्याप्रार्थितत्वात्तेभ्योऽवध्यत्वं न प्रार्थितं तेभ्यो मृत्युरित्यर्थः ). ❀ —For 25[ab], Ś1 Ñ1 B4 D1-4.10.11 T2 subst.( Ś1 D10 read after 23 owing to om.); V1 ins. after 26[cd] ( first occurrence ), whereas V2 cont. after 1047* :

1045* स हि रामः ससुग्रीवो नैव देवो न पन्नगः ।;

[ T2 न ( for स ). Ñ1 दानवः ( for पन्नगः ). Ś1 V1 D3 T2 न देवो न च( D3 नापि ) पन्नगः ( for the post. half ). ] ; while Ñ2 V B1-3 D6 subst. for 25[ab] :

1046* सुग्रीवो हि न देवेषु न रक्षःस्वसुरेषु वा।

[ V1 B3 न हि ( by transp. ). V2 न सुरेषु; B3 रक्षःसु च ( for न रक्षःसु ). V1 B1 सुरेषु ( for [ अ ]सुरेषु ). Ñ2 V2 D6 च ( for वा ). ]

—Thereafter they cont. :

1047* बली वानरराजोऽसौ न तस्मादभयं तव।

[ B3 [ ऽ ]यं ( for ऽसौ ). ]

—Thereafter V1 reads 26[cd] for the first time followed by 1045*; while V2 further cont. 1045*. —Ñ2 B1-3 D5.6 G1.3 M1.2 om. 25[cd] – 26[ab]. D7-9 om. 25[cd]. —[c]) M3 दानवो ( for राक्षसो ). Ś1 Ñ1 V B4 D1-4.10.11 T2 G2 नासुरो( G2 न यक्षो ) न च गंधर्वो. —[d]) Ś1 D10 [ ए ]व ( for च ). Ś1 Ñ1 V B4 D1.3.10 T2 किंनरः ( for पन्नगः ). D2.11 न च यक्षो न किंनरः ; D4 यक्षो न न च किंनरः; G2 न पिशाचो न राक्षसः.

26 Ñ2 B D5.6 T1 G M om. 26[ab] ( for all except B4 T1 G2 M3, cf.v.l. 25 ). —[a]) Ś1 D10 राजा ( for राजन् ). —[b]) V1 वानरश् ( for सुग्रीवश् ). V2 कपीश्वरः ( for हरी° ). D3 सुग्रीवो वानरेश्वरः. —V1 reads 26[cd] for the first time after 1047* and repeats it here. —[c]) Ś1 Ñ1 V1( second time ).2 B4 D1.2.4.10.11 T2 तस्यां; Ñ2 V1 ( first time ) B1-3 D6 ततः ; Cm.g.k.t as in text ( for तस्मात् ). Ñ1 D1.2.4.11 T1.3 -त्यागं ; Ct as in text ( for -त्राणं ). —[d]) D3 नाम; D10 राजो ( sic ) ( for राजन् ). Ñ1 D2 न पश्यसि; B1 D11 करिष्यति ( for करिष्यसि ). —After 26[cd] ( first occurrence ), V1 ins. 1045*.

27 B3 om. 27–28. —[a]) D3 ननु ( for न तु ). G3 न ( for -[ उ ]प- ). Ś1 D1.2.4.6.10 न च( D2.6 हि ) धर्मोपि( D1.2.4 °प )संहार्यो( D1.2.4 °राद् ) ; Ñ V B1.2.4 D3.11 न हि( Ñ1 D11 च; D3 स ) धर्मोप्यसंहार्यो. —[b]) Ś1 Ñ1 D10.11 ह्यधर्म- ; Ñ2 V B1.2 D3.6 विधर्म- ; B4 विकर्म- ( for अधर्म- ). D10 -बल- ( for -फल- ). Ś1 Ñ1 D8-10 -संयुतः ( D8.9 °तं ); Ñ2 V B1.2.4 D1.3.4.6 -संहितः ( for -संहितम् ). —Ñ2 om. 27[cd]. —[c]) Ś1 Ñ1 D10.11 स एव; B4 तदेवं ( for तदेव ). Ś1 Ñ1 D10 अन्येति; V B1.2.4 D2.6 आप्नोति ( for अन्वेति ). —[d]) Ś1 B4 D10 धर्मो नाधर्म- ; Ñ1 V B1.2 D6 धर्माणां धर्म- ; D1.3.4 ह्यधर्मो धर्म- ; D2 धर्मेणाधर्म- ; D11 धर्मतां धर्म- ( sic ) ( for धर्मश्चाधर्म- ). V2 D2.11 -नाशनं; D6 -नाशकः ( for -नाशनः ). ❀ Cg : न त्विति। तुशब्द उक्तशङ्काव्यावर्तकः। धर्मः उपसंह्रियतेऽनेनेति धर्मोपसंहारं धर्मफलम्। फलेन धर्मस्योपसंह्रियमाणत्वात्। क्लीबन्तत्वमार्षम्।; Ck : यद्वा भट्टस्तु धर्मोपसंहारं धर्मफलं कर्तृ ---- अधर्मफलसंहितं तत्सहानुभववत् न भवतीत्याह - तत्र "धनञ्जयन्ताः पुंसि" इति धर्मोपसंहार इत्येव भाष्यम्। उपसंहारशब्दश्च व्यर्थः। धर्मोऽधर्मफलसंहित इत्येतावत एव वक्तव्यत्वात्। नापि चेदं वक्तव्यम्। धर्माधर्मफलयोः सुखदुःखप्रवृत्त्योर्यौगपद्यस्य सर्वाविवादात्। अलमेतावता ।; Ct : केचित्तु 'धर्मोपसंहारमधर्मफलसहित' मिति पाठः। धर्मोपसंहारं धर्ममुपसंह्रियतेऽनेनेति धर्मफलं सुखं तदधर्मफलसंहितं न संभवत्यधर्मफलेन दुःखेन सहानुभवं न भवति, तत्तस्मादेव फलमन्वेति धर्मो धर्मफलं सुखमेवान्वेति, एवमधर्मो दुःखं दुःखरूपं फलमेवान्वेति। अत्र 'धर्मो नाधर्मनाशनः' इति पाठः। पूर्वकृतो धर्मोऽधर्मस्येदानीं कृतस्य न नाशनः। चादधर्मोऽपि धर्मनाशनो नेत्यर्थ इति वदन्ति। तत्रार्थसामञ्जस्यं स्पुटमेवेति भाव्यम्. ❀

G. 5. 47. 31
B. 5. 51. 29
L. 5. 47. 30

प्राप्तं धर्मफलं तावद्भवता नात्र संशयः ।
फलमस्याप्यधर्मस्य क्षिप्रमेव प्रपत्स्यसे ॥ २८
जनस्थानवधं बुद्ध्वा बुद्ध्वा वालिवधं तथा ।
रामसुग्रीवसख्यं च बुध्यस्व हितमात्मनः ॥ २९
कामं खल्वहमप्येकः सवाजिरथकुञ्जराम् ।
लङ्कां नाशयितुं शक्तस्तस्यैष तु विनिश्चयः ॥ ३०
रामेण हि प्रतिज्ञातं हर्यृक्षगणसंनिधौ ।
उत्सादनममित्राणां सीता यैस्तु प्रधर्षिता ॥ ३१
अपकुर्वन्हि रामस्य साक्षादपि पुरंदरः ।
न सुखं प्राप्नुयादन्यः किं पुनस्त्वद्विधो जनः ॥ ३२
यां सीतेत्यभिजानासि येयं तिष्ठति ते वशे ।
कालरात्रीति तां विद्धि सर्वलङ्काविनाशिनीम् ॥ ३३
तदलं कालपाशेन सीताविग्रहरूपिणा ।
स्वयं स्कन्धावसक्तेन क्षममात्मनि चिन्त्यताम् ॥ ३४
सीतायास्तेजसा दग्धां रामकोपप्रपीडिताम् ।
दह्यमानामिमां पश्य पुरीं साट्टप्रतोलिकाम् ॥ ३५

---

28 B3 om. 28 (cf. v.l. 27). —$^a$) B1 कर्म- (for धर्म-). D1 तात; D11 चात्र (for तावद्). —$^c$) D11 अद्य तु (for अस्यापि). —$^d$) D9 एवं (for एव). Ś1 Ñ1 V B1.2.4 D2.3.10 [उ]पभोक्ष्यसे; Ñ2 D6 [उ]पलप्स्यसे; D5.9 T2 प्रपत्स्यते; Cr.t प्रपत्स्यसे (as in text). D1.4.11 क्षिप्रं समुपलप्स्यते (D4 °लभ्यते; D11 °से).

29 $^a$) B2 जनस्थाने (for °स्थान-). Ñ1 घोरं; Ñ2 V B D6 श्रुत्वा; D3 दृष्ट्वा (for बुद्ध्वा). —$^b$) D7-9 वालिनश्च (for बुद्ध्वा वालि-). Ś1 Ñ1 D1-4.10.11 वालिनश्चैव (Ś1 D3.10 °श्चापि) संक्षयं; Ñ2 V B D6 वालिनश्च तथा (B2 यथा) क्षयं (Ñ2 V2 [D6 वधं). —$^c$) Ñ1 D2 हि; Ñ2 om. (for च).

30 $^a$) B3 रामः (for कामं). Ś1 Ñ1 D10 एव (for अपि). —$^b$) B3 D2.10.11 -कुंजरं (B3 °रः); T1.3 G3 -संकुलां (for -कुञ्जराम्). —$^c$) D11 न त्वां (for लङ्कां). D3 कालयितुं (for नाश°). Ñ2 V B D6 शक्तो नाशयितुं लंकां. —$^d$) D8 T1.3 [ए]व (for [ए]ष). D2.11 भुवि; D5.7-9 G2.3 M2.3 Ck.t तु न (for तु वि-). Ś1 D10 तस्यैकस्य विनिश्चितः (D10 °श्चयः); Ñ1 तस्यैषैव तु निश्चयः (sic); Ñ2 V1 B D6 तत्र नैष तु निश्चयः; V2 किं पुनस्ते महाबलाः; D3 तत्र चैष विनिश्चयः.

31 $^a$) B1 T2 तु; B3 [अ]मि- (for हि). —$^b$) Ś1 D2.10 हर्यृक्षकपि-; Ñ2 V B D6 वानराधिप- (for हर्यृक्षगण-). —$^c$) B3 उच्छेदनम् (for उत्सादनम्). —$^d$) Ś1 Ñ1 D1-4.10.11 क्षिप्रं तच्च (Ś1 D10 तत्तु; Ñ1 तस्य; D3 °प्रमेव) करिष्यति; Ñ2 V B1 येनासौ मैथिली हृता; B2-4 D6 येन सा (B2 मे) मैथिली हृता.

32 Ś1 Ñ V B D1-4.6.10.11 read 32-33 after 22. —$^a$) D3 अपकृत्य (for °कुर्वन्). V2 B4 तु; D6 न (for हि). D11 अपकुर्युश्च रामस्य (sic). —$^b$) B4 राक्षसेश; D1 साक्षादिव (for साक्षादपि). Ñ1 D1.4.11 शतक्रतुः (for पुरंदरः). —$^c$) Ñ V B D1-4.6.10.11 राजन्; G1 किंचित् (for अन्यः). —$^d$) D3 त्वादृशो (for त्वद्विधो). V B2-4 किं पुनस्त्वद्विधा जनाः.

33 Ś1 Ñ V B D1-4.6.10.11 read 32-33 after 22. —$^a$) B3 या; B4 सा (for यां). Ñ1 यां त्वं सीतेति जानासि. —$^b$) Ś1 तेग्रतः; Ñ1 B3.4 रूपिणी; D3 जानकी; D7-9 ते गृहे (for ते वशे). Ñ2 D6 तिष्ठंतीममिरूपिणीं; V B1.2 D1.2.4.10.11 सेयं तिष्ठति रूपिणी. —$^c$) B1.2 D3.5 कालरात्रिं हि (D5 तु) (for °रात्रीति). —$^d$) G3 -लोक- (for -लङ्का-). Ś1 Ñ2 V B1-3 D2.3.6.10.11 G2 -निवासिनां (G2 °नीं) (for -विनाशिनीम्).

34 $^a$) D1.4.11 अयं (for अलं). —$^b$) M3 -निग्रह- (for -विग्रह-). D11 सीतां व्यग्रहरूपिणीं (sic). —$^c$) Ñ1 V1 B D2.6 कंठ- (for स्कन्ध-). Ñ2 -शेषेण; D10 -सुक्तेन; G1.3 -सिक्तेन (sic); Ck.t as in text (for -सक्तेन). D11 अद्य कृत्वावसक्तेन. —$^d$) D5.7-9 T1.2 क्षेमम् (for क्षमम्). Ś1 Ñ1 D1-4.10.11 क्षेम (D1.3.4 क्षय; D2 क्षम) मालोकयात्मनः Ñ2 V B D6 चिंत्यतां हितमात्मनः. —After 34, Ñ2 V1 B read 5.50.1; D6 ins. 1048*.

35 Ñ2 V1 B D6 om. 35. —$^a$) D11 जग्धां (for दग्धां). —$^b$) M2 काम- (for राम-). D11 -शोक- (for -कोप-). Ś1 Ñ1 D1-4.7-11 T1 G1.2 -प्रदीपितां (for -प्रपीडिताम्). V2 सवाजिरथकुंजरां. —$^d$) Ś1 Ñ1 D1-4.10.11 लंकां सरथकुंजरां; V2 रामक्रोधप्रदीपितां. —After 35, Ś1 Ñ1 V1 D1-4.10.11 read 5.50.1, while D5-9 (D6 after 34 owing to om.) S ins. after 35:

1048* स्वानि मित्राणि मन्त्रींश्च ज्ञातीन्भ्रातॄन्सुतान्हितान् ।
भोगान्दारांश्च लङ्कां च मा विनाशमुपानय ।
सत्यं राक्षसराजेन्द्र शृणुष्व वचनं मम ।
रामदासस्य दूतस्य वानरस्य विशेषतः । [5]
सर्वाँल्लोकान्सु संहृत्य सभूतान्सचराचरान् ।
पुनरेव तथा स्रष्टुं शक्तो रामो महायशाः ।
देवासुरनरेन्द्रेषु यक्षरक्षोगणेषु च ।
विद्याधरेषु सर्वेषु गन्धर्वोरगेषु च ।
सिद्धेषु किंनरेन्द्रेषु पतत्रिषु च सर्वशः । [10]
सर्वभूतेषु सर्वत्र सर्वकालेषु नास्ति सः ।
यो रामं प्रति युध्येत विष्णुतुल्यपराक्रमम् ।

स सौष्ठवोपेतमदीनवादिनः
कपेर्निशम्याप्रतिमोऽप्रियं वचः ।
दशाननः कोपविवृत्तलोचनः
समादिशत्तस्य वधं महाकपेः ॥ ३६

G. 5. 47. 0
B. 5. 51. 45
L. 5. 47. 37

इति श्रीरामायणे सुन्दरकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

---

सर्वलोकेश्वरस्येह कृत्वा विप्रियमुत्तमम् ।
रामस्य राजसिंहस्य दुर्लभं तव जीवितम् ।
देवाश्च दैत्याश्च निशाचरेन्द्र
गन्धर्वविद्याधरनागयक्षाः । [ 15 ]
रामस्य लोकत्रयनायकस्य
स्थातुं न शक्ताः समरेषु सर्वे ।
ब्रह्मा स्वयंभूश्चतुराननो वा
रुद्रस्त्रिनेत्रस्त्रिपुरान्तको वा ।
इन्द्रो महेन्द्रः सुरनायको वा [ 20 ]
त्रातुं न शक्ता युधि रामवध्यम् ।

[ (l. 1) T2 G3 मंत्रिणः स्वानि मित्राणि ( for the prior half ). ❀ Cr.g : मन्त्रीन् मन्त्रिणः । इकारान्तत्वमार्षम् . ❀ D5 हितान्सुतान् ( by transp. ); D6 सुतांस्तथा; D8 M1 सुहृद्धितान् ( for सुतान्हितान् ). —(l. 5) D7–9 T M3 नुसंहृत्य; G3 समा° ( for स संहृत्य ). —(l. 7) T3 -सुरेंद्रेषु ( for -न° ). D6–9 T1.2 G1 -[ उ ]रगेषु ( for -गणेषु ). —G3 om. l. 8–9. —(l. 8) D7–9 नागेषु ( for सर्वेषु ). D5.7–9 T2 M1.2 मृगेषु; D6 नरेषु ( for [ उ ]रगेषु ). —D9 repeats l. 7–8 after l. 8. —(l. 9) D7.9 G1 M3 सर्वतः ( for °शः ). D5.6 ( marg. ) M1.2 नागेंद्रेषु च सर्वेषु किंनरेषु पतत्रिषु. —G1.3 transp. l. 10 and 11. —(l. 10) G1.3 -लोकेषु ( for -भूतेषु ). D6–9 Ct transp. सर्वभूतेषु and सर्वत्र. T -लोकेषु; G1.3 -भूतेषु ( for -कालेषु ). D6 यो ( for न ). ❀ Cv : "सर्वभूतेषु सर्वत्र सर्वकालेषु नास्ति सः । यो रामं प्रति युध्येत विष्णुतुल्यपराक्रमन्" इति समीचीनः पाठः ।; Cr : नास्ति स इति पाठः साधुः . ❀ —(l. 11) D5 वध्येत ( for यु° ). D6 -पराक्रमः . —D6 om. l. 12–17. —(l. 12) T2 M1.3 [ ए ]वं; T3 [ इ ]व ( for [ इ ]ह ). D7–9 T2 G1.2 M1 ईदृशं ( for उत्तमम् ). —(l. 13) G3 नर- ( for राज- ). —(l. 14) D5.8 निशाचरेंद्रा; M1 निशाचराश्च. —(l. 21) D7.9 स्थातुं ( for त्रातुं ). D7.9 राघवस्य ( for रामवध्यम् ). ❀ Cv : तस्येत्यादिश्लोकः परसर्गादिः पुरस्तात्तु लेखकैः प्रमादान्न्यस्तः ।; Cr : स सौष्ठवेति श्लोकात्पूर्वं वर्तमानस्तस्येति श्लोक उत्तरसर्गादिः । अत्र प्रमादाल्लिखितः । अतो न पुनरुक्तिः ।; so also Cg. ❀ ]

—Thereafter T2 cont. :

1049* तस्य ते त्रिषु लोकेषु न पिशाचं न राक्षसम् ।
त्रातारं वानुपश्यामि न गन्धर्वं न चासुरम् ।

—Then T2 reads 5.50.1, while D6 G1.3 M1 read 5.50.1 after 1048*.

36 [a]) D3 -मायिनः ; G1 -भाषिणः ; M1 -गामिनः ( for -वादिनः ). —For 36[ab], Ś1 Ñ V B D1–4.6.10.11 subst. :

1050* स तस्य तद्वाक्यमदीनभाषिणः
कपिप्रवीरस्य निशम्य विप्रियम् ।

[ (l. 1) B4 om. up to वच. V1 B2 ( m. also as above ).3 उदार- ( for अदीन- ). —(l. 2) B3.4 भाषितं; D11 विक्रमं ( for विप्रियम् ). D3 कपिर्निशम्य प्रियमप्रियं महत्. ]

—[c]) Ñ2 V B1.2.4 D1.4.6.11 क्रोध- ( for कोप- ). B2 -विवृद्ध- ( for °त्त- ). —[d]) G3 समादिदेशास्य ( for °शत्तस्य ). D1.2.4.11 कपेर् ( for वधं ). B1 G1 -[ आ ]त्मनः ; D1.2.4.11 -वधं ( for -कपेः ). Ś1 D10 समादिशत्तत्र महाकपेर्वधं.

Colophon. —*Sarga name* : Ś1 Ñ1 V1 B2 D1.2.6.10.11 हनुमद्वाक्यं; Ñ2 V2 B1.4 D6 दूतवाक्यं; B3 दूतवधप्रकारः; D3 हनुमत्प्रस्फुटजल्पनः . —*Sarga no.* ( figures, words or both ) : Ñ1 B2 D1.2.4.10.11 om. ; Ś1 D5 M2 50; Ñ2 V1 D6 49; V2 39; B1 47; B3 45; B4 D3 52; D7–9 T G M1.3 51. —After colophon, D2 concludes with रामः ; G M1 with श्रीरामाय नमः .

## ५०

G. 5. 47. 36
B. 5. 52. 1
L. 5. 47. 36

तस्य तद्वचनं श्रुत्वा वानरस्य महात्मनः ।
आज्ञापयद्वधं तस्य रावणः क्रोधमूर्छितः ॥ १
वधे तस्य समाज्ञप्ते रावणेन दुरात्मना ।
निवेदितवतो दौत्यं नानुमेने विभीषणः ॥ २
तं रक्षोधिपतिं क्रुद्धं तच्च कार्यमुपस्थितम् ।
विदित्वा चिन्तयामास कार्यं कार्यविधौ स्थितः ॥ ३
निश्चितार्थस्ततः साम्नापूज्य शत्रुजिदग्रजम् ।
उवाच हितमत्यर्थं वाक्यं वाक्यविशारदः ॥ ४
राजन्धर्मविरुद्धं च लोकवृत्तेश्च गर्हितम् ।
तव चासदृशं वीर कपेरस्य प्रमापणम् ॥ ५

## 50

M2 begins with श्रीरामाय नमः.

1 Ś1 Ñ1 V2 D1-4.10.11 read 1 after 5.49.35. Ñ2 V1 B read 1 after 5.49.34. D6 G1.3 M1 read 1 after 1048*. T2 reads 1 after 1049*. —ab) D7 T1.3 Ct स तस्य; Cg.k as in text (for तस्य तद्). Ñ1 महाबलः. Ñ2 V B D6 एवमुक्तस्तु कपि(B1 बलि)ना पौलस्त्यो राक्षसाधिपः. —c) Ñ1 D2 राजा (for तस्य). —d) D9 in marg. क्रोधमूर्छितः. ❀ Cg: तस्य तद्वचनं श्रुत्वेति श्लोकः सर्गस्य प्रथमः. ❀

2 a) V2 B1.4 तत्र (for तस्य). Ś1 Ñ1 D1.2.4.10.11 आज्ञप्ते तु वधे तस्य; D3 आज्ञापितं वधं तस्य. —b) V2 वानरेण (sic) (for रावणेन). Ñ2 V B D2.6 हनूमतः; D5 *हात्मना (for दुरात्मना). —c) Ñ2 V B1.2.4 D1.4.6.11 वाक्यं; G2.3 Cm.gp दूत्यं; Cv.g.k.t as in text (for दौत्यं). Ś1 Ñ1 B3 D2.3.5.10 M1 निवेदितं(D2 °ते) ततो (M1 वधं) वाक्यं(Ś1 D5 M1 दौत्यं); D8 T3 M2.3 निवेदितमतो(T3 °तौ) दौत्यं; T1 निवेदितवधो दूत्ये; T2 निवेदितमतिर्दूत्यं. ❀ Cr.m: निवेदितमतौ(Cm °तौ इति पाठः)।; Cg: निवेदितमतौ दूत्यमिति पाठान्तरम्।; Ck: "निवेदितवतो दौत्यम्" इति पाठः. ❀—d) Ñ1 नार्थं मेने; Ñ2 मानुमेने; V2 B अभाषत (for नानुमेने).

3 B1 reads 3a in marg.—a) Ñ2 V B4 D3.6 G1.3 स (for तं). Ś1 Ñ1 B1-3 D1.2.4.10.11 राक्षसाधिपतिं; M1 तं तु रक्षोधिपं.—b) Ś1 D10 तद्वधार्थम्; B2 कार्यं चेदम्; D2 तस्य कार्यम् (for तच्च कार्यम्). D5 तच्च कार्यकरणे स्थितं (hypm.). —d) D4 om. कार्य-. Ś1 Ñ1 B4 D1.3.4.10.11 -विदां वरः; Ñ2 V B1-3 D6 -विधिं प्रति (for -विधौ स्थितः).

4 Ś1 D10 om. (hapl.?) 4.—a) Ñ2 V B (B2 [m. also] as in D2) D1.4.6.11 निश्चितार्थं; D2 निश्चित्यार्थं. G3 तदा (for ततः). D1 om.; D4 साम्ना (sic) (for साम्ना). —b) Ñ1 D1.5.7.9 पूज्यं; D3 सर्व-; D4 पूजा (sic) (for [आ]पूज्य). Ñ2 V B D6 पूजयित्वा स(B3 च) रावणं. ❀ Cg: आपूज्येति छेदः. ❀ —d) Ñ2 D1.4.6 G3 -विदां वरः (for -विशारदः). —After 4, D5.7-9 T2 G M ins.:

1051* क्षमस्व रोषं त्यज राक्षसेन्द्र
प्रसीद मद्वाक्यमिदं शृणुष्व।
वधं न कुर्वन्ति परावरज्ञा
दूतस्य सन्तो वसुधाधिपेन्द्राः।

[(l. 2) D5.7-9 M2 मे (for मद्-). —(l. 3) D5 परापरज्ञा (for °वरज्ञा).]

5 a) Ś1 Ñ1 D1.3.4.10.11 राजवृत्त-(D1 °त्ति-); D3 S राजधर्म-. Ñ2 V B D6 इदं धर्मविरुद्धं हि; D2 राजंलोकविरुद्धं हि. —b) Ś1 D10 M2 लोकवृत्तं; Ñ2 B1.4 D6 इहामुत्र; Ck.t as in text (for लोकवृत्तेश्). V इह चामु(V3 °न्य)त्र गर्हितं; B2.3 इहान्यत्र वि(B3 तु)गर्हितं; D1.4 तव राजन्विगर्हितं; D2.11 राज(D11 लोक)वृत्तविगर्हितं.—c) Ś1 D10 सर्वथा; Ñ1 उवाच (for तव च). Ñ2 V B D1.2.4.6.11 त्वत्तो न सदृशं वीर.—d) T2 कपिवर्य- (for कपेरस्य). Ś1 च मारणं; Ñ2 V2 D6 प्रणाशनं (for प्रमापणम्). B1 वीरस्यास्य प्रमाणकं. —After 5, D5.7-9 G M ins., while T2 ins. after 6:

1052* धर्मज्ञश्च कृतज्ञश्च राजधर्मविशारदः।
परावरज्ञो भूतानां त्वमेव परमार्थवित्।
गृह्यन्ते यदि रोषेण त्वादृशोऽपि विपश्चितः।
ततः शास्त्रविपश्चित्त्वं श्रम एव हि केवलम्।
तस्मात्प्रसीद शत्रुघ्न राक्षसेन्द्र दुरासद। [5]
युक्तायुक्तं विनिश्चित्य दूतदण्डो विधीयताम्।
विभीषणवचः श्रुत्वा रावणो राक्षसेश्वरः।
रोषेण महताविष्टो वाक्यमुत्तरमब्रवीत्।
न पापानां वधे पापं विद्यते शत्रुसूदन।
तस्मादेनं वधिष्यामि वानरं पापचारिणम्। [10]
अधर्ममूलं बहुदोषयुक्त-
मनार्यजुष्टं वचनं निशम्य।
उवाच वाक्यं परमार्थतत्त्वं
विभीषणो बुद्धिमतां वरिष्ठः। [15]
प्रसीद लङ्केश्वर राक्षसेन्द्र
धर्मार्थतत्त्वं वचनं शृणुष्व।
दूतानवध्यान्समयेषु राजन्
सर्वेषु सर्वत्र वदन्ति सन्तः।

[(l. 1) D5 राजा धर्म-; T2 धर्मशास्त्र-; G1 सर्वशास्त्र- (for राजधर्म-). G2 -विदां वरः (for -विशारदः). —(l. 2) D5

असंशयं शत्रुरयं प्रवृद्धः
कृतं ह्यनेनाप्रियमप्रमेयम् ।
न दूतवध्यां प्रवदन्ति सन्तो
दूतस्य दृष्टा बहवो हि दण्डाः ॥ ६

वैरूप्यमङ्गेषु कशाभिघातो
मौण्ड्यं तथा लक्षणसंनिपातः ।
एतान्हि दूते प्रवदन्ति दण्डा-
न्वधस्तु दूतस्य न नः श्रुतोऽपि ॥ ७

कथं च धर्मार्थविनीतबुद्धिः
परावरप्रत्ययनिश्चितार्थः ।
भवद्विधः कोपवशे हि तिष्ठे-
त्कोपं नियच्छन्ति हि सत्त्ववन्तः ॥ ८

न धर्मवादे न च लोकवृत्ते
न शास्त्रबुद्धिग्रहणेषु वापि ।
विद्येत कश्चित्तव वीर तुल्य-
स्त्वं ह्युत्तमः सर्वसुरासुराणाम् ॥ ९

G. 5. 42. 8
B. 5. 52. 17
L. 5. 48. 8

परापरज्ञो; G1 परावराणां. —(l. 3) G1 दोषेण (for रोषेण). M1 त्वादृशाश्च (sic). D7.9 विचक्षणाः (for विपश्चितः). ॐ Ck.t : त्वादृश इति( Ct किन्त्व ) बहुवचनम्. ॐ —(l. 4) G1 कृतश्चास्त्र- (for ततः शास्त्र-). —(l. 6) G1 दूते (for दूत-). —(l. 7) G1.2 राक्षसाधिपः. —(l. 8) D7-9 क्रोधेन (for रोषेण). —(l. 9) G2 पापो (sic). —(l. 10) D7.9 इनं (for एनं). D7-9 G3 Ck.t पापकारिणं. —(l. 11) M3 -रोष- (for -दोष-). —(l. 12) D5 in marg. निशम्य. —(l. 15) D5 राक्षसेश्वर. —(l. 16) D8 G1.2 M3 धर्मार्थयुक्तं. —(l. 17) D5.7-9 T2 G1 दूता न वध्याः. D5 स्वयमेव; G2 समरेषु (for समयेषु). G1 राज्ञा (for राजन्). —(l. 18) G1 सर्वे (for सन्तः). ]

6 Ś1 D10 om. $6^{ab}$. —$^{a}$) B3 D11 प्रवृद्धं; D5 प्रबुद्धः (for प्रवृद्धः). —$^{b}$) B3 कृपेन (sic); D3 त्वनेन (for ह्यनेन). B4 अप्रियं (for अप्रमेयम्). —After $6^{ab}$, T2 G1 ins.:

1053* वधार्हजं कर्म कृतं तथापि
दूतस्य हिंसां न वदन्ति सन्तः ।
[ (l. 1) T2 वधार्हकं. ]

—$^{c}$) Ś1 (before corr.) D1.2.4.7 न दूतवध्यं; D3 वध्यं न दूतं; G3 न दूतहत्यां. Ñ1 D2.10 हि (for प्र-). Ñ2 V D11 दूतो न वध्यो हि( D11 °ध्यः प्र ) वदंति संतो; B D6 दूता न वध्या हि( B2 °ध्याः प्र ) वदं( B4 भवं )ति संतो. ॐ Cr.g : दूतवध्यां दूतवधम्। स्त्रियां भावे क्यप्। हन्तेर्वधादेश आर्षः. ॐ —$^{d}$) D2 हतस्य (for दूतस्य). Ś1 Ñ2 V B D1-4.6.8.10.11 दंडा; D5 G3 दृष्वा (sic) (for दृष्टा). Ś1 Ñ1 B4 D1.2.4.10.11 प्रदि( D4 °वि )ष्टाः; Ñ2 D3.6.9 हि दृष्टाः; V B1 विसृष्टाः; B2 हि सृष्टाः; B3 [ s ]पि सृष्टाः (for हि दण्डाः). —After 6, T2 ins. 1052*.

7 Ś1 D10 om. 7. —$^{a}$) Ñ V B1.2.4 D3.5.6.11 कशा ( Ñ2 V2 D3.5 °षा )निपातो; B3 कशायपातो; T3 कशावघातो. —$^{b}$) D2.8.9.11 T2 G2 मौढ्यं; Ct as in text (for मौण्ड्यं). T3 तदा (for तथा). D8 -संनिपातं. —$^{c}$) M1 एतानि (sic) (for एतान्हि). B4 यतो हि दूतेषु वदंति दंडान्. —$^{d}$) D3 च (for तु). D5 न सः; D9 मनः-; T2 न हि; Cr.m.g.k.t as in text (for न नः). D3.7.9 श्रुतोस्ति; D8 श्रुतो वै; T2 श्रुतो नः; Cm.k.t श्रुतोपि( as in text ). Ñ1 *** दूतस्य वधो न दृष्टः; B4 D2.11 दूतस्य दंडो हि वधो न दृष्टः( D11 न वधो हि शस्तः ); D1.4 न दूतदंडो हि वधः प्रशस्तः. —For $7^{cd}$, Ñ2 V B1-3 D6 subst.:

1054* एवंविधानर्हति रूक्षवादी
दण्डेषु दूतस्य वधो न दृष्टः ।

[ (l. 2) V2 दंडेन; B1 D6 दंडेषु. B3 om.; D6 वचो (for वधो). Ñ2 न मुक्तः (sic); V2 हि दृष्टः; D6 नियुक्तः (for न दृष्टः). ]

8 $^{a}$) Ś1 D2.10 हि (for च). G3 damaged from र्मा up to प्रत्यय in $8^{b}$. Ñ1 धर्मानुविहीत- (sic); Ñ2 V B1-3 D6 धर्मादनपेत-; B4 D1.4.11 धर्मार्थविशुद्ध-; D3 बह्वर्थविनीत-; M2 धर्मात्मविनीत-. T2 -बुद्धिं. —$^{b}$) D5 Cv परापर-; M1 परावरः. —$^{c}$) D1.4 G3 क्रोध- (for कोप-). Ñ1 च; D1.4 न; D3 [ s ]तु-; D3 [ s ]सि- (for हि). Ś1 D2.10 कोपमथा( D2 °वशो )बितिष्ठेत्; Ñ2 V B D6.11 G1 M1 क्रोध( G1 M1 कोप )वशं हि( B3 च ) गच्छेत्( D11 न तिष्ठते ). —$^{d}$) Ś1 Ñ1 D3.10.11 क्षोभं न( D3 °भंति [ sic ] ) गच्छंति; Ñ2 V B D1.2.4.6 क्रोधं न गच्छंति; D5.7.9 G1 कोपं न गच्छंति. D3 न; G1 om. (for हि). B4 D7 तत्त्ववंतः.

9 B3.4 om. 9. —$^{a}$) V1 -तत्त्वे न; D3 -वादेषु; D11 -दाने न (for -वादे न). Ñ2 B1.2 D6 लोकतत्त्वे; V1 लोकवादे; V2 तत्त्वलोके; G1 लोकवृत्तौ. —$^{b}$) D5 T1.3 G1 M3 च (for वा). T2 -ग्रहणे तथापि. Ś1 Ñ V B1.2 D1-4.6.10.11 न( D11 स्व ) शास्त्रबुद्धौ( Ñ2 V B1.2 D6 °द्ध्या; D1.2.4 °वृद्धौ ) स्व( V2 B2 [ m. also ]सु )मते( D3 °बले )न चा( D11 वा )पि. —$^{c}$) Ñ1 वेदे तु (sic) (for विद्येत). Ś1 Ñ1 D1.4.10 तुल्य एकस् (for वीर तुल्यस्). Ñ2 V B1.2 D2.6 बले न( D2 विद्येत ) तुल्यस्तव कश्चिदन्यस् ( Ñ2 D6 °देव; V2 °इंदे ); D11 विद्युत्तमः स्वं न च तुल्य एव (sic). —$^{d}$) Ś1 Ñ1 B1.2 D10 उत्तमः (for ह्युत्तमः). D4 om. सर्व-. D9 om. (hapl.) सुरा-. Ñ2 V B1.2 D6 -सुरासुरेभ्यः. ॐ Ck : सर्वसुरासुराणामित्यनन्तरम्, न चाप्यस्य

G. 5. 48. 9
B. 5. 52. 18
L. 5. 48. 9

न चाप्यस्य कपेर्घाते कंचित्पश्याम्यहं गुणम् ।
तेष्वयं पात्यतां दण्डो यैरयं प्रेषितः कपिः ॥ १०

साधुर्वा यदि वासाधुः परैरेष समर्पितः ।
ब्रुवन्परार्थं परवान्न दूतो वधमर्हति ॥ ११

अपि चास्मिन्हते राजन्नान्यं पश्यामि खेचरम् ।
इह यः पुनरागच्छेत्परं पारं महोदधेः ॥ १२

तस्मान्नास्य वधे यत्नः कार्यः परपुरंजय ।
भवान्सेन्द्रेषु देवेषु यत्नमास्थातुमर्हति ॥ १३

अस्मिंन्विनष्टे न हि दूतमन्यं
पश्यामि यस्तौ नरराजपुत्रौ ।
युद्धाय युद्धप्रिय दुर्विनीता-
वुद्योजयेद्दीर्घपथावरुद्धौ ॥ १४

कपेरित्यादि। अत्र मध्ये श्लोकद्वयं प्रक्षिप्तम्। प्राचीनाश्च तथा-वदन्. ❀ —After 9, D7.9 T2 G1 M1 (l. 5-8 after 10) ins.:

1055* पराक्रमोत्साहमनस्विनां च
सुरासुराणामपि दुर्जयेन ।
त्वया प्रभग्नाः सुरदैत्यसंघा
युद्धेषु युद्धेष्वसकृन्नरेन्द्राः ।
इत्थंविधस्यामरदैत्यशत्रोः [5]
शूरस्य वीरस्य तवाजितस्य ।
कुर्वन्ति मूढा मनसो व्यलीकं
प्राणैर्वियुक्ता न तु ये पुरा ते ।

[(l. 2) D9 om. (hapl.) सुरा.—(l. 3) D7.9 त्वया-प्रमेयेण सुरेंद्रसंघा.—(l. 4) D7.9 जिताश्च (for first युद्धेषु). —(l. 5) G1 अर्थं विहत्य; M1 इत्थं विधाय (for इत्थंविधस्य). —(l. 6) T2 M1 तथा हितस्य (for तवाजितस्य).—(l. 7) D7.9 कुर्वंतु (D7 °ति) वीरा मनसाप्यलीकं.—(l. 8) D7.9 विमुक्ता (for वियुक्ता). G1 M1 ननु (for न तु). D7.9 भो: (for ये).]

10 G1 transp. $10^{ab}$ and $^{cd}$.—$^{a}$) Ñ2 V B2-4 D2.6 [ए]व (for [अ]पि). D6 कपेरंते; T1.3 कपेस्तात. —$^{b}$) B4 D3.4 T1.3 M1 किंचित् (for कंचित्). V2 गुणान् (sic). Ñ2 V1 B1-3 D6 कांश्चित्पश्यामहे गुणान्.—$^{c}$) V B D3.4.6 [ए]व (for [अ]यं).—$^{d}$) D4 क्षति-; D8 परं (for अयं). D6 om. तः कपिः.—After 10, M1 ins. l. 5-8 of 1055*.

11 $^{a}$) M2 सापूर्वा (sic) (for साधुर्वा). Ñ2 V B D1-4.6.10.11 साधु वा यदि वासाधु.—$^{b}$) G2 समर्पितं. Ś1 D10 परैः संप्रेषितो ह्ययं; Ñ V B D1-4.6 परैर्वचनमर्पितं. —$^{c}$) D11 ध्रुवं (for ब्रुवन्). Ñ V2 B D2.3.6 परार्थे; D11 परार्थः; T2 वधार्थं (for परार्थं). Ñ2 V B1-3 D6 धर्मज्ञ; B4 धर्मज्ञो (for परवान्).—$^{d}$) M3 न स (hypm.) (for न). Ś1 Ñ V B D1.2.4.6.10.11 वधं प्राप्तुम् (for दूतो वधम्).

12 Ñ1 om. 12.—$^{ab}$) B1 D4 वा (for च). D7.9 transp. राजन् and नान्यं. Ś1 Ñ2 V B D1.2.4.6.10 वानरं; D11 वै वरं (for खेचरम्).—D7.9 om. $12^{cd}$.—$^{c}$) D1.4.11 योन्यः पुन (D11 नान्यो हरि) रिहागच्छेत्.—$^{d}$) G1 पर-; Cv as in text (for परं).

13 ☞ Cv is missing from 13 to 5.51.10. —$^{a}$) Ñ2 V B D6 अद्य (for नास्य).—$^{b}$) D1.4.5.11 T3 -परंजयः. Ñ2 D6 न कार्यो राक्षसाधिप; V B न कार्यः शत्रुता-पन (V2 B2 °नः).—D4 om. $13^{c}$–$14^{b}$.—$^{cd}$) Ś1 D10 सर्वेषु (for सेन्द्रेषु). G1 transp. सेन्द्रेषु and देवेषु. D11 आख्यातुम् (for आस्थातुम्). Ś1 Ñ2 V1 D6.10.11 T1 अर्हसि (for अर्हति). D3 भवान्देवानपि विजित्य विजयेत पुरंदरं (hypm.).

9 For sequence in D5.7-9 T1.3 G M, cf. v.l. 1. B3 om. 9 (cf. v.l. 8). —a) M3 ऽयतियाद्. Ś1 Ñ V B1.2.4 D1-4.6.10.11 अ(B1 ऽय)तीयात्सागरो वेलां. ❀ Cr: अतियात् अतीयादित्यर्थः । दीर्घाभाव आर्षः ।; so also Cg. ❀ —b) Ś1 Ñ1 D1-4.10 तथा (for अपि). Ñ2 V B1.2.4 D6 चलेदपि च(Ñ2 D6 हि) मंदरः(V2 वसुंधरा): D11 मंदरप्लवनेन च. —c) Ś1 Ñ1 D10 जांबवंतं न (by transp.). D3 संग्रामे (for समरे). —d) B1.2 शत्रु- (for अरि-). Ś1 Ñ1 B4 D2-4.10.11 जयेयुर्युधि(D3 °युः सर्व-) राक्षसाः; Ñ2 V D6 चाल(V2 वार)येच्छत्रुवाहिनी; D1 नयेयुर्युधि राक्षसाः.

10 For sequence in D5.7-9 T1.3 G M, cf. v.l. 1. —a) B1.3 सर्वं. Ś1 Ñ1 D1.4.10 -संघातान्; Ñ2 V B1-3 D6 -संघातं; B4 -संघाते; D2.11 -संघा ये. —b) Ñ2 D6 रक्षसां. B1 D3.5.7-9 T1 G2 (T1 G2 second time) Cr.t पूर्वजाः; T1 ([first time] *inf. lin.* also as in text) M2 (both times) पूर्वगाः; G3 (first time) पूर्विकाः; Cm.g.k पूर्वकाः (as in text). Ś1 Ñ1 D10 राक्षसेश्वरपूर्वकान्; D1.2.4.11 राक्षसेभ्यश्च पूर्वजान्(D2 °काः; D11 °जाः). —After 10ab, D8 G1.2 (after second occurrence) ins.:

1263* तेषामपि न संदेहः समरे बलिनां वरः ।

—c) Ś1 D1-4.11 हि निधने; Ñ1 [ऽ]पि निधने; D7.9 T1 G3 (both second time) Ct [ऽ]पि नाशाय; D10 निहंतुं हि (for विनाशाय). —d) Ñ1 D2.3.11 तेषां वायु-; D1 तेषां वालि-; D4.5.7-9 T1.3 (T1.3 first time) G1.3 (first time) M (M2 first time) वीरो वालि- (for वीरो वायु-). Ś1 (with hiatus) D10 अयं(D10 कपिर्) वायुसुतो ह्यहं. ❀ Ck: वायुसुतः कपिरिति पाठः. ❀ —For 10cd, Ñ2 V B D6 subst.:

1264* अयमेको निहन्ता हि जाम्बवान्कपिसत्तमः ।

[B3.4 अहम्; D6 स्वयम् (for अयम्). B4 च (for हि). V1 illeg. for जांबवान्कपि-. B3 कपिबुद्धिमान् (for °सत्तमः).]

11 For sequence in D5.7-9 T1.3 G M, cf. v.l. 1. B3 om. 11ab. —a) Ñ1 पवनस्य; D7.9 प्लवगस्य (for पनसस्य). —b) Ś1 मैंदस्य; Ñ1 वनस्य; Ñ2 V B1.2.4 D1-4.6.10.11 T3 (second time) नलस्य (for नीलस्य).

G. 5.58.12
B. 5.59.16
L. 5.57.29

सदेवासुरयक्षेषु गन्धर्वोरगपक्षिषु ।
मैन्दस्य प्रतियोद्धारं शंसत द्विविदस्य वा ॥ १२
अश्विपुत्रौ महावेगावेतौ प्लवगसत्तमौ ।
पितामहवरोत्सेकात्परमं दर्पमास्थितौ ॥ १३
अश्विनोर्माननार्थं हि सर्वलोकपितामहः ।
सर्वावध्यत्वमतुलमनयोर्दत्तवान्पुरा ॥ १४
वरोत्सेकेन मत्तौ च प्रमथ्य महतीं चमूम् ।
सुराणाममृतं वीरौ पीतवन्तौ प्लवंगमौ ॥ १५
एतावेव हि संक्रुद्धौ सवाजिरथकुञ्जराम् ।
लङ्कां नाशयितुं शक्तौ सर्वे तिष्ठन्तु वानराः ॥ १६

---

D6 [ए]व (for च). —c) T1.3 (both second time) G2.3 (both times) विशीर्यंत (for [अ]व°). Ś1 V2 D1.4.10 गिरयोपि वि(D1 °यो व्यव)दीर्यंते(V2 °र्येयुः); Ñ1 पर्वतापि विदीर्यंते (metri causa); Ñ2 V1 B पर्वता अपि दीर्येयुः; D2 गिरयोप्यवसीदेयुः; D3.11 गिरयोपि हि(D11 °प्यत्र) दीर्येयुः.

**12** For sequence in D5.7–9 T1.3 G M, cf. v.l. 1. —a) Ś1 Ñ V B D1–6.10.11 न; D9 सु- (for स-). Ñ2 V2 B3 -युद्धेषु (for -यक्षेषु). —b) Ś1 Ñ V D1.2.4.10 पन्नगेषु नरे(Ñ2 V °गे)षु वा(V D2 च); B D6.11 पन्नगे-पूरगेषु च(D6 वा); D3 पन्नगेष्वमंदेषु च (sic). —c) M2 (second time) सुषेणं प्रति योद्धारं. —d) Ñ1 D1.3.4 पश्येयं; Ñ2 V B D2.6 मन्येहं; D10 पश्यामि (for शंसत). Ñ2 V B D2.6.10 G2 (both times) च (for वा). Ś1 पश्यामि द्विविधस्य च; D11 मन्येहं द्विपदस्य च; M2 (second time) सर्वे शंसत वानराः. —After 12 (second occurrence), M2 ins.:

1265* ऋक्षराजस्य तु बलं पुराणेषु च विश्रुतम् ।
तस्य नास्ति समो लोके जवे दर्पे च संनतौ ।

—Then M2 cont. 1261*.

**13** For sequence in D5.7–9 T1.3 G M, cf. v.l. 1. Ñ1 illeg. for $13^{ab}$. —a) B3 आत्मपुत्रौ; B4 अरिपुत्रौ. Ñ2 B1.2 T1.3 G1.3 M1.3 (T1.3 G1.3 M1 second time) महाभागाव्; B4 D8 (first time) महावीर्यौ(B4 °रौ); T2 M2 उभावेतौ; G2 (both times) महाबाहू (for महावेगाव्). V2 D6 अग्निपुत्रौ महाभागाव्; D1.3.4 अश्विनोरंगजा(D3 °स्तनया)वेतौ. —b) Ñ1 D1 महा-; D8 (first time) यौ तौ; T2 G2 (both times) M2 वीरौ; Ck as in text (for एतौ). Ś1 V B1.2.4 D2.10.11 एतौ तौ(V B1.2 एतौ हि; B4 समस्त) प्लवगोत्तमौ; Ñ2 B3 D6 इमौ (B3 वेगौ) हि प्लवगोत्तमौ; D7–9 (all second time) G1 M1 (both first time) बलवंतौ प्लवंगमौ. —After $13^{ab}$, D5 T2 (only l. 1) M2 Ct ins.; D7–9 T1.3 G2.3 M1 ins. after the first occurrence of $13^{ab}$; M3 ins. l. 1 and l. 2–7 after $13^{ab}$ and 16 respy.:

1266* एतयोः प्रतियोद्धारं न पश्यामि रणाजिरे ।
मयैव निहता लङ्का दग्धा भस्मीकृता पुनः ।
राजमार्गेषु सर्वेषु नाम विश्रावितं मया ।
जयत्यतिबलो रामो लक्ष्मणश्च महाबलः ।
राजा जयति सुग्रीवो राघवेणाभिपालितः । [5]
अहं कोसलराजस्य दासः पवनसंभवः ।
हनूमानिति सर्वत्र नाम विश्रावितं मया ।

[ D8 T1.3 G2.3 repeat l. 1 here (cf. v.l. 1). —(l. 2) D7–9 पुरी (for पुनः). —(l. 3) M3 सर्वत्र (for सर्वेषु). T1 G2.3 तथा; T3 तदा (for मया). —(l. 5) M1 जयतु. ]

—After the second occurrence of $13^{ab}$, G1 M1 ins.:

1267* मैन्दश्च द्विविदश्चोभावाभ्यां नास्ति समो युधि ।

☞ B3 missing after पितामह in $13^{c}$ up to 5.60.8 (except 18, 19 and colophon of Sarga 59).

—T2 om. $13^{cd}$. —c) M2 वरोत्सेधात्. —d) Ś1 D1.4.10 बलम् ; Ñ1 D2.11 वीर्यम् (for दर्पम्). Ñ2 V B1.2.4 D6 परं दर्पमवस्थितौ. —After 13, D8 T1.3 G M1.3 ins.; T2 cont. after l. 1 of 1266* (owing to om.):

1268* अमृतप्राशिनावेतौ सर्ववानरसत्तमौ ।

[ T2 G2 M1 -प्राशनाव्. G3 अमृतं प्राशनावेतौ (for the prior half). ]

**14** For sequence in M3, cf. v.l. 1. —a) Ś1 D10 माननार्थे हि; V चैव मानार्थं; B1 D6 माननार्थं च; T2 M3 माननार्थाय. —Ñ1 illeg. for $14^{cd}$. —c) Ś1 -[अ]युध्य-त्वम् ; V2 D7.9 -[अ]बाध्यत्वम् (for -[अ]वध्यत्वम्). —d) D3 तदा (for पुरा). Ś1 D1.2.4.10.11 उभयोर्दत्तवांस्तदा; Ñ2 V B1.2.4 D6 वीराभ्यामददत्तदा.

**15** For sequence in M3, cf. v.l. 1. —a) Ś1 Ñ2 V B1.2.4 D1–4.10.11 तेन (for वर-). Ś1 D10 M2 महता; Ñ1 D1–3 च ततः ; Ñ2 V B1.2.4 D4.6.11 च(B2 हि) तदा (for मत्तौ च). —b) Ñ2 V1 B1.2.4 D6 प्रधृष्य; V2 प्रहर्ष(corrupt) ; D3 प्रणुद्य (for प्रमथ्य). —d) V2 पीतवर्णौ (sic) (for °वन्तौ). D7.9 महाबलौ (for प्लवंगमौ).

**16** For sequence in M3, cf. v.l. 1. —a) Ś1 V D2.3.10 तदेतावपि; Ñ B1.2.4 D6 तदे(B4 उदि)तावति-; D1.4 तावेवापि सु- ; D11 तावेतावपि (for एतावेव हि). D9 संक्रुष्टौ (for संक्रुद्धौ). —b) D5 -संकुलां (for -कुञ्जराम्). V रथवाजिसकुंजरां. —cd) D3 सर्वे ह्यलं (for शक्तौ सर्वे). Ñ2 V B1.2.4 D6 लंकां राक्षससंपूर्णां दुर्धर्षां सूदयिष्यतः(B4 °थ). —After 16, D5.7.9 repeat 3–4 and M2 repeats 3–12.

अयुक्तं तु विना देवीं दृष्टवद्भिः प्लवंगमाः ।
समीपं गन्तुमस्माभी राघवस्य महात्मनः ॥ १७
दृष्टा देवी न चानीता इति तत्र निवेदनम् ।
अयुक्तमिव पश्यामि भवद्भिः ख्यातविक्रमैः ॥ १८
न हि वः प्लवने कश्चिन्नापि कश्चित्पराक्रमे ।
तुल्यः सामरदैत्येषु लोकेषु हरिसत्तमाः ॥ १९
तेष्वेवं हतवीरेषु राक्षसेषु हनूमता ।
किमन्यदत्र कर्तव्यं गृहीत्वा याम जानकीम् ॥ २०
तमेवं कृतसंकल्पं जाम्बवान्हरिसत्तमः ।
उवाच परमप्रीतो वाक्यमर्थवदर्थवित् ॥ २१

G. 5. 59. 1
B. 5. 60. 14
L. 5. 58. 1

17 D7.9 om. 17. T1.3 G3 om. 17ab.—ab) Ś1 Ñ1 D1.2.4.5.10.11 T2 हि; Cr.g as in text (for तु). D8 T2 G3 M2.3 च वानराः (D8 °रैः) (for प्लवंगमाः). Ś1 Ñ1 D1–4.10.11 सीतामसि(D3 °मि)तलोचनां; D5 विद्रवद्भिश्च वानराः (for b). Ñ2 V B1.2.4 जनकस्य सुतां जित्वा देवीमसितलोचनां. ✻ Cg: वानरा इति संबोधनम्. ✻ —D8 om. 17cd.—c) Ś1 Ñ1 D1–4.10.11 समीप(Ś1 Ñ1 D10 °पे)-गमनं तस्य; Ñ2 V B1.2.4 D6 युक्तं समीपगमनं.

18 a) Ś1 Ñ2 V B1.2.4 D6.11 सीता (for देवी). D4 वा (for च). B4 transp. न and च. D2 दृष्ट्वा सीता न वानीता.—Note hiatus between a and b.—b) Ś1 D1.2.4.10.11 [इ]त्येवं(Ś1 °व); D3 [इ]त्येतत् (for इति). D11 तु * (for तत्र). Ś1 D2.3.7–11 G1 M1 Cm.t निवेदितुं; Ñ1 D1.4 निवेदितं; Ñ2 V B1.2.4 D6 निवेदिते; Ck निवेदनम् (as in text).—cd) D5.7.9 Cm.t न युक्तम्. D2.3 इति (for इव). D7.9 -पौरुषैः; Ck as in text (for -विक्रमैः). Ś1 Ñ1 D1–4.10.11 जानामि and -कर्मभिः (for पश्यामि and -विक्रमैः). Ñ2 V B1.2.4 D6 वीर्य(V2 °र)विक्रमशौर्या(B4 °शूरा)णां घोषणं गर्हितं भवेत्.—After 18, Ñ2 V B1.2.4 D6 ins.:

1269* अथवा विक्रमे बुद्धिर्युक्ता दिव्येन कर्मणा ।
[D6 कथं वा (for अथवा). D6 बुद्धिं कुर्याद्.]

19 a) Ś1 D1–4.10.11 M3 नः(D3 चा) प्लवने. T1.3 G3 तुल्यो (for कश्चिन्). Ñ2 V2 B1.2.4 D6 सागरप्लवने योग्यो.—b) Ś1 Ñ2 V2 B4 D6.10 न च; B2 नरः; T3 नास्ति (for नापि).—d) V B1 हरिपुंगवाः (for °सत्तमाः). —After 19, Ś1 Ñ1 D1–4.7–11 ins.[f]; Ñ2 V B1.2.4 D6 subst. for 20:

1270* जित्वा लङ्कां सरक्षौघां हत्वा तं रावणं रणे ।
सीतामादाय गच्छामः सिद्धार्था हृष्टमानसाः ।
[(l. 1) B4 लंकां जित्वा (by transp.). D11 सरक्षस्कां (for °क्षौघां). Ś1 D3.10 जित्वा सराक्षसां लंकां (for the prior half). D6 वै (for तं).—(l. 2) Ñ2 V B1.2.4 D6 प्रसह्य सीतामानीय कृतार्था हृष्टमानसाः.]
—Thereafter, Ñ2 V B1.2.4 D6 cont. 1272*.

20 For 20, Ñ2 V B1.2.4 D6 subst. 1270*.—a) D3 T1.3 G3 [ए]व (for [ए]वं). Ś1 Ñ1 D1–4.7–11 -शेषेषु; D3 T2 M2 -वेगेषु; G2 M1 -वीर्येषु (for -वीरेषु).—c) T2 यत्र (for अत्र).—For 20cd, Ś1 Ñ1 D1–4.10.11 subst.:

1271* किं प्राप्तकालं कर्तव्यं प्राप्य गच्छाम मैथिलीम् ।
[D3 वक्तव्यं (for कर्तव्यं). D3 प्राप्तुं (for प्राप्य). Ś1 D10 गच्छामि. Ñ1 गच्छामः प्राप्य.].

—Thereafter all the above MSS. cont., while Ñ2 V B1.2.4 D6 cont. after 1270*; D7–9 T2 (only l. 1) Ct ins. after 20:

1272* रामलक्ष्मणयोर्मध्ये न्यस्याम जनकात्मजाम् ।
किं परिक्लिश्य तान्सर्वान्वानरान्वानरर्षभाः ।
वयमेव हि गत्वा तान्हत्वा राक्षसपुंगवान् ।
राघवं द्रष्टुमर्हामः सुग्रीवं सहलक्ष्मणम् ।

[(l. 1) Ś1 Ñ1 D10 न्यस्येत्स; Ñ2 B1 नेष्यामो; V पश्यसे; B2 D8 नेष्याम; B4 नयामो; D2 न्यसामो; D3.11 नेष्यामि; D6 पश्यामो (for न्यस्याम).—D8 om. l. 2.—(l. 2) B2 D1.2.4.11 Ctp °क्लेश्य; D7.9 Ct व्यलीकैस्तु (for परिक्लिश्य). V2 वः शूरान्; B1.2 D3 वः सर्वान्; B4 सर्वांश्च (for तान्सर्वान्). Ñ1 B4 D2.7.9 वानरर्षभान्.—V B1.2.4 D3.11 om. l. 3–4. —(l. 3) D2 समपि- (for एव हि). Ñ2 D6 तं (for तान्). Ñ2 D6 -पुंगवं.—(l. 4) Ś1 Ñ2 D1.2.6.10 ससुग्रीवं सलक्ष्मणं (for the post. half).]

21 b) D3 जांबुवा *****.—d) G2 अर्थविद् (for °वद्). T1.3 G2.3 अंगदं (for अर्थवित्).—For 21, Ś1 Ñ V (V1 after 1272* owing to om.) B1.2.4 D1.2.4.6.10.11 subst. and read after colophon; D3 subst. for 21cd and reads after 22; T2 subst. for 21ab:

1273* अङ्गदस्य वचः श्रुत्वा जाम्बवान्वाक्यमब्रवीत् ।
[D1.10 जांबु(D10 °म)वान्. T2 हरिसत्तमः (for वाक्यमब्रवीत्).]

—Thereafter all the above MSS. (except T2) cont.; D7–9 T2 Ct ins. after 21:

1274* नैषा बुद्धिर्महाबुद्धे यद्ब्रवीषि महाकपे ।
विचेतुं वयमाज्ञप्ता दक्षिणां दिशमुत्तमाम् ।
नानेतुं कपिराजेन नैव रामेण धीमता ।
कथंचिन्निर्जितां सीतामस्माभिर्नाभिरोचयेत् ।
राघवो नृपशार्दूलः कुलं व्यपदिशन्स्वकम् । [5]
प्रतिज्ञाय स्वयं राजा सीताविजयमग्रतः ।
सर्वेषां कपिमुख्यानां कथं मिथ्या करिष्यति ।
विफलं कर्म च कृतं भवेत्तुष्टिर्न तस्य च ।
वृथा च दर्शितं वीर्यं भवेद्वानरपुंगवाः ।

G. 5. 59. 0
B. 5. 60. 20
L. 5. 58. 0

न तावदेषा मतिरक्षमा नो
यथा भवान्पश्यति राजपुत्र ।
यथा तु रामस्य मतिर्निविष्टा
तथा भवान्पश्यतु कार्यसिद्धिम् ॥ २२

इति श्रीरामायणे सुन्दरकाण्डे अष्टपञ्चाशः सर्गः ॥ ५८ ॥

---

तस्माद्गच्छामहे सर्वे यत्र रामः सलक्ष्मणः । [10]
सुग्रीवश्च महातेजाः कार्यस्यास्य निवेदने ।

[ (l. 1) V B1.2.4 D2.6.11 महाबाहो; D3 मम मता; D4 महाबुद्धिर् ( for °बुद्धे ). Ñ1 D1.3.4.11 यां ( for यद् ). B1.2.4 महामते ( for °कपे ). —(l. 2) Ñ2 V B1.3 D6 विचिन्व( B1.3 D6 °नु )ध्वमितिप्रोक्ता( B2 °क्तं ); B4 विचिध्वमिति संप्रोक्ता ( sic ) ( for the prior half ). —(l. 3) Ś1 D10 तेन वै; Ñ1 D9 न नेतुं; Ñ2 V B1.2.4 D6 न नेतुं ( for नानेतुं ). Ñ2 V B1.4 D6 [अ]पि; D3 च ( for [ए]व ). Ś1 B2 D10 राघवेण( B2 लक्ष्मणेन ) च धीमता ( for the post. half ). —(l. 4) Ñ2 V B1.2.4 D1.4.6.7 T2 कथं विनि( T2 चेन्नि )र्जितां सीताम्( Ñ2 D6 साध्वीम् ) ( for the prior half ). D2.3.11 सोस्माभिर् ( for अस्माभिर् ). Ś1 D10 नैव; Ñ2 D6 सोभि- ; V2 सोपि; B2 इति; B4 अपि; D1 अभि- ; D8 न स ( for नाभि- ). —(l. 5) V2 च व्यपदिशन् ( hypm. ). Ś1 Ñ2 V B1.2.4 D2.6.10.11 महत् ( for स्वकम् ). —(l. 6) D8.9( also ) स्वकं ( for स्वयं ). Ñ1( with hiatus ) आत्मनो जयम् ( for सीताविजयम् ). —(l. 7) B4 भविष्यति; D11 करिष्यसि. —(l. 8) D7–9 विफलं ( for विपुलं ). Ś1 D2.10 तत्कृत्वा; Ñ1 D1.4 कृत्वा वै ( for च कृतं ). Ñ2 V B1.2.4 D6 विपुले( B1 °फले ) कर्मणि कृते ( for the prior half ). Ñ2 V1 B4 D1.2.4.6 तु ( for च ). —(l. 9) B2 तथा ( for वृथा ). Ś1 D1–4.10.11 वो; V2 नो; D6 न; T2 वा ( for च ). D11 पूर्वं ( for वीर्यं ). Ñ2 V B1.2.4 D6 वानरसत्तमाः ( for °पुंगवाः ). —(l. 10) Ñ1 D7–9 T2 गच्छाम वै ( for गच्छामहे ). Ñ2 V B1.2.4 D3.6 तत्र ( for सर्वे ). —(l. 11) Ñ2 V B1.2.4 D6 महाबाहुः ( for °तेजाः ). D11 निवेशनं ( for °दने ). Ñ2 V B1.2.4 D6 कार्यमेतन्निवे( V2 °ग )दितां ( for the post. half ). ]

22 Ś1 Ñ V B1.2.4 D1.2.4.6.10.11 om. 22. —[a]) D8 om. from न up to भवा in [b]. T1.3 G3 ते; Cm.t as in text ( for नो ). —[b]) D8 भवान्यथा ( by transp. ). D5 राजपुत्रः. —[c]) D3 T3 M2 हि; D5 तु ( for तु ). D3 विशिष्टा ( for निविष्टा ). —[d]) G3 पश्यति. ✿ Cg: अस्मिन्सर्गे सार्धषट्श्लोकाः. ✿ —After 22, D3 reads 1273*.

Colophon. V1 om.; B3 missing ( cf. v.l. 13 ). —*Sarga name* : Ś1 Ñ V2 B1.2.4 D1–4.6.10.11 अंगदवाक्यं. —*Sarga no.* ( figures, words or both ) : Ñ1 D1.2.4.10.11 om.; Ś1 Ñ2 D5–9 T1.3 G M1.3 60; V2 49; B4 D3 63; T2 M3 59. —After colophon, Ś1 Ñ V2 B1.2.4 D1.2.4.6.10.11 read 1273*; while D2 concludes with श्रीरामः; G M1.2 with श्रीरामाय नमः.

# ५९

ततो जाम्बवतो वाक्यमगृह्णन्त वनौकसः ।
अङ्गदप्रमुखा वीरा हनूमांश्च महाकपिः ॥ १
प्रीतिमन्तस्ततः सर्वे वायुपुत्रपुरःसराः ।
महेन्द्राग्रं परित्यज्य पुप्लुवुः प्लवगर्षभाः ॥ २
मेरुमन्दरसंकाशा मत्ता इव महागजाः ।
छादयन्त इवाकाशं महाकाया महाबलाः ॥ ३
सभाज्यमानं भूतैस्तमात्मवन्तं महाबलम् ।
हनूमन्तं महावेगं वहन्त इव दृष्टिभिः ॥ ४
राघवे चार्थनिर्वृत्तिं भर्तुश्च परमं यशः ।
समाधाय समृद्धार्थाः कर्मसिद्धिभिरुन्नताः ॥ ५
प्रियाख्यानोन्मुखाः सर्वे सर्वे युद्धाभिनन्दिनः ।
सर्वे रामप्रतीकारे निश्चितार्था मनस्विनः ॥ ६
प्लवमानाः खमाप्लुत्य ततस्ते काननौकसः ।
नन्दनोपममासेदुर्वनं द्रुमलतायुतम् ॥ ७
यत्तन्मधुवनं नाम सुग्रीवस्याभिरक्षितम् ।
अधृष्यं सर्वभूतानां सर्वभूतमनोहरम् ॥ ८

G. 5. 59. 13
B. 5. 61. 8
L. 5. 58. 14

## 59

☞ B3 missing for Sarga 59 ( except st. 18–20, 22 and colophon ) ( cf. v.l. 5.58.13 ). Ś1 Ñ V B1.2.4 D1.2.4.6.10.11 cont. the previous Sarga.

1 Ñ3 V2 B1.2.4 D6 om. 1. —$^{ab}$) T2 अगृह्णन्काननौकसः (for $^{b}$). Ś1 Ñ1 V1 D1–4.10.11 जगृहुस्तेथ तद्वाक्यं कपेर्जाम्बवतस्तदा (D4 °था). —After 1$^{ab}$, Ś1 V1 D2.3.10.11 ins., while Ñ2 V2 B1.2.4 D6 subst. for 2$^{cd}$ :

1275* बाढमित्येव चोक्त्वा वै प्रस्थानं समरोचयन् ।

[ V2 [उ]क्तं (for [उ]क्त्वा ). V2 B1.2.4 ते (for वै ). D3.6 बाढमित्येवमुक्त्वा च (for the prior half ). ]

—$^{c}$) D1 -प्रमुखान्वीरान् ( sic ). —$^{d}$) Ś1 D10 जांबवांश्च (for हनूमांश्च). T2 महाबलः.

2 $^{a}$) Ś1 D10 च ते (for ततः). —$^{b}$) T2 -पुरोगमाः (for -पुरःसराः). —For 2$^{ab}$, Ñ2 V2 B1.2.4 D6 subst. and read after 3; V1 ins. after 3 :

1276* अग्रे कृत्वा हनूमन्तं सर्वे वानरपुंगवाः ।

—$^{c}$) D1.4 महेंद्रं सं-; M3 महेंद्राद्रिं. D7–9 महेंद्रात्स-मुत्पत्य. —$^{d}$) Ś1 D2.10 वानरर्षभाः; Ñ1 V1 D1.3.4.11 वानरोत्तमाः. —Ñ2 V2 B1.2.4 D6 subst. 1275* for 2$^{cd}$.

3 $^{b}$) Ñ2 V1 B1.2.4 D6.11 महाद्विपाः; V2 °बलाः (for °गजाः). —$^{c}$) D9 छादयंतम् (for °यन्त ). —$^{d}$) D9 महाकायं. Ś1 Ñ1 D1.2.4.10.11 कपयस्तोयदोपमाः (D1.4.11 °दा यथा); D3 जग्मुर्वानरपुंगवाः. —After 3, Ñ2 V (V1 ins.) B1.2.4 D6 read 1276*.

4 $^{a}$) Ś1 D10.11 संपूज्यमानं; Ñ1 D1.4 सभाज्यमानो; B4 तं भ्राज°; D3 संभाव्य° (for सभाज्यमानं ). D6 भूत्यैस् (for भूतैस् ). Ś1 V B4 D3.10.11 च; Ñ1 D1.2.4 तैर् ; Ñ2 B1.2 D6 तु (for तम् ). —$^{b}$) Ś1 Ñ2 V B1.2.4 D6.10.11 हनूमंतं ( for आत्मवन्तं ). G1.2 M1 महाकपिं (for °बलम् ). Ñ1 D1.4 जांबवान्स (D1 °वांस्तु; D4 °न्सु ) महाबलः ; D2.3 हनूमंतं महाकपिं. —$^{c}$) Ś1 Ñ2 V B1.2 D6.10 कपिश्रेष्ठं महाभागं (Ś1 D10 °कायाः ) ; B4 D2.3.11 कपिश्रेष्ठा महाकायाः ( B4 °भागाः ) ; D4 हनुमांश्च महाभागः. —$^{d}$) Ś1 Ñ2 V B1.2.4 D2.3.6.10.11 G1 पिबंतः Cr.m.g.k.t as in text ( for वहन्त ). Ñ1 D1.4 पीयमान इवेक्षणैः.

5 $^{a}$) Ñ2 B1.4 D6 रामस्य ( for राघवे ). G2 M2 -संसिद्धिं; Cm.g.k.t as in text (for -निर्वृत्तिं). Ś1 D10 राघवस्यार्थसिद्धिं च; Ñ1 रामस्य कार्यसंसिद्धिं; V1 रामस्यार्थे विनिर्वृत्तं; B2 रामस्य चात्मनिर्वृत्तिं; D1.2.4.11 रामस्याप्य ( D2.11 °स्य चा )र्थसंसिद्धिं; D3 रामस्य कार्यसंपत्तिं. —$^{b}$) D5.7–9 S Ck.t कर्तुं च (for भर्तुश्च). Ś1 Ñ1 D1–4.10.11 विपुलं ( for परमं ). —D10 om. 5$^{c}$–6$^{b}$. —$^{c}$) B4 D7 समादाय ( for °धाय ). B2 समृध्यर्थाः ( for °द्धार्थाः ). —$^{d}$) B2 कार्य- (for कर्म- ). D3.6 उत्तमाः ( for उन्नताः ). Ñ1 D1.2.4.11 कर्म( D4 काम )सिद्धिमनुत्तमां.

6 D10 om. 6$^{ab}$ (cf. v.l. 5 ). —$^{a}$) B2 कपि- (for प्रिय- ). V2 B1.2.4 D1–4.6.11 -[उ]त्सुकाः ; T2 -पराः; G1.2 -सुखाः (for -[उ]न्मुखाः). —$^{b}$) V1 -कांक्षिणः; D6.11 -नंदिताः. —$^{d}$) D7.11 निश्चितार्थ-.

7 $^{a}$) G1 प्रीयमाणाः ( for प्लवमानाः ). Ś1 V D6.10.11 M2 आश्रित्य; Ñ2 B1.2.4 D2–4 आवृत्य; T1 उत्प्लुत्य; T3 G1.3 उत्पत्य. —$^{b}$) D3 सर्वे ते; D6 ततस्तु (for ततस्ते ). —$^{c}$) B4 आलोक्य ( for आसेदुर् ). —$^{d}$) Ś1 Ñ1 V B2.4 D1.4.10.11 -रु( Ñ1 -श )ताकुलं; Ñ2 D6 -लतान्वितं; B1 D2.3 -लतावृतं; D7–9 T2.3 G1 M2 -शतायुतं ( for -लतायुतम् ).

8 $^{a}$) D10 यत्तु; G1 युक्तं (for यत्तन् ). Ś1 Ñ V B1.2 D1.2.4.6.10.11 श्रीमत् ( for नाम ). —$^{b}$) Ś1 Ñ V1 B4 D1–4.10.11 सुरक्षितं; V2 B1.2( m. also सुराचिंतं ) D6 सुसंचितं ( for [अ]भिरक्षितम् ). —$^{c}$) D3 अध्यक्षं; D5 अदृश्यं ( for अधृष्यं ). Ś1 D10 सर्वलोकानां; D9 om.( hapl. ) ( for सर्वभूतानां ).

G. 5. 59. 14
B. 5. 61. 9
L. 5. 58. 15

यद्रक्षति महावीर्यः सदा दधिमुखः कपिः ।
मातुलः कपिमुख्यस्य सुग्रीवस्य महात्मनः ॥ ९
ते तद्वनमुपागम्य बभूवुः परमोत्कटाः ।
वानरा वानरेन्द्रस्य मनःकान्ततमं महत् ॥ १०
ततस्ते वानरा हृष्टा दृष्ट्वा मधुवनं महत् ।
कुमारमभ्ययाचन्त मधूनि मधुपिङ्गलाः ॥ ११
ततः कुमारस्तान्वृद्धाञ्जाम्बवत्प्रमुखान्कपीन् ।
अनुमान्य ददौ तेषां निसर्गं मधुभक्षणे ॥ १२
ततश्चानुमताः सर्वे संप्रहृष्टा वनौकसः ।
मुदिताश्च ततस्ते च प्रनृत्यन्ति ततस्ततः ॥ १३
गायन्ति केचित्प्रणमन्ति केचि-
न्नृत्यन्ति केचित्प्रहसन्ति केचित् ।
पतन्ति केचिद्विचरन्ति केचि-
त्प्लवन्ति केचित्प्रलपन्ति केचित् ॥ १४

9 $^{a}$) Ś$_{1}$ D$_{7.9.10}$ -वीरः; Ñ$_{2}$ V B$_{1.2}$ D$_{6}$ -बाहुः; D$_{3}$ -तेजाः (for -वीर्यः).—$^{c}$) Ñ$_{2}$ V B$_{1.2}$ D$_{3.6}$ M$_{1}$ -राजस्य (for -मुख्यस्य).—$^{d}$) Ś$_{1}$ D$_{1.2.4.10.11}$ [अ]मितौजसः (for महात्मनः).

10 $^{a}$) G$_{1}$ वचनमागम्य (sic) (for वनमुपा°).—$^{b}$) Ś$_{1}$ B$_{4}$ D$_{1-4.10.11}$ हृष्टमानसाः (for परमोत्कटाः). Ñ$_{2}$ V B$_{1.2}$ D$_{6}$ दृष्ट्वा प्रीतिमुपागताः.—$^{c}$) B$_{4}$ प्लवगा (for वानरा). Ñ$_{2}$ V$_{2}$ B$_{1.2}$ D$_{5.6}$ G$_{1}$ वानरेशस्य. D$_{8}$ वानराधिपतेरस्य.—$^{d}$) Ś$_{1}$ Ñ$_{2}$ V B$_{1.2}$ D$_{2.6.10}$ मनःकांतं मनोहरं; Ñ$_{1}$ D$_{3.11}$ मनःकांतं मनोरमं; B$_{4}$ D$_{1.4}$ वनं कांतं मनोरमं (B$_{4}$ °हरं); D$_{5.7.9}$ Ct मनःकांतं महावनं; D$_{8}$ T$_{2}$ M$_{1}$ मनःकांतं महद्वनं. ❀ Cv: मनःकान्ततमं महदिति पाठः. ❀

11 $^{c}$) D$_{1.4.5}$ अभियाचंते (for अभ्ययाचन्त).—$^{d}$) D$_{5}$ -भक्षणे (for -पिङ्गलाः).—For 11$^{cd}$, Ś$_{1}$ Ñ V B$_{1.2.4}$ D$_{2.3.6.10.11}$ subst.:

1277* हनूमन्तमयाचन्त जाम्बवत्प्रमुखास्तदा ।

[D$_{8}$ ऊचुरेतज् (for अयाचन्त). Ś$_{1}$ Ñ$_{1}$ जांबुवत्-. Ñ$_{2}$ D$_{6}$ ततः; V$_{2}$ तथा (for तदा).]

—Then all the above MSS. cont.:

1278* स चाङ्गदमुपागम्य याचते स्म तदा मधु ।
सिद्धार्थानां किलास्माकं प्रसादं कर्तुमर्हसि ।
अङ्गदस्तु हनूमन्तं प्रशस्य शुभया गिरा ।
किमिच्छसि वदस्वेति प्रीतो वाक्यमुवाच ह ।
अङ्गदस्य वचः श्रुत्वा हनूमान्हरिपुंगवः । [5]
ज्ञातिभिः सहितो हर्षादिदं वचनमब्रवीत् ।
राज्ञस्तु यत्ते पितुरप्रधृष्यं
वनं बभूवाप्रतिमं सुगुप्तम् ।
तद्देहि दायं हरिपुंगवानां
सुदुर्लभं नो हरिराजपुत्र । [10]

Colophon

[B$_{1}$ reads l. 1 within brackets.—(l. 1) Ñ$_{2}$ V B$_{2}$ D$_{6}$ सोपि; B$_{1}$ ते तु; B$_{4}$ सर्वे (for स च). D$_{2.3}$ याचति. D$_{3}$ तथा (for तदा). Ñ$_{2}$ V B$_{2}$ D$_{6}$ हनूमानिदमब्रवीत्; B$_{1}$ याचंते स्म सदा मधु; B$_{4}$ मधु याचंत सुव्रत (for the post. half).—After l. 1, B$_{1}$ ins.:

1278(A)* सोऽप्यङ्गदमुपागम्य हनूमानिदमब्रवीत् ।;

while B$_{4}$ ins.:

1278(B)* इत्युक्तो हनुमान्वीरो याचते स्म सदा मधु ।

—(l. 2) Ñ$_{2}$ V B$_{1.2.4}$ D$_{6}$ त्वम् (for किल). Ñ$_{1}$ सिद्धानां किंचिद् (for सिद्धार्थानां किल).—Ś$_{1}$ om. (hapl.) l. 3-4.—(l. 3) D$_{3}$ च (for तु). Ñ V$_{1}$ B$_{4}$ प्रहस्य; D$_{3}$ शशंस (for प्रशस्य).—(l. 4) Ñ$_{2}$ V$_{1}$ B$_{1}$ D$_{3}$ प्रीति- (for प्रीतो). V$_{2}$ वाचम् (for वाक्यम्).—(l. 5) B$_{1}$ मारुतात्मजः; D$_{2}$ हरियूथपः (for हरिपुंगवः).—(l. 7) Ñ$_{2}$ V B$_{1.2.4}$ D$_{6}$ क्षौद्रस्य; D$_{3}$ राज्ञश्च (for राज्ञस्तु). Ñ$_{2}$ B$_{4}$ तु पितुः प्रधृष्यं (for पितुरप्रधृष्यं).—(l. 8) V$_{1}$ सुशुभं (sic); B$_{4}$ शुभं च (for सुगुप्तम्).—(l. 9) Ñ V B$_{1.4}$ D$_{6}$ दानं (for दायं).

[*Sarga name*: Ś$_{1}$ D$_{2.3.10.11}$ वानरप्रत्यागमनं (D$_{3}$ °नः); Ñ$_{1}$ मधुवनपार्थक्रमः; Ñ$_{2}$ V B$_{1.2.4}$ मधुवन(V B$_{2}$ °ना)गमनं; D$_{6}$ मधुगमनं.—*Sarga no.* (figures, words or both): Ñ$_{1}$ D$_{2.10.11}$ om.; Ś$_{1}$ Ñ$_{2}$ D$_{6}$ 61; V$_{1}$ 60; V$_{2}$ 50; B$_{1.2}$ 59; B$_{4}$ D$_{3}$ 64.—After colophon, D$_{2}$ concludes with राम.]

—Thereafter Ś$_{1}$ Ñ$_{1}$ D$_{2.3.10.11}$ read 5.60.2; while Ñ$_{2}$ V B$_{1.2.4}$ D$_{6}$ read 5.60.2-12 (except 11$^{cd}$, including star passages and omissions).—After 11, D$_{8}$ ins. विष्णवे नमः.

12 Ñ$_{2}$ V B$_{1.2.4}$ D$_{6}$ om. 12-13.—$^{a}$) Ś$_{1}$ Ñ$_{1}$ D$_{1-4.8.10.11}$ सर्वान् (for वृद्धान्).—$^{b}$) Ś$_{1}$ Ñ$_{1}$ D$_{1-4.10.11}$ T$_{3}$ G$_{3}$ M$_{1}$ हरीन् (for कपीन्).—$^{c}$) D$_{11}$ अनुज्ञां प्रददौ तेषां.—$^{d}$) Ś$_{1}$ D$_{10}$ विसर्गं.—After 12, Ś$_{1}$ Ñ$_{1}$ D$_{2.3.10.11}$ read 5.60.3-12 (including star passages and omissions); while D$_{1.4.7-9}$ T$_{2}$ ins. 1291*.

13 Ś$_{1}$ Ñ V B$_{1.2.4}$ D$_{1-4.6.10.11}$ om. 13 (for Ñ$_{2}$ V B$_{1.2.4}$ D$_{6}$, cf. v.l. 12).—$^{b}$) D$_{7-9}$ सुसंहृष्टा (for संप्र°).—$^{cd}$) T$_{2}$ M$_{1}$ केचित् (for ते च). M$_{3}$ मुदिताः प्रेरिताश्चापि प्रनृत्यंतोभवंस्ततः. ❀ Cy: मुदिताश्च ततस्ते चेति पाठः. ❀

14 For 14-17$^{b}$, Ś$_{1}$ Ñ$_{1}$ B$_{4}$ D$_{1-4.10.11}$ subst. 1282*; while Ñ$_{2}$ V B$_{1.2}$ D$_{6}$ subst. 1283*.—$^{ab}$) D$_{7-9}$ transp. प्रणमन्ति and प्रहसन्ति.—$^{c}$) D$_{7}$ पठंति (for पतन्ति). D$_{7-9}$ प्रचरंति; T$_{1.3}$ G$_{3}$ विहरंति; T$_{2}$ प्रवदंति (for विचरन्ति).—$^{d}$) M$_{3}$ प्रतपंति (for प्रलपन्ति).

परस्परं केचिदुपाश्रयन्ते
परस्परं केचिदतिब्रुवन्ते ।
द्रुमाद्द्रुमं केचिदभिप्लवन्ते
क्षितौ नगाग्रान्निपतन्ति केचित् ॥ १५
महीतलात्केचिदुदीर्णवेगा
महाद्रुमाग्राण्यभिसंपतन्ते ।
गायन्तमन्यः प्रहसन्नुपैति
हसन्तमन्यः प्रहसन्नुपैति ॥ १६
रुदन्तमन्यः प्ररुदन्नुपैति
नुदन्तमन्यः प्रणुदन्नुपैति ।
समाकुलं तत्कपिसैन्यमासी-
न्मधुप्रपानोत्कटसत्त्वचेष्टम् ।
न चात्र कश्चिन्न बभूव मत्तो
न चात्र कश्चिन्न बभूव तृप्तः ॥ १७

G. 5. 60. 18
B. 5. 61. 19
L. 5. 59. 23

---

❀ Cv.g: "गायन्ति केचित्प्रणद( Cg °म )न्ति केचिन्नृत्यन्ति केचित्प्रहसन्ति केचित्। पतन्ति केचिद्विचरन्ति केचित्प्लवन्ति केचित्प्रवद( Cg °लप )न्ति केचित् " इति पाठः. ❀

15 For subst. in Ś1 Ñ V B1.2.4 D1–4.6.10.11, cf. v.l. 1282* and 1283*. M2 reads $15^{a}$ twice. —$^{a}$) D7.9 उपाश्रयंति; M2 (both times) अपाश्रयंते. —$^{b}$) D7.9 अतिब्रुवंति; T2 M3 उपब्रुवंते. —After $15^{ab}$, D8 T2 ins.; D5 T1.3 G2.3 M2.3 ins. l. 1 after $15^{b}$ and l. 2 after $15^{d}$ (M2 after $15^{a}$ [r.]); G1 M1 ins. after $15^{a}$:

1279* परस्परं केचिदुपारमन्ते
परस्परं केचिदुपाक्रमन्ते ।

[(l. 2) D5 उदीर्णवेगं; T1.3 G3 उ( G3 अ )पक्रमंते; M2 अपाक्रमंते (for उपाक्रमन्ते).]

—$^{c}$) D5.7.9 T2 G2 M3 अभिद्रवंति( D5 M3 °ते ); M1 अभिप्लवंति (for अभिप्लवन्ते).

16 For subst. in Ś1 Ñ V B1.2.4 D1–4.6.10.11, cf. v.l. 1282* and 1283*. M1 reads $16^{ab}$ twice. —$^{b}$) D5.7–9 G2 M3 [अ]भिसंपतंति; T1 [अ]ति°; T2 [अ]तिसंपतंति; M3 [अ]भिसंप्लवंते (for [अ]भिसंपतन्ते). —After $16^{ab}$, D8 T1.3 G M1 (after $16^{ab}$ [r.]) ins.:

1280* धावन्ति केचिन्निपतन्ति केचि-
द्दृष्यन्ति केचिद्विलपन्ति केचित् ।

[(l. 1) D8 विचरंति (for निपतन्ति). —(l. 2) D8 महाबला वानरयूथमुख्याः.]

—After $16^{b}$, T2 reads $17^{b}$.

—$^{c}$) D9 om. गायन्त. G1 M1 प्ररुदन् (for प्रहसन्). —D7.9 M1 om. (hapl.) $16^{d}$. G1 transp. $16^{d}$ and $17^{a}$. —$^{d}$) D5.8 G2 M2.3 प्ररुदन्; T2 प्रणदन्; G1 प्रवदन् (for प्रहसन्). —After 16, G1 ins.:

1281* वदन्तमन्यः प्रणदन्नुपैति.

17 T2 om.; M1 reads $17^{a}$ twice. G1 transp. $16^{d}$ and $17^{a}$. —$^{a}$) D5.8 प्रणदन्; T1.3 M2.3 प्रणुदन्; G1.3 M1 प्रहसन् (for प्ररुदन्). —M1 om. (hapl.) $17^{b}$. T2 reads $17^{b}$ after $16^{b}$. —$^{b}$) D5.8 T1.3 G1 नदंतम्. D5 T2 प्रणदन्; G1 प्रलपन्; G2 प्ररुदन् (for प्रणुदन्). —For 14–$17^{b}$, Ś1 Ñ1 B4 D1–4.10.11 subst.:

1282* खादन्ति केचिद्विहरन्ति केचि-
त्क्रमन्ति केचित्प्रहसन्ति केचित् ।
वदन्ति केचित्प्रपतन्ति केचि-
त्स्वपन्ति केचित्कथयन्ति केचित् ।
गायन्ति केचिद्विमृशन्ति केचि- [5]
न्नृत्यन्ति केचित्प्रपतन्ति केचित् ।
ध्यायन्ति केचित्प्रपतन्ति केचि-
त्क्रुध्यन्ति केचित्कृपणन्ति केचित् ।
गायन्ति केचिद्विमनोनुकूलं
वदन्ति केचित्प्रलपन्ति केचित् । [10]
पिबन्ति केचित्तु वसन्ति केचि-
त्स्नयन्ति केचित्प्लवगाः प्रहृष्टाः ।
परस्परं केचिदुपाश्रयन्ति
परस्परं केचिदपाश्रयन्ति ।
महीतले केचिदुदीर्णसत्त्वा [15]
द्रुतं द्रुमाग्रादभिसंपतन्ति ।
प्रगीतमन्यः प्रहसन्तमेति
प्रनृत्तमन्यः प्रपतन्तमेति ।
प्रयातमन्यः सहसाभ्युपैति
हसन्तमन्यः प्रवदन्तमन्यः । [20]
द्रुमाद्द्रुमं केचिदपाक्रमन्ति
क्षितौ नगाग्रात्प्रपतन्ति केचित् ।
महीधरात्केचिदुदीर्णसत्त्वा
महाद्रुमाग्राण्यभिसंपतन्ति ।

[B4 om. l. 1–2. D11 om. l. 2–9. —(l. 2) Ś1 D10 द्रवंति; D2.3 रुदंति (for क्रमन्ति). Ś1 D10 प्रहरंति (for °हसन्ति). Ñ1 विहस्य केचिद्विचरंति मत्ताः. —(l. 3) Ś1 D10 धावंति; Ñ1 D2.3 न( D3 नं )दंति; B4 पिबंति (for वदन्ति). Ñ1 विलसंति; B4 D4 विनदंति; D2.3 प्रणुदंति (for प्रपतन्ति). —Ś1 D10 om. (hapl.) l. 4–11. D3 om. (hapl.) l. 4. —(l. 4) B4 चैव (for second केचित्). —(l. 5) D3 स्वपंति (for गायन्ति). Ñ1 illeg. for विमृशन्ति केचित्. —D3 om.

(hapl.) l. 6. —(l. 6) D3 प्रहरंति (for नृत्यन्ति). —For l. 5-6, B4 subst. and reads before l. 3:

1282(A)* केचिन्नन्दन्ति गायन्ति नृत्यन्ति च हसन्ति च।

—B4 om. l. 7-13. —(l. 7) Ñ1 प्रवदंति; D4 प्रपठंति (for प्रपतन्ति). —(l. 8) Ñ1 रमयन्ते च कश्चित्; D2.4 क्षपयंति केचित् (for क्रुपणन्ति केचित्). —D3 transp. l. 9 and 10. —(l. 9) D3 om. (hapl.) गायन्ति केचि. D4 हि (for वि-). —For l. 9, Ñ1 D2 subst.; while D3 ins. after l. 8:

1282(B)* स्तुवन्ति केचिद्विहरन्ति केचित्.

[D2 विहसंति; D3 प्रवदंति (for विहरन्ति).]

—(l. 10) Ñ1 D2.3.11 दीव्यंति (for वदन्ति). D11 प्रपतंति (for प्रलपन्ति). —D3 reads l. 11-16 (om. l. 14) and l. 5 after l. 1. —(l. 11) Ñ1 D11 प्रहसंति; D2 प्रहरंति; D3 प्रवमंति (for तु वसन्ति). —(l. 13) Ś1 D10 अपस्नवंति; Ñ1 अपाक्रमंति; D2.11 अपा° (for उपाश्रयन्ति). —Ñ1 om. l. 14-15. D3 om. (hapl.) l. 14. —(l. 14) Ś1 D10 अपत्रपंति; D2.4.11 अपाक्रमंति (for अपाश्रयन्ति). —D3 om. l. 15-16. —(l. 15) Ś1 D10 महीगताः; D3.11 महीधरात् (D11 °तलात्) (for महीतले). —(l. 16) Ś1 Ñ1 B4 D3.10 द्रुमाग्राण्यपि (B4 D3 °भि-) (for द्रुमाग्रादभि-). —(l. 17) D2 अन्यं. Ś1 Ñ1 B4 D2.3.10.11 प्र (Ś1 D10 तु) हसन्नुपैति (for प्रहसन्तमेति). —Ś1 Ñ1 B4 D2.10.11 om. l. 18. —(l. 18) D3 प्ररुदन्नुपैति (for प्रपतन्तमेति). —(l. 19) D2 अन्यं. B4 गायंतमन्यः. —After l. 19, B4 ins.:

1282(C)* वदन्तमन्यः प्ररुदन्नुपैति
लिहन्तमन्यः प्रलिहन्नुपैति।

—B4 om. l. 20-24. —(l. 20) Ñ1 प्रपतंतम् (for प्रवदन्तम्). D3.11 प्रपत (D11 °ठ) न्नुपैति. Ś1 D2.10 हसंतमन्यं प्रपतंतमन्यं. —After l. 20, D3 reads 17[d]. —Ñ1 illeg. from l. 21 up to st. 19. —(l. 21) Ś1 D10 अपक्रमंति; D3 उपाक्रमंति (for अपाक्रमन्ति). D2 द्रुमाद्रुतं केचिदपाक्रमंते. —After l. 21, Ś1 D10 (reads twice).11 ins.:

1282(D)* महीतलं केचिदपक्रमन्ति.

[D11 महीतलात् and अपाक्रमंति.]

—(l. 22) Ś1 D2.3.10 क्षितिं (for क्षितौ). D3 न यांतं (for नगाग्रात्). Ś1 D2.10 निपतंति (for प्रपतन्ति). D11 क्षिपंति केचिद्विपतंति केचित्. —After l. 22, Ś1 D2 (l. 1 only).10 ins.:

1282(E)* केचित्क्षितेरम्बरमाव्रजन्ति
हसन्तमन्यः प्रपठन्नुपैति।

—Ś1 D10.11 om. l. 23-24. D2 reads l. 23-24 after l. 14; while D3 reads l. 23-24 after l. 9 (transp.). —(l. 23) D2.3 महीतलात् (for महीधरात्). —(l. 24) D1 द्रुमं; D3 द्रुतं (for महा-).];

while Ñ2 V B1.2 D6 subst.:

1283* गायन्ति केचित्प्रवदन्ति केचि-
न्नृत्यन्ति केचित्प्रहसन्ति केचित्।
पिबन्ति केचिद्विलपन्ति केचि-
त्स्वपन्ति केचित्प्ररुदन्ति केचित्।
परस्परं केचिदपाश्रयन्ति
क्षीबा द्रुमाग्रात्प्रपतन्ति केचित्। [5]
महीतलात्केचिदुदीर्णवेगाः
पुनर्द्रुमाग्रान्प्रति संपतन्ति।
प्रतीपमन्यः प्रहसन्नुपैति
प्रसुप्तमन्यः प्रपतन्नुपैति। [10]
प्रयातमन्यः सहसाभ्युपैति
रुदन्तमन्यः प्ररुदन्नुपैति।

[(l. 3) V2 B1.2 विनदंति (for विलपन्ति). —(l. 4) B1 हसंति (for स्वपन्ति). V B2 कथयंति (for प्ररुदन्ति). —(l. 5) V1 उपाश्रयंति; B1.2 अपाश्रयंते. —V2 repeats l. 6 after l. 12. —(l. 6) V2 (second time) अभिसंक्षिपंति (for प्रपतन्ति केचित्). —(l. 8) V2 B1.2 द्रुमाग्राण्य (B2 °न) भि- (for द्रुमाग्रान्प्रति). —(l. 9) B2 प्रतीक्ष-मन्यः. —(l. 10) D6 प्रहसन् (for प्रपतन्). —V2 om. l. 11. B1 om. (hapl.) from सहसा in l. 11 up to अन्यः in l. 12. —(l. 11) B1 प्रशांतमन्यः; B2 प्रयातुमन्यः. —(l. 12) V2 प्रहसन् (for प्ररुदन्).]

—After 17[b], D8 T2 G1 (T2 G1 l. 1 only) ins.:

1284* प्लवन्तमन्यः प्रपतन्नुपैति
पतन्तमन्यः प्रलपन्नुपैति।
मधुप्रपानं मधुपानरम्भं.

—M1 om. 17[d]. D3 reads 17[d] after l. 20 of 1282*. —[d]) Ñ2 D6 -प्रकृष्ट-; D5.8 T1 G1 -प्रदान-; Cv.r.m.g.t as in text (for -प्रपान-). Ñ2 V D6 -मत्तचेष्टं; B1 -संविचेष्टं; D3 -नष्ट° (for -सत्त्वचेष्टम्). ✻ Cv: "रुदन्तमन्यः प्रणुदन्नुपैति अदन्तमन्यः प्रणुदन्नुपैति" इति पाठः। मधुप्रपानम्, मधुपानारम्भः: "मधुप्रदानोत्कटसत्त्वचेष्टा" इति तु सम्यक्।; Cr: मधुप्रपानोत्कटसत्त्वचेष्टमिति सम्यक्. ✻ —D8 om. (hapl.) from मत्तो in 17[e] up to बभूव in 17[f]. —[e]) Ñ2 V B1.2.4 D2.3.6.8 M2 न तत्र; D4 तत्रात्र (for न चात्र). —D10 om. (hapl.) from कश्चिन् up to उवाच in 20[a]. D3 प्रबभूव. B1 हृष्टो; G1 M1 तृप्तो (for मत्तो). —B1 om. 17[f]. —[f]) D5 reads first न in marg. Ñ2 V B2.4 [अ]पि (for [अ]त्र). D3 तत्र and प्रबभूव (for चात्र and न बभूव respy.). Ñ2 हृष्टः; D7.9 T1 Ct दृप्तः; G1 M1 मत्तः (for तृप्तः).

ततो वनं तत्परिभक्ष्यमाणं
द्रुमांश्च विध्वंसितपत्रपुष्पान् ।
समीक्ष्य कोपाद्दधिवक्त्रनामा
निवारयामास कपिः कपींस्तान् ॥ १८

स तैः प्रवृद्धैः परिभर्त्स्यमानो
वनस्य गोप्ता हरिवीरवृद्धः ।
चकार भूयो मतिमुग्रतेजा
वनस्य रक्षां प्रति वानरेभ्यः ॥ १९

उवाच कांश्चित्परुषाणि धृष्ट-
मसक्तमन्यांश्च तलैर्जघान ।
समेत्य कैश्चित्कलहं चकार
तथैव साम्नोपजगाम कांश्चित् ॥ २०

स तैर्मदाच्चाप्रतिवार्यवेगै-
र्बलाच्च तेनाप्रतिवार्यमाणैः ।
प्रधर्षितस्त्यक्तभयैः समेत्य
प्रकृष्यते चाप्यनवेक्ष्य दोषम् ॥ २१

नखैस्तुदन्तो दशनैर्दशन्त-
स्तलैश्च पादैश्च समापुवन्तः ।
मदात्कपिं तं कपयः समग्रा
महावनं निर्विषयं च चक्रुः ॥ २२

G. 5. 61. 20
B. 5. 61. 24
L. 5. 59. 29

इति श्रीरामायणे सुन्दरकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

---

18 D10 om.; Ñ1 illeg. for 18 (for both, cf. v.l. 17). D1.4 om. 18$^{ab}$.—a) T3 G2.3 Cv तैः (for तत्). Ś1 परिभुज्यमानं; Ñ2 V D6 प्रवि(V2 परि)भज्यमानं (for परिभक्ष्यमाणं).—b) D3 नगांश् (for द्रुमांश्). B2 विभ्रंशित- (for विध्वंसित-). V B2 -पुष्पपत्रान् (by transp.).—c) Ś1 D2.3.11 सर्वान्; Ñ2 V B1.2.4 D6 तद्वै; D1.4 मत्तान् (for कोपाद्).—d) D1.4 कपीन्समस्तान्; D2 कपिः कपीशान्; D8 महाकपींस्तान्.—After 18, Ś1 Ñ1(illeg.) D1–4.11 read 21.

19 D10 om.; Ñ1 illeg. for 19 (for both, cf. v.l. 17).—a) Ś1 Ñ2 V B1.2 D1.3.4.6.11 प्रमत्तैः; B4 समूहैः; D2 प्रपन्नैः (for प्रवृद्धैः). Ñ2 प्रतिवार्यमाणो; V B1.2.4 D6 °वार्यमाणो(B2 °णैः) (for परिभर्त्स्यमानो).—b) D6.7.9 -वृद्धवीरः (by transp.).—c) Ñ2 D6 गतिम्; D5 पुनर् (for मतिम्). M2 उग्रवेगा.—d) Ñ2 V B1.2.4 D6 वानरेषु (for वानरेभ्यः). Ś1 D1–4.11 वनस्य तस्य प्रतिरक्ष(D1.4.11 °वार)णार्थं.—After 19 (followed by colophon), Ñ2 V B1.2.4 D6 read 5.60.11$^{cd}$ (preceded by 1293*) and 13–26(including omissions and insertions).

20 D10 om. उवाच in a (cf. v.l. 17).—a) Ś1 Ñ1 D10 कश्चित्; B4 किंचिन्. Ś1 Ñ1 D10 दुष्टः; D2.11 क्रुद्धः; D3 T2 रुष्टः; D7.9 [अ]भीतम् (for धृष्टम्). Ñ2 D6 मधुरेण वाचा; V B मधुराणि वाचा(B3 राजा); D1.4 परुषं सरोषः (for परुषाणि धृष्टम्).—b) Ñ2 V B1.4 D6 संसक्तम्; B2 संयुक्तम्; B3 संशब्दम् (for असक्तम्). Ś1 Ñ1 D1–4.10.11 T2 कांश्चित्तलेनाभि(D10 °पि)जघान रोषात्.—c) Ñ2 V B1–3 D6.10.11 कश्चित् (for कैश्चित्). B2 कलहांश्.—d) D5 तदा (for तथा). D3 कैश्चित् (for कांश्चित्). V1 B D6 न चैव तत्रोपजगाम(B4 °गान) कांश्चित्; V2 बलं च तत्रोपजगाम कश्चित्.

21 Ñ1 illeg. for 21 (cf. v.l. 17). D10 om. 21. Ś1 Ñ1 (illeg.) D1–4.11 read 21 after 18.—a) Ś1 महात्माप्रतिवीर्यरूपैर्; Ñ2 V B1.2.4 D7.9 मदादप्रतिवार्यवेगैर्; D1.4 °च्चाप्रतिपन्नवीर्यैर्; D2.3.11 °च्चाप्रतिरूपवीर्यैर्; D5 G1.2 M3 °त्संपरिवार्य वाक्यैर्; D8 मदांधः प्रतिवार्यवेगैर्; T2 M1.2 °त्संपरिवार्यमाणो(M2 °माणैर्) (for मदाच्चाप्रतिवार्यवेगैर्). ❀ Cv: स तैर्मदाच्चाप्रतिवार्यवेगैरिति पाठः. ❀—b) V2 वनाच्च. T3 तत्र (for तेन). Ñ2 V1 B1.2 D1–4.6.11 [उ]पनिवार्यमाणैः; D7.9 T2 M3 प्रतिवार्यमाणैः; M2 [अ]प्रतिवार्यवाक्यैः. Ś1 बलाद्बलौघैः परिवार्यमाणः; B4 बलान्वृतो नोपनिवार्यमाणैः.—c) Ñ2 B1.2.4 प्रहर्षितैस्(Ñ2 °तस्); D6 प्रदर्पितैस्; D7.9 Ct प्रधर्षणे; Cv as in text (for प्रधर्षितस्).—d) M3 प्रहृष्यते; Cv प्रतुष्यते; Cm.t as in text (for प्रकृ°). M3 [अ]नपेक्ष्य; Cv.m.t as in text (for °वेक्ष्य). Ś1 प्रकर्षितः कर्षितवान्परान्सः; Ñ2 प्रहृष्यता- क्षिप्यत चानपेक्षैः; V B1.3 प्रहृ(V1 B1.3 °कृ)ष्य चा(B1 [m. also].3 °ष्यता)कृष्यत चानपेक्षैः(B2 °क्षः); B4 क्रुद्धस्य चाक्रम्य तदानपेक्षैः; D1.4 प्राकृष्यताकर्षदतोपरान्सः (sic); D2.3.11 प्राकर्ष(D3 प्रकृष्य)ताकर्षत चापरान्सः; D6 प्रकृष्यता- क्षिप्यत चानपेक्षैः.

22 a) Ś1 च केचिद्; Ñ1 D1–4.10.11 च तीक्ष्णैर्; Ñ2 V B D6 लिखंतो; M2 तुदंतैर् (for तुदन्तो). D8 om. Ś1 Ñ1 D2.10 दशनैर्.—b) D4 om. (hapl.?) पादैश्च.

## ६०

G. 5. 60. 0
B. 5. 62. 1
L. 5. 59. 0

तानुवाच हरिश्रेष्ठो हनूमान्वानरर्षभः ।
अव्यग्रमनसो यूयं मधु सेवत वानराः ॥ १
श्रुत्वा हनुमतो वाक्यं हरीणां प्रवरोऽङ्गदः ।
प्रत्युवाच प्रसन्नात्मा पिबन्तु हरयो मधु ॥ २
अवश्यं कृतकार्यस्य वाक्यं हनुमतो मया ।
अकार्यमपि कर्तव्यं किमङ्ग पुनरीदृशम् ॥ ३
अङ्गदस्य मुखाच्छ्रुत्वा वचनं वानरर्षभाः ।
साधु साध्विति संहृष्टा वानराः प्रत्यपूजयन् ॥ ४
पूजयित्वाङ्गदं सर्वे वानरा वानरर्षभम् ।
जग्मुर्मधुवनं यत्र नदीवेग इव द्रुतम् ॥ ५

---

समाप्लुवंतः; Ñ2 V B D6 हि ताडयंतः; D1.4 समामुवंति; D3.11 °प्लुवंतः; D5.7.9 M3 Ct °पयंतः; Cv as in text (for समाप्लुवन्तः). T3 करैश्च पादैश्च समाप्लुवंतः.—c) D5 G1 महाकपिं; T3 मदोत्कटं (for मदात्कपिं). D7.9 ते (for तं). D7.9 समंतान्; T3 समग्रं (for समग्रा). Ś1 Ñ V B D1-4.6.10.11 महाकपिं ते (D1-4.11 तं) कपयः समेता (B3 °मस्ता).—d) Ś1 D1.3.4.10 महावनान्; Ñ2 V B D6 °बलं; D2 °बला:; D8 महद्वनं; T1.3 G2.3 बलाद्वनं; G1 मदाद्वनं; Ct as in text (for महावनं). Ś1 D1.2.4.10 स्म (for च). Ñ2 प्रवक्तः (sic); V1 B2 प्रक्रमुः; V2 B1.3.4 D6 प्रचक्रुः; D3 च वक्तः (sic) (for च चक्रुः). Ñ1 महाबलातीव चकर्ष भंगं (sic); D11 तदा बलानि विषयं स्म चक्रुः (sic).—After 22, Ñ2 V B D6 ins. an addl. colophon:

[ *Sarga name*: Ñ2 V B D6 दधिमुखनिवारणं.—*Sarga no.* (figures, words or both): B3 om.; Ñ2 D6 63; V1 62; V2 52; B1 61; B3 57; B4 66. ]

Colophon. Ñ2 V B1.2.4 D6 read colophon after st. 19.—*Sarga name*: Ś1 Ñ1 D1-4.10.11 मधुभक्षणः (Ś1 D2.10.11 °णं); Ñ2 V B1.2.4 D6 मधुवनविध्वंसनं.—*Sarga no.* (figures, words or both): Ñ1 D1.2.4.10.11 om.; Ś1 Ñ2 D6 62; V1 D5.7-9 T G M1.3 61; V2 51; B1.2 60; B4 D3 65.—After colophon, G M1 conclude with श्रीरामाय नमः.

## 60

B3 missing up to 8 (cf. v.l. 5.58.13).

1 V2 om. 1-2b. Ś1 Ñ V1 B1.3.4 D2.3.6.10.11 om. 1.—b) D8 वानरान् (for हनूमान्). D1.4 M1 मारुतात्मजः.—c) D1.4 सुप्रीतमनसः सर्वे.—d) D1.4 सेवंतु (for सेवत). ❀ Cv: तान् दधिमुखकलहस्याकुलितान्। अन्ये तु तानुवाचेत्यादिना पूर्वोक्तं सर्गं संक्षेपेणानूद्य(°द्योपरि ग?) परिगच्छन्तीति व्याचक्षते। परमार्थतस्त्वत्र सर्गमुखे केचित्पतिताः श्लोकाः।; so also Cg which further adds अपरे तु सर्गमुखे केचिच्छ्लोकाः पतिता इत्याहुः. ❀ —After 1, D5.7-9 S ins.:

1285* अहमावारयिष्यामि युष्माकं परिपन्थिनः।

[ D5 M1 आवरयिष्यामि; D7.9 Ct आवर्जयिष्यामि. D8 प्रति- (for परि-). ]

2 V2 om. 2ab (cf. v.l. 1). Ś1 Ñ1 D2.3.10.11 read 2; Ñ2 V B1.2.4 D6 read 2-12 (except 11cd; all including omissions and insertions) after 1278* (followed by an additional colophon).—b) Ś1 D11 वानर-; Ñ1 D2 अंगदः (sic) (for हरीणां). Ñ2 D6 प्लवगोत्तमः. D3 अंगदः प्लवतां वरः.—c) Ś1 D2.3.10.11 महातेजाः; Ñ V B1.2.4 D6 हनूमंतं; D1.4 महाप्राज्ञः (for प्रसन्नात्मा).

3 For sequence in Ñ2 V B1.2.4 D6, cf. v.l. 2. Ś1 Ñ1 D2.3.10.11 read 3-12 (including star passages and omissions) after 5.59.12.—b) Ś1 Ñ V B1.2.4 D1-4.6.10.11 कार्यं (for वाक्यं). Ś1 Ñ V B1.2.4 D2.3.6.10.11 वचः; D1.4 प्रियं (for मया).—c) D3 हि प्रायः (for कर्तव्यं). Ś1 Ñ V B1.2.4 D2.6.10.11 अकर्तव्यमपि (Ñ1 B2.4 °मिति; D11 °मति) प्राज्ञैः (Ñ V1 B3 [marg. also चांगं].4 D6 प्राज्ञाः; B1 प्रासं).—d) Ñ2 B3 D6 इदृ; V2 अथ; B1 (marg. also) अद्य; B4 अहं (for अङ्ग).

4 For sequence in Ś1 Ñ V B1.2.4 D2.3.6.10.11, cf. v.l. 2 and 3. D3 om. 4.—For 4ab, Ś1 Ñ2 V B1.2.4 D1.2.4.6.10.11 subst.:

1286* एतच्छ्रुत्वा तु वचनमङ्गदस्य मुखाच्च्युतम्।

[ Ñ2 D6 च (for तु). Ś1 D1.2.4.10.11 एवं तु (D1.2.4 एतत्) वचनं श्रुत्वा (for the prior half). D10.11 मुखच्युतं. D1.4 हर्षमानविवर्धनं (for the post. half). ]

—Ñ1 om. 4c-6b.—c) M1 तं सर्वे; M3 तं हृष्टा (for संहृष्टा).—d) G3 हरयः; M1 संहृष्टाः (for वानराः). Ñ2 V D4.6 समपूजयन्.—After 4, Ś1 Ñ2 V B1.2.4 D2.3 (after 3 owing to om.).6.10.11 ins.:

1287* तेऽङ्गदेनाभ्यनुज्ञाताः प्रहृष्टाः सर्ववानराः।

[ Ś1 D2.3.10.11 अंगदेन (for तेऽङ्ग°). Ś1 D10 वानरास्तु ते; D2.11 ते तु वानराः (for सर्ववा°). D3 ततस्ते वानरोत्तमाः (for the post. half). ]

5 For sequence in Ś1 Ñ V B1.2.4 D2.3.6.10.11, cf. v.l. 2 and 3. Ñ1 om. 5 (cf. v.l. 4).—a) D3 तु ते

ते प्रहृष्टा मधुवनं पालानाक्रम्य वीर्यतः ।
अतिसर्गाच्च पटवो दृष्ट्वा श्रुत्वा च मैथिलीम् ॥ ६
उत्पत्य च ततः सर्वे वनपालान्समागताः ।
ताडयन्ति स्म शतशः सक्तान्मधुवने तदा ॥ ७
मधूनि द्रोणमात्राणि बाहुभिः परिगृह्य ते ।
घ्नन्ति स्म सहिताः सर्वे भक्षयन्ति तथापरे ॥ ८

G. 5. 60. 8
B. 5. 62. 0
L. 5. 59. 11

(for [ब]ह्वदं). —$^b$) Ś1 D10 यूथपं यूथपर्षभाः ; Ñ2 V B1.2.4 D1-4.6.8.11 यूथपा यूथपर्षभं( D11 °भाः ). —$^c$) D3 मधुवने. Ś1 D2.10.11 रम्यं; Ñ2 V1 B2 D6 यत्तद्; V2 B1 सर्वं; B4 यच्च; D1.4 भूयो; D3 रम्ये; D8 T2 G2 तत्र; Ct as in text (for यत्र). ❀ Cm : जग्मुर्मधुवनमिति पुनर्वचनं प्रदेशभेदविवक्षयेति द्रष्टव्यम् । ; so also Cg which further adds यद्वा दधिमुखनिवारणेन सीतानां हनुमदङ्गदाभ्यां पुनरनुज्ञापनेन पुनर्जग्मुरित्यर्थः . ❀ V2 om. 5$^d$–6$^a$. —$^d$) Ś1 D8.10 G2 M3 -वेगा; T1.3 G3 -वेगाद् (for -वेग). D1.4 [ब]र्णवं; D7.9 द्रुमं; D11 ह्रदं (for द्रुतम्). Ñ2 V1 B2.4 D6 वालिनः सुमहात्मनः ; B1 पानाय सगणास्तदा.

6 For sequence in Ś1 Ñ V B1.2.4 D2.3.6.10.11, cf. v.l. 2 and 3. Ñ1 B1 om. 6$^{ab}$ (for Ñ1, cf. v.l. 4). V2 om. 6$^a$ (cf. v.l. 5). —$^a$) Ś1 Ñ2 V1 B2 D1.3.4.6–11 T2 G1.2 M1.3 Cm.t प्रविष्टा (for प्रहृष्टा). D5 मधुवने; T3 G3 °बलात्; Cm.t as in text (for °वनं). —$^b$) D5 बलान् ; T1.3 फलानि; G1.2 बलाद् ; Cm.g.t as in text (for पालान्). D7.9 शक्तितः ; Cm.g.t as in text (for वीर्यतः). Ś1 D10 फलान्यनमयंस्तदा; Ñ2 V B2.4 D2.3.6 पालाला( V2 B2.4 D3 °न )गणयंस्तदा; D11 वानरा गणयंस्तदा. —$^c$) Ñ1 अभिसंगाद्; T3 G3 °गर्वा ; G1.2 ते निसर्गाच्च ; Cv.m.g.t as in text (for अतिसर्गाच्च). D1 विश्रवः (sic) (for पटवो). Ś1 D10 अतिहर्षादपटवः ; Ñ2 V B1.2.4 D6 जाति( B2 जनि; D6 श्रुति )हर्षाच्च बहवो( B4 D6 हरयो ). —$^d$) G2 श्रुत्वा दृष्ट्वा (by transp.). Ś1 Ñ1 D1–4.10.11 सीताया दर्शनेन च. —After 6, D5.7–9 S ins. :

1288* पपुः सर्वे मधु तदा रसवत्फलमाददुः ।

[ D5 पुनः (for पपुः). D5 G3( before corr. as above) तथा (for तदा). G3 आददुः . ]

7 For sequence in Ś1 Ñ V B1.2.4 D2.3.6.10.11, cf. v.l. 2 and 3. —$^a$) G2 उत्फुल्ल. Ñ2 V B1.2.4 D6 यथावृंदं( Ñ2 D6 °त्तं ) (for ततः सर्वे). —$^b$) Ś1 Ñ1 D2.3.10 T2 G1 M1.2 वनपालाः . Ś1 Ñ1 D1–4.10.11 समंततः ; D7–9 T1.3 G2.3 M3 समागतान्. Ñ V B1.2.4 D6 तद्वनं हरियूथपाः . —After 7$^{ab}$, Ś1 Ñ1 D2.3.10.11 ins., while D1.4 subst. for 7$^{cd}$ :

1289* ताडयन्ति स्म शतशस्ते द्रवन्ति दिशो दश ।

[ Ñ1 om. स्म (subm.). Ś1 D10 ताडितास्तैश्च तरसा द्रवं( D10 भ्रमं )ति स्म दिशो दश. ]

—Thereafter all the above MSS. cont. :

1290* त्रासयित्वा तु तान्सर्वान्वानरास्ते बलोत्कटाः ।

[ D2.3 आशु (for सर्वान्). D1.4 मदोत्कटाः. ]

—Then Ś1 Ñ1 D2.3.10.11 cont. l. 1–2 and ins. l. 3–4 after 7; Ñ2 V B1.2.4 D6 ins. l. 1–2 and l. 3–4 after 7$^{ab}$ and 8 respy., D1.4.7–9 T2 ins. after 5.59.12 :

1291* ते निसृष्टाः कुमारेण धीमता वालिसूनुना ।
हरयः प्रत्यपद्यन्त द्रुमान्मधुकराकुलान् ।
भक्षयन्तः सुगन्धीनि मधूनि रसवन्ति च ।
जग्मुः प्रहर्षं ते सर्वे बभूवुश्च मदोत्कटाः ।

[ (l. 1) V2 om. ते (subm.). Ś1 D8.11 अतिसृष्टाः ; Ñ V1 B1.2.4 अभिसृष्टाः ; D2 अतिपृष्टाः ; D3 अभिवृत्ताः ; D10 अतिधृष्टाः (for ते निसृष्टाः). Ñ2 V B1.2.4 D6 वालिपुत्रेण धीमता; D3 निसृष्टा वायुसूनुना (for the post. half). —(l. 2) D1.4.7–9 T2 समपद्यंत (for प्रत्य°). Ñ2 V B1.2 D6 मधुरसाकुलान् ; B4 रसपरिप्लुतान् ; D1.4 मधुपसंकुलान् (for मधुकरा°). —Ñ2 om. l. 3. —(l. 3) B4 भक्षयित्वा; D1.4.6.11 भक्षयंति. Ś1 Ñ1 सुदूनि (for मधूनि). D6 transp. मधूनि and रसवंति. D1.4.7–9 T2 मूलानि च फलानि (D7 reads फलानि in marg.) च (for the post. half). ]

—$^c$) Ś1 D2.3.10.11 लोडयंति. D10 om. स्म (subm.). D3 सततं (for शतशः). Ñ V B1.2.4 D6 लोड( Ñ1 लाड; V2 लोल )यित्वा च( Ñ1 B1 तु ) बहुशः ; D7.9 ते ताडयंतः शतशः . —$^d$) Ś1 Ñ V B1.2.4 D2.6.10.11 सर्वं; D3 सर्वे; D5 शक्तान् ; D7.9 T2 G3 M2 सक्ता; G2 सुसान् ; Cm.g as in text (for सक्तान्). Ś1 Ñ V B1.2.4 D2.3.6.10.11 -वनं (for -वने). ❀ Cv : सक्तान्मधुवन इति पाठः . ❀

8 For sequence in Ś1 Ñ V B1.2.4 D2.3.6.10.11, cf. v.l. 2 and 3. —$^b$) Ś1 Ñ1 D1–4.10.11 बहूनि (for बाहुभिः). T3 प्रतिगृह्य. B4 D1.3.4 च (for ते). —After 8$^{ab}$, Ś1 Ñ1 D1–4.7.9–11 ins. :

1292* पिबन्ति कपयः केचित्संघशस्तत्र हृष्टवत् ।

[ D2 हरयः (for कपयः). D1.4 केचित्कपयः (by transp.). Ś1 Ñ1 D10 संघशश्च प्रहृष्टवत् (for the post. half). ]

—$^c$) M3 Ck पिबन्ति (for घ्नन्ति स्म). D1.4 केचिद् (for सर्वे). Ś1 Ñ V B1.2.4 D2.3.10.11 शात( Ñ2 V1 B4 पात; B1 शोष )यंति स्म( V2 B1 D2.11 च ) संहृष्टा( Ś1 D10 ते हृष्टा; D11 ते नष्टा ) ; D6 पातयंति सुहृष्टाश्च. —$^d$) D5 रक्षयंति; M3 Cg निघ्नंति स्म; Ck as in text (for भक्षयन्ति). Ś1 Ñ1 D1.3.4.10.11 स्म चापरे; Ñ2 V B1.2.4 D6 पिबंति च (for तथापरे). —After 8, Ñ2 V B1.2.4 D6 ins. l. 3–4 of 1291* ; D1.4 ins. l. 1–2 of 1293*.

G. 5. 60. 10
B. 5. 67. 10
L. 5. 59. 12

केचित्पीत्वापविध्यन्ति मधूनि मधुपिङ्गलाः ।
मधूच्छिष्टेन केचिच्च जघ्नुरन्योन्यमुत्कटाः ॥ ९
अपरे वृक्षमूलेषु शाखां गृह्य व्यवस्थिताः ।
अत्यर्थं च मदग्लानाः पर्णान्यास्तीर्य शेरते ॥ १०

उन्मत्तभूताः प्लवगा मधुमत्ताश्च हृष्टवत् ।
क्षिपन्त्यपि तथान्योन्यं स्खलन्त्यपि तथापरे ॥ ११
केचित्क्ष्वेडान्प्रकुर्वन्ति केचित्कूजन्ति हृष्टवत् ।
हरयो मधुना मत्ताः केचित्सुप्ता महीतले ॥ १२

9 For sequence in Ś1 Ñ V B1.2.4 D2.3.6.10.11, cf. v.l. 2 and 3. —$^{a}$) Ś1 Ñ V B1.2.4 D2.3.6.10.11 पीत्वा केचित् (by transp.). Ś1 Ñ1 D2.8.10.11 T2 G2 प्रवि- (D2 °व)ध्यंति; Ñ2 V B1.2.4 D6 अवि(B1.2[marg. also].4 °व)ध्यंत; D3 प्रवध्नंति; Cm.g.t as in text (for [अ]पविध्यन्ति). —$^{b}$) Ś1 Ñ V B1.2.4 D1-4.6.10.11 मधुपाला(Ś1 Ñ1 D3.10 °यूथा; D1.4 °हृष्टा; D2 °पुष्टा)न्वलीमुखाः. —D1.4 om. $9^{cd}$. —$^{c}$) G3 किंचिच्. D8 तु(for च). Ś1 Ñ V B1.2.4 D2.3.6.10.11 अपरे मधुशिष्टेन(B1.2 [both m. also] °सिक्थेन; D11 °सृष्टेन). —$^{d}$) Ś1 B4 जग्मुर्. D11 अन्ये मदोत्कटाः. —After 9, Ś1 Ñ1 D2.3.10.11 (l. 3 only) ins.; Ñ2 V B1.2.4 D6 ins. before $11^{cd}$; B3 subst. for $9-11^{b}$; D1.4 ins. l. 1-2 after 8 and subst. l. 3 for $10^{ab}$:

1293* मधु पीत्वा तु ते नादान्व्यसृजन्त वलीमुखाः ।
उपविष्टास्तथा चान्ये जग्मुरन्ये मदोत्कटाः ।
अपरे वृक्षशाखासु व्यलम्बन्त वलीमुखाः ।

[(l. 1) Ś1 D10 [अ]थ नादांश्च; Ñ1 प्रसादांश्च; Ñ2 B1 D6 च(B1 तु) ते नादं; B3 च ते नादान्; D1-4 प्रणादांश्च (for तु ते नादान्). V1 व्यशीयंत; V2 B2-4 असृजंत (for व्यसृजन्त). Ś1 Ñ1 D2.10 विसृ(D2[with hiatus] उत्सृ)जंति महाबलाः; D1.4 [अ]प्युत्सृजंति महाबलाः; D3 विमुंचंति तथापरे (for the post. half). —(l. 2) Ś1 Ñ1 D1-4.10 अन्ये सुखो(D1.4 तथो)पविष्टाश्च; V1 अतृप्त ***** (illeg.) (for the prior half). B2 D2.3.10 जघ्नुर् (for जग्मुर्). D6 अस्या (for अन्ये). —(l. 3) Ś1 Ñ1 D2.3.10.11 तरु- (for वृक्ष-). B3 -शाखाग्रे; D1 -मूलेषु (for -शाखासु). D4 मूलवृक्षेषु (for वृक्षशाखासु). Ś1 Ñ1 D2.3.10.11 मदाविष्टा ललंबिरे; D1.4 प्राप्य शाखा ललंबिरे (for the post. half).]

—After 9, M1 reads $12^{ab}$ for the first time, repeating it in its proper place.

10 For sequence in Ś1 Ñ V B1.2.4 D2.3.6.10.11, cf. v.l. 2 and 3. For $9-11^{b}$, B3 subst. 1293*, while D1.4 subst. l. 3 only of 1293* for $10^{ab}$. D6 om. $10^{ab}$. —$^{a}$) Ś1 Ñ1 D2.3.10.11 अन्ये च (for अपरे). M3 -मूले तु. —$^{b}$) D5.7.9 शाखा. Ś1 Ñ V B1.2.4 D2.3.10.11 विहरंतः(Ñ2 V1 व्यचरंत; V2 व्याहरंतः; B1 व्यनदंत; B2 व्यचेष्टंत; B4 व्यहरंत) प्लवंगमाः. —T1 damaged for $^{c}$. —$^{c}$) B1.4 अत्यंतम् (for अत्यर्थं). Ś1 Ñ V B1.2.4 D2.3.6.10.11 आश्रि(B4 °श्रि; D11 °न)ताः क्लां(Ś1 Ñ1 क्रां)ताः; T2 च मधु° (for च मदग्लानाः). D1.4 अपरे च मदाक्रांताः.

—$^{d}$) Ś1 Ñ B1 T3 G2.3 M1.2 पर्णान्; T2 पर्णस्य (for पर्णानि). D1.4 [आ]क्रम्य (for [आ]स्तीर्य).

11 For sequence in Ś1 Ñ V B1.2.4 D2.3.6.10.11, cf. v.l. 2 and 3. For $9-11^{b}$, B3 subst. 1293*. —$^{a}$) D7.9 -वेगाः (for -भूताः). Ñ1 प्रवेशा(sic); Ñ2 D6 सहसा (for प्लवगा). —$^{b}$) Ś1 Ñ V B1.2.4 D2.3.6.10.11 मधुपानग्रह(Ñ2 °ध)र्षिताः; D1.4 बभूवुर्मधुना तदा. —After $11^{ab}$, Ś1 Ñ1 read 1294*; Ñ2 V B1.2.4 D2.3.6.10.11 ins. l. 1 of 1294*. Ñ2 V B1.2.4 D6 read $11^{cd}$ (preceded by 1293*) and 13-26 (including om. and star passages) after 5.59.19 (followed by colophon). —D2.3.10.11 transp. $11^{cd}$ and $12^{ab}$. —$^{cd}$) Ñ2 V B D6 स्म; D2.3.11 T2 M3 च (for first [अ]पि). D1.4 क्षिपंतश्च. D8 यथा; M3 तदा (for तथा). G1.2 हसंति (for स्खलन्ति). D5.7.9 T2 M3 च (for second [अ]पि). Ñ2 V B D6 स्खलंति स्म(V1 ** यंति; B1.3 खेलंति स्म; B4 स्खलंति च; D6 वलयंति) परस्परं; D1.4 शेरते स्म महीतले; D2.3.11 स्खलंति च पृथग्विधं (for $^{d}$). Ś1 Ñ1 D10 केचित्क्षिपंति चान्योन्यं चलंति स्म पृथक्क्रियाः.

12 For sequence in Ś1 Ñ V B1.2.4 D2.3.6.10.11, cf. v.l. 2 and 3. M1 repeats $12^{ab}$ here (cf. v.l. 9). B3 om. 12. D2.3.10.11 transp. $11^{cd}$ and $12^{ab}$. —$^{a}$) M2 om. केचित्. Ñ2 V B1.2.4 D2.3.6.10 तालान्; D1.4 नादान्; D5 Cg क्ष्वेलां; D11 नादं; T G M1(second time).2.3 क्ष्वेळां (for क्ष्वेडान्). V B1.2 D3 अकुर्वत (D3 °तः); D2 तु कुर्वंतः (for प्रकुर्वन्ति). M1(first time) केचिन्मत्ता प्रनृत्यंति. —$^{b}$) B4 D1-4.10.11 नृत्यंति; D8 M1(second time) गर्जंति (for कूजन्ति). Ñ2 V B1.2 D6 ननृतुश्च प्रहृष्टवत्. —T1 damaged for $^{d}$. —For 12, Ś1 Ñ1 subst. and read after $11^{ab}$; D2.3.10.11 ins. l. 1 after $11^{ab}$ and subst. l. 2 for $12^{cd}$ (reading l. 2 before $12^{ab}$ [transp.]); Ñ2 V B1.3 D6 ins. l. 1 after $11^{ab}$ and cont. l. 2 after 1295*; B4 ins. l. 1 after $11^{ab}$ and l. 2 after 12:

1294* क्षीबाः कुर्वन्ति हास्यं च कलहं च तथापरे ।
अतृप्तवत्पिबन्त्यन्ये मधूनि मधुपिङ्गलाः ।

[(l. 1) Ś1 Ñ1 D10 क्ष्वेडाः; B4 वीराः; D2 क्रीडां (for क्षीबाः). D3 हास्यानि (for हास्यं च). B1.2.4 D2.3.11 कलहांश्च. Ś1 Ñ1 D2.3.10.11 प्रकुर्वते (for तथापरे). —(l. 2) V2 तृप्तवंतः पिबंत्येते (for the prior half). D3 कपिपुंगवाः (for मधुपिङ्गलाः).]

येऽप्यत्र मधुपालाः स्युः प्रेष्या दधिमुखस्य तु ।
तेऽपि तैर्वानरैर्भीमैः प्रतिषिद्धा दिशो गताः ॥ १३
जानुभिश्च प्रकृष्टाश्च देवमार्गं च दर्शिताः ।
अब्रुवन्परमोद्विग्ना गत्वा दधिमुखं वचः ॥ १४
हनूमता दत्तवरैर्हतं मधुवनं बलात् ।
वयं च जानुभिः कृष्टा देवमार्गं च दर्शिताः ॥ १५
ततो दधिमुखः क्रुद्धो वनपस्तत्र वानरः ।
हतं मधुवनं श्रुत्वा सान्त्वयामास तान्हरीन् ॥ १६
एतागच्छत गच्छामो वानरानतिदर्पितान् ।
बलेनावारयिष्यामो मधु भक्षयतो वयम् ॥ १७

G. 5. 61. 8
B. 5. 62. 19
L. 5. 60. 6

—After 12, Ñ2 V B1.2 D6 ins.:

1295* उद्धृत्य च तथा वृक्षांस्तद्वनं हरियूथपाः ।

[ V2 वृद्धांस् ( for वृक्षांस् ). ]

—After 12, D5.7–9 S ins.:

1296* क्रूरवा केचिद्धसन्त्यन्ये केचित्कुर्वन्ति चेतरत् ।
कृत्वा केचिद्वदन्त्यन्ये केचिद्बुध्यन्ति चेतरत् ।

[ (l. 1) D7.9 भृष्टाः ; G1 M1 स्मृत्वा; Cr.m.g as above (for कृत्वा). D8 M1 किंचित् ( for first केचिद् ). T2 G1 [अ]न्यत् ( for [अ]न्ये ). —(l. 2) D8 T3 G3 M1.2 किंचिद्; Cm.g as above ( for first केचिद् ). T2.3 G M1.2 [अ]न्यत् ( for [अ]न्ये ). ]

13 For sequence in Ñ2 V B1.2.4 D6, cf. v.l. 11. Ñ1 illeg. for 13–$14^{b}$.—$^{a}$) Ś1 Ñ2 B1–3 D3.6 तत्र ये (Ś1 वै); V D1.4 ये तत्र; B4 यत्र ते; D2.10.11 तत्रैव; D9 ये यत्र; M1 ये ह्यत्र. Ś1 D2.10.11 मधुपाला ये; Ñ2 V B D6 मधुपालाश्च( Ñ2 V1 D6 °स्ते ); D1.4 मधुपालस्य; D3 मधुनः पालाः ; M2 वनपालाः स्युः .—$^{b}$) D8 मुख्या ( for प्रेष्या ). D1.4 च; M1 वै ( for तु ). Ś1 Ñ2 V B D2.3.6.10.11 स्थिता (D6 °स्ता ) दधिमुखाज्ञया. —Ś1 D2.3.10.11 transp. $13^{cd}$ and $14^{ab}$.—$^{c}$) Ś1 D1–4.10.11 वानरैर्बहुभिर्भीमैः( D11 °भिर्वैः ).—$^{d}$) T3 G3 प्रतिशिष्टा; G2 M2 °विद्धा; Ct as in text ( for °पिद्धा ). —For $13^{cd}$, Ñ2 V B D6 subst. ; Ś1 D2.3.10.11 ins. after $13^{ab}$ :

1297* नाचिन्तयन्त तान्सर्वान्वार्यमाणाः प्लवंगमाः ।

[ Ś1 [अ]चिंतयंतस् ; D6 [अ]चिंतयत् ( subm. ). B1 नाचिंतयंस्तदा. D2.11 सर्वे ( for सर्वान् ). B1 वार्यमाणान्. D10 प्लवंगमान्. ]

14 For sequence in Ñ2 V B1.2.4 D6, cf. v.l. 11. Ñ1 illeg. for; B3 om. $14^{ab}$ (for Ñ1, cf. v.l. 13). Ś1 D2.3.10.11 transp. $13^{cd}$ and $14^{ab}$.—$^{a}$) D1.4 ते; D3 G2 M3 तु; M1 सं- ( for first च ). D7.9 Ck.t प्रहृष्टाश्. Ś1 V2 D2.10.11 तैर्वि( V2 D2.11 ते वि )कृष्टाश्च जानुभ्यां; Ñ2 D6 तेपि क्षिप्ताश्च बाहुभ्यां; V1 B1.2.4 ते वि(V1 प्र)कृष्टाश्च बाहुभ्यां; D3 ते वै विष्टभ्य जानुभ्यां. —$^{b}$) Ś1 D1.2.4.10.11 -मार्गांश्. T2 M3 प्र- ( for च ). —After $14^{ab}$, Ñ2 V B1.2.4 ins.; while B3( owing to om. ) cont. after 1297* :

1298* ताड्यमाना दिशः सर्वा जग्मुर्भीताः प्लवंगमाः ।

[ Ñ2 V2 ताड्यमानाश्च( hypm. ). B3 सर्वे ( for सर्वा ). ]

—D5 om.( hapl. ) $14^{c}$ – 15. —$^{c}$) Ñ2 V B D6 अब्रुवंश्च परित्रस्ता( B2 °भ्रष्टा ).—$^{d}$) T2 सर्वे ( for गत्वा ). Ś1 Ñ2 V B D2.3.6.10.11 तदा; D1.4 ततः ( for वचः ).

15 For sequence in Ñ2 V B1.2.4 D6, cf. v.l. 11. D5 om. 15( cf. v.l. 14 ).—$^{a}$) Ś1 D2.3.10.11 तारां( D11 नीलां )गदहनूमद्भिः ; Ñ2 V B D6 हनूमदंगदाद्यैस्ते( B1 °भ्यां ते; B2.4 °स्तैर् ; B3 °श्च ).—$^{b}$) Ś1 पीतं ( for हतं ). Ś1 D10 प्रभो; Ñ2 V B D2.3.6.11 कपे; D1.4 च तत् ( for बलात् ). —After $15^{ab}$, Ñ2 V B1.2.4 D6 ins. ; while Ś1 D2.3.10.11 ins. after 15 :

1299* यदत्रानन्तरं कार्यं तद्भवान्वक्तुमर्हति ।

[ B2 D6 कर्तुम् ( for वक्तुम् ). V1 B2.4 D6 अर्हसि( sic ). Ś1 D2.3.10.11 तत्त्वं कर्तुमिहार्हसि ( for the post. half ). ]

—B3 om. $15^{cd}$.—$^{c}$) Ś1 Ñ V B1.2.4 D1–4.6.10.11 वयं वि( Ñ1 D2 प्र; D6 हि )कृ( D11 सृ )ष्टा जानुभ्यां( B4 बाहुभ्यां ); D8 वयं च तैर्महावीरैर्.—$^{d}$) D1.4 -मार्गांश् ; D3.10 -मार्गांश् ( for -मार्गं ). T2 प्र- ( for च ). D11 देवमार्गानुदर्शिताः.

16 For sequence in Ñ2 V B1.2.4 D6, cf. v.l. 11. —$^{a}$) D7.9 G1.3 तदा ( for ततो ). D3 धीमान् ( for क्रुद्धो ).—$^{b}$) T2 वेगवांस् ( for वनपस् ). Ś1 Ñ2 V B D2.3.6.10.11 वनपालाधिपस्तदा; D1.4 वनपांस्तत्र वानरान्. —$^{c}$) D3 मत्वा; D5.7.9 G1 दृष्ट्वा ( for श्रुत्वा ).—$^{d}$) Ñ1 D1.3.4 कपीन् ( for हरीन् ). Ś1 D10 हतानाश्वासयद्धरीन् ; Ñ2 V1 B1.4 D6 स तांश्चाश्वासयत्क( D6 °न्क )पीन् ; V2 B3 तांश्चैवाश्वासयत्क( V2 °न्क )पीन् ; B2 D2.11 हतांश्चाश्वासयन्कपीन्( D2 °यद्धरीन् ; D11 °यन्हरीन् ). ❀ Ck : " सान्त्वयामास तान्हरीन् " इत्यनन्तरं " एत गच्छत गच्छाम " इत्यत्र मध्ये केचिच्छ्लोकाः प्रक्षिप्ताः । प्राचीनास्तथावदन्. ❀

17 For sequence in Ñ2 V B1.2.4 D6, cf. v.l. 11. —D5 om. 17–27.—$^{a}$) Ñ D1.4.6 तदा( Ñ2 D6 समा )गच्छत; V B1.3.4 D10.11 एह्या( V1 प्रत्या )गच्छत; D3 एतान्गच्छत; D7–9 T2 G1.2 M3 Ck इहा( D7.9 Ck एत )गच्छत; T1.3 G3 M2 एते गच्छत ( sic ); M1 एते गच्छंतु; Ct as in text ( for एता° ). D4 पृच्छामो. ❀ Cv : गच्छाम इत्यात्मनि बहुवचनम् ।; Cg : गच्छाम इति तैः साहित्येन बहुवचनम् । आत्मनि बहुवचनं वा. ❀ —G3 M1.2

G. 5. 61. 9
B. 5. 62. 20
L. 5. 60. 7

श्रुत्वा दधिमुखस्येदं वचनं वानरर्षभाः ।
पुनर्वीरा मधुवनं तेनैव सहिता ययुः ॥ १८
मध्ये चैषां दधिमुखः प्रगृह्य सुमहातरुम् ।
समभ्यधावद्वेगेन ते च सर्वे प्लवंगमाः ॥ १९
ते शिलाः पादपांश्चापि पाषाणांश्चापि वानराः ।
गृहीत्वाभ्यागमन्क्रुद्धा यत्र ते कपिकुञ्जराः ॥ २०
ते स्वामिवचनं वीरा हृदयेष्ववसज्य तत् ।
त्वरया ह्यभ्यधावन्त सालतालशिलायुधाः ॥ २१
वृक्षस्थांश्च तलस्थांश्च वानरान्बलदर्पितान् ।
अभ्यक्रामन्त ते वीराः पालास्तत्र सहस्रशः ॥ २२

13 $^{a}$) D11 स्तुतो (for श्रुतो). —$^{b}$) D3 -सत्तमाः; M3 -पुंगवाः (for -यूथपाः). Ś1 Ñ V2 B1.2.4 D1.2.4.6.10.11 राज्ञा वानरपुंगवाः (Ś1 Ñ1 D1.2.4.10.11 °यूथपाः). —After $13^{ab}$, T2 ins.:

1337* दर्शनं काङ्क्षतास्माकं पितृव्येन महात्मना ।

—Thereafter T2 cont.; while Ś1 Ñ D1–4.7–11 ins. after $13^{ab}$; V2 B1.2.4 D6 subst. for $13^{cd}$; B3 subst. for 13:

1338* अयं च हर्षादाख्याति तेन जानामि हेतुना ।

पीत्वा मधु यथाकामं विश्रान्ता वनचारिणः ।
किं शेषं गमनं तत्र सुग्रीवो यत्र मे गुरुः ॥ १४
सर्वे यथा मां वक्ष्यन्ति समेत्य हरियूथपाः ।
तथास्मि कर्ता कर्तव्ये भवद्भिः परवानहम् ॥ १५
नाज्ञापयितुमीशोऽहं युवराजोऽस्मि यद्यपि ।
अयुक्तं कृतकर्माणो यूयं धर्षयितुं मया ॥ १६
ब्रुवतश्चाङ्गदस्यैवं श्रुत्वा वचनमव्ययम् ।
प्रहृष्टमनसो वाक्यमिदमूचुर्वनौकसः ॥ १७
एवं वक्ष्यति को राजन्प्रभुः सन्वानरर्षभ ।
ऐश्वर्यमदमत्तो हि सर्वोऽहमिति मन्यते ॥ १८
तव चेदं सुसदृशं वाक्यं नान्यस्य कस्यचित् ।
संनतिर्हि तवाख्याति भविष्यच्छुभभाग्यताम् ॥ १९

G. 5. 64. 20
B. 5. 64. 20
L. 5. 62. 21

[Ñ2 V2 B1.2.4 D6.8.11 हि; B3 प्र- (for च). B1-3 जानीम (for जानामि). V2 तेन जानीमहे तथा (for the post. half).]

—Ñ2 reads $13^{cd}$ in marg. D3.11 transp. $13^{cd}$ and $14^{ab}$.—$^{c}$) Ñ2 illeg. for तत्क्षमं नेह. Ś1 तत्कृतो; D10 तत्कृते; T1.2 (before corr. as in text).3 G3 तत्क्षणं (for तत्क्षमं). Ñ1 D1.4 G2 सं- (for नः). D9 स्थानं (for स्थातुं). D11 न वः क्षेममिह स्थातुं. ❀ Ck : नास्थातुमित्यत्र न इति पदम्. ❀ —$^{d}$) D1.3.4.11 कृत-; D5 reads in marg. (for कृते). D3.4 कार्यैर् (for कार्ये). Ś1 Ñ D1-5.10.11 विशेषतः (for परंतपाः).

14 D3.11 transp. $13^{cd}$ and $14^{ab}$.—$^{a}$) Ś1 Ñ2 V2 B D1-3.6.10.11 पीतं (for पीत्वा). B4 -वनं (for यथा-). Ś1 -कालं (for -कामं).—$^{b}$) D7.9 विक्रांता (for विश्रान्ता). Ñ2 V2 B D6 सर्वैरस्माभिरुत्कटैः.—$^{cd}$) Ñ2 V1 B2 D6.11 तत्क्षमं; V2 B4 तत्क्षेमं; B3 तत्क्षणं; D1.4 विशेष-; T2 किं शेष- (for किं शेषं). D9 G1 यत्र; Cg.k as in text; Cg*p* तच्च (for तत्र). B4 सुप्रीतो (for सुग्रीवो). Ś1 Ñ V B2-4 D6.7.9.11 वानरः; D1.2.4.10 वानराः; Cg.k as in text (for मे गुरुः). B1 गच्छेम तत्र सुग्रीवो यत्र रामः सलक्ष्मणः; D3 विशेषं तत्र गमनं कांक्ष्यंतां तस्य दर्शनं.

15 B3 om. (hapl.) 15-19.—$^{a}$) Ś1 Ñ1 च वीक्ष्यंते; B2 मां रक्षंति; D10 च वीक्षंते (for मां वक्ष्यन्ति).—Ñ1 illeg. for $15^{b}$.—$^{b}$) Ś1 D10 समेता; Ñ2 V B1.2.4 D6.11 भवंतो (for समेत्य). D7.9 M2 -पुंगवाः (for -यूथपाः).—$^{c}$) G3 तदा (for तथा). Ś1 D1-4.10.11 तद्वाक्यं; Ñ1 कर्तव्यं (for कर्तव्ये). Ñ2 V B1.2.4 D6 तथा प्रतिविधातव्यं.—$^{d}$) Ñ1 भवतः; Ñ2 V B1.2.4 D6 भवत्सु (for भवद्भिः). D1.4 परिवारितः (for परवानहम्).

16 B3 om. 16 (cf. v.l. 15).—$^{a}$) Ñ2 V B1.2.4 D6 M2 आज्ञापयितुम्; D1 न ज्ञाप° (for नाज्ञा°). G1 (before corr. as in text) ईशे (for ईशो). D2.11 वै (for ऽहं).—$^{b}$) Ś1 Ñ1 V1 B1 (om., orig. न).4 D1.2.4.5.10.11 [ऽ]पि; Ñ2 B2 D6 हि (for ऽस्मि). Ś1 Ñ1 D1.2.4.10.11 [अ]हं (for [अ]पि).—$^{c}$) Ś1 D10 न युक्तं; Ñ1 V2 B1.4 युक्तं तु; Ñ2 V1 D6 युक्तं हि; B2 युक्तं च (for अयुक्तं).—$^{d}$) D3 आज्ञापितुं (for धर्षयितुं). Ñ1 D7.9 Ck.t बलात्; D3 रुषा (for मया). Ñ2 V B1.2.4 D6 यूयं समनुवर्तितुं (Ñ2 V1 °तं; V2 °तेनं). ❀ Cv : अयुक्तमिति । मुनिकृतमेव तदव्ययम् । अन्यथा अयुक्ता इति वक्तव्यम् ।; so also Cr.m.g. Cg further adds शक्यमितिवत्सामान्योपक्रमान्नपुंसकैकत्वनिर्देश इत्यप्याहुः ।; Ct : कृतकर्माणो यूयम् कृतकर्मणो युष्मानित्यर्थ आर्षमिदम् । तथाप्यतः परम् बलाद्धर्षयितुं न युक्तम्. ❀ —After 16, Ś1 Ñ1 D1-4.10.11 ins.:

1339* युक्तं हि कृतकार्याणां युष्माकमनुवर्तितुम् ।

[Ś1 Ñ1 D11 -कर्माणां (metri causa) (for -कार्याणां). Ñ1 D1.4 -वर्तनं; D10 -वर्तितं; D11 -वर्तिनां (for -वर्तितुम्). D3 युक्तं युष्माभिः सिद्धार्थैर्मया समनुवर्तितुं (sic).]

17 B3 om. 17 (cf. v.l. 15).—$^{a}$) Ñ2 V B1.2.4 D6 ब्रुवाणस्य (for ब्रुवतश्च). Ñ2 V B4 D6 [ए]तच्; D3 [ए]व (for [ए]वं). Ś1 Ñ1 D1.2.4.10.11 एवं तस्य ब्रुवाणस्य.—$^{b}$) Ś1 Ñ1 वानरम् (for वचनम्). Ś1 Ñ V B1.2.4 D1-4.6-11 T2 उत्तमं (for अव्ययम्).—$^{c}$) Ś1 Ñ1 D1.2.4.8.10.11 G1 -वदना; D6 -मानसाः (for -मनसो). Ñ2 V B1.2.4 D6 सर्वे (for वाक्यम्).—D1 reads $17^{d}$-$19^{c}$ twice.—$^{d}$) Ñ2 V B1.2.4 D6 व्याजहुस्ते महाबलाः.

18 B3 om. 18 (cf. v.l. 15). D1 repeats 18 (cf. v.l. 17).—$^{a}$) Ś1 Ñ1 D10 क एवं वी(D10 व)क्ष्यते वीरं(Ś1 °रः; D10 °र); Ñ2 V B1.2.4 D1(both times) 2.6.11 G1 M2 क एवं(D2 °तां; D11 °तां) व(B4 मो)क्ष्यते वाचं(B2 D1 °क्यं; G1 M2 राजन्); D3.4 क एवं वक्ष्यति वचः(D4 वाक्यं).—$^{b}$) B2.4 स; D1 (both times).4 त्वं (for सन्). Ś1 Ñ1 D1 (first time).3.4.10 वानरोत्तम(D1 second time °मः); V2 B1.2 D5 वानरर्षभः(B1 °भाः). D2 प्रभुः सत्त्वान्नरोत्तम; D11 प्रभुशक्त्या नरोत्तमः.—$^{c}$) B4 [ऽ]पि (for हि). D3 ऐश्वर्ये च प्रमत्तो हि.—$^{d}$) B4 [ऽ]यम् (for ऽहम्). D3 गम्यते (for मन्यते).

19 B3 om. 19 (cf. v.l. 15). D1 repeats $19^{abc}$ (cf. v.l. 17).—$^{a}$) Ś1 Ñ1 D1(both times).2.4.10. [ए]वं; D11 [ए]व (for [इ]दं). D1(both times).2.4 तु सदृशं; D5 स्वसदृशं; D11 तु सादृश्यं (for सुसदृशं). Ñ2 V B1.2.4 D3.6 तदेवं(V1 °वेदं; V2 °वैवं; B1.2 °दिदं; D3 °वैतत्) सदृशं वाक्यं; B1 (marg. also) तवेदं यादृशं वाक्यं;

G. 5. 64. 21
B. 5. 64. 21
L. 5. 62. 22

सर्वे वयमपि प्राप्तास्तत्र गन्तुं कृतक्षणाः ।
स यत्र हरिवीराणां सुग्रीवः पतिरव्ययः ॥ २०
त्वया ह्यनुक्तैर्हरिभिर्नैव शक्यं पदात्पदम् ।
कश्चिद्गन्तुं हरिश्रेष्ठ ब्रूमः सत्यमिदं तु ते ॥ २१
एवं तु वदतां तेषामङ्गदः प्रत्यभाषत ।
बाढं गच्छाम इत्युक्त्वा उत्पपात महीतलात् ॥ २२
उत्पतन्तमनूत्पेतुः सर्वे ते हरियूथपाः ।
कृत्वाकाशं निराकाशं यन्त्रोत्क्षिप्ता इवानलाः ॥ २३
तेऽम्बरं सहसोत्पत्य वेगवन्तः प्लवंगमाः ।
विनदन्तो महानादं घना वातेरिता यथा ॥ २४

---

G2 तत्र चेदंग सदृशं. —b) Ñ2 V B1.3.4 D6 भुवि (for वाक्यं). B1 कर्हिचित् (for कस्य°). Ś1 Ñ1 D1(both times).2.4.10.11 ना(D11 मा)न्यस्य हरिपुंगव(D11 °वः); D3 नान्यस्य भुवि कस्यचित्. —c) B1 (after corr. as in D2)संमतिर्; D2 संततिर् (for संनतिर्). D3 च (for हि). D1(both times).4 तम् (for तव). B1 G3 ख्याति(G3 °तिर्); D1 (first time) [आ]ख्यातिं; D3 T2.3 [आ]ख्यातिर्; Ct as in text (for [आ]ख्याति). —d) D2 भविष्यां (for भविष्यच्). Ñ2 V B1.2 D6 शुभमंगद(V1 B1 °दं); D5.7–9 M3 Cm.t शुभयोग्यतां; D11 G3 शुभवाक्यतां. D1.4 भविष्यां च सुभाग्यतां; D3 वसिष्ठगुणसंपदां.

20 a) T2 अति-; T3 इह; G1 अनु-; G3 इव (for अपि). Ś1 Ñ V B D1–4.6.10.11 प्राज्ञ(B2 °ज्ञः; B4 D11 °ज्ञा); G3 [अ]प्राप्तास् (for प्राप्तास्). —b) Ś1 Ñ1 B4 D1–4.10.11 गंतुं तत्र (by transp.) (for तत्र गन्तुं). Ñ2 V B1–3 D6 -त्वराः; B4 D11 Cr -क्षणः; Cg.k.t as in text (for -क्षणाः). —cd) B1.4 तत्र (for यत्र). V2 कपिर्; D8 G2 M2 प्रभुर् (for पतिर्). Ś1 Ñ1 D1–4.10.11 यत्रासौ वानरश्रेष्ठः सुग्रीवो हेमपिंगलः(D1.4.11 हरिपुंगवः).

21 a) Ś1 Ñ1 D2.10 त्वनुक्तैर्; B1.2 D6.11 T1.3 ह्यनुक्ते; B3 [अ]नुक्तेन; D1.4 त्वनुक्ते; D3 त्वदुक्तैर्; D9 स्त्वनुक्तैर् (for ह्यनुक्तैर्). —b) D3 G3 [ए]वं (for [ए]व). D9 शंक्यं (for शक्यं). Ñ2 V B D6 नेह युक्तं कथंचन; D1.4 निर्विशंक्यं(D4 °कं) पदात्पदं. —d) Ś1 Ñ1 D2.10.11 सत्यमेतद्वदा(D2.11 °द्ब्रुवा)महे; D1.4 मन्यसे तद्वदामहे; D3 संविधत्स्व यदुत्तरं. —For 21cd, Ñ2 V B D6 subst.:

1340* व्याहर्तुं हरिशार्दूल तत्त्वमेतन्निबोध नः ।

[B1 (marg. also as above) न हंतुं (for व्याहर्तुं). V2 * त्वम्; B3 सत्यम् (for तत्त्वम्). V2 एवं; B1.4 एव (for एतन्). V2 निबोधयन्; D6 निबोधत (for निबोध नः).]

22 a) D11 om. तु (subm.). Ś1 Ñ V B D2.3.6.10.11 ब्रुवतां (for वदतां). —b) V B2–4 D11 समहृष्यत (for प्रत्यभाषत). B1 अंगदस्य प्रकृष्टवत् (marg. also °दः समभाषत). —c) D7.9 साधु (for बाढं). —T1 damaged from गच्छाम up to उत्पपात in d. V B1.2 गच्छासि; B4 इच्छामि (with hiatus); D11 गच्छेम (for गच्छाम). Ñ2 V B1–3 D3.6.11 चेति (for इति). D5 [उ]क्तं (for [उ]क्त्वा). —d) D5.7.9 T2.3 G3 M2.3 Cm.t खमुत्पेतुर् (M2 °त्पेते); Cr.g.k as in text (for उत्पपात). D7.9 M3 महाबलाः; G3 महाबलात् (for महीतलात्). Ś1 Ñ1 D1.2.4.10.11 खमुत्पत्य च(D1.4 स) भूतलात्; Ñ2 V1 B1.3.4 D6 खमुत्पतितवान्कपिः(V1 B4 °न्भुवः; B1 °न्प्रभुः; B3 °न्तव [sic]); V2 खमुत्पेतुः स भूतलात्; B2 (marg. also as in B4) खमुत्पतति वानरः; D3 भूतलादुत्पपात खं; D11 खस्मात्पतति भूतले (sic). ❀ Cr.k: उक्त्वा उत्पपातेत्यत्र असंधिरार्षः. ❀

23 a) Ñ2 D6 खमुत्पेतुः; V2 B1.4 D1.2.4 समुत्पेतुः (for अनू°). Ś1 Ñ1 D10 तमुत्पतंतमुत्पेतुः. —b) T1.3 G3 तु; T2 तं (for ते). —d) Ś1 Ñ1 D2.3 यंत्रक्षिप्ता; Ñ2 V D4.7.8 T2 G1 M3 Ct यंत्रोत्क्षिप्ता; B4 D5 यंत्राक्षिप्ता; D1.10.11 यत्र क्षिप्ताः; D9 यन्त्रोत्क्षिप्ता (for यन्त्रोत्क्षिप्ता). Ś1 Ñ V B4 D1–4.7.9.10 इवोपलाः; D5 G2 इवानिलाः; D3 यथोपलाः; D11 इवोत्पलाः; T2 M3 इवाचलाः (for इवानलाः). B1–3 D6 यं(D6 य)त्रोत्क्षिप्तोप(B1 °त्प)ला इव. ❀ Cr.k: वज्रोत्क्षिप्ताः, वज्रेणोत्क्षिप्तपक्षाः पक्षरहितमहापर्वता इत्यर्थः। Ck further adds वज्रोत्क्षिप्ता इवाचला इति पाठः सर्वतः; योजनाशक्त्या प्रकारान्तरेण नाम पाठं पठति स्मान्यः। यन्त्रोत्क्षिप्ता इवाचलाः। यद्वा यन्त्रोत्क्षिप्ता इवानला इति. ❀ —After 23, D7–9 read for the first time 36cd, repeating it in its proper place.

24 B3 om. 24ab. —a) B4 चेलुश्च (for तेऽम्बरं). M1 [उ]त्प्लुत्य (for [उ]त्पत्य). —c) Ñ2 V B1.2.4 D6 व्यनदन्सु-; B3 स्वनंतः सु-; D3 नदंति स्म (for विनदन्तो). Ś1 Ñ1 V1 B4 D1–3.11 महानादान्; V2 महान्नादान्; D4.10 महानादा. ❀ Cv: विनदन्तो महानादमिति सम्यक्. ❀ —d) Ś1 Ñ V B D1–4.10.11 मेघा (for घना). —T1 damaged from रि up to प्रा in 25a. Ś1 Ñ V B D1.3.4.6.10 इव (for यथा). —After 24, Ś1 Ñ2 V B D2.6.10.11 ins. an addl. colophon.

[*Sarga name*: Ś1 D10 मधुवनाद्वानरोत्पतनं; Ñ2 मधुवनाद्वानरागमं; V1 वानरप्रत्यागमनं; V2 मधुवनात्प्रयाणं; B मधुवनाद्वानरप्रयाणं; D2 उद्योगे वानरोत्पतनं; D6 मधुवनाद्वानरागमनं; D11 सुग्रीवादेशे मधुवनाद्वानरप्रयाणः. —*Sarga no.* (figures, words or both): B2.3 D2.10.11 om.; Ś1 65; Ñ2 D6 66; V1 B1 64; V2 55; B4 69. —After colophon, D2 concludes with राम.]

—After 24, Ñ1 D1.4.5 T2 read for the first time 36cd (Ñ1 D1.4 followed by an addl. colophon),

अङ्गदे ह्यननुप्राप्ते सुग्रीवो वानराधिपः ।
उवाच शोकोपहतं रामं कमललोचनम् ॥ २५

समाश्वसिहि भद्रं ते दृष्टा देवी न संशयः ।
नागन्तुमिह शक्यं तैरतीते समये हि नः ॥ २६

न मत्सकाशमागच्छेत्कृत्ये हि विनिपातिते ।
युवराजो महाबाहुः प्लवतां प्रवरोऽङ्गदः ॥ २७

यद्यप्यकृतकृत्यानामीदृशः स्यादुपक्रमः ।
भवेत्तु दीनवदनो भ्रान्तविप्लुतमानसः ॥ २८

पितृपैतामहं चैतत्पूर्वकैरभिरक्षितम् ।
न मे मधुवनं हन्यादहृष्टः प्लवगेश्वरः ॥ २९

कौसल्या सुप्रजा राम समाश्वसिहि सुव्रत ।
दृष्टा देवी न संदेहो न चान्येन हनूमता ।
न ह्यन्यः कर्मणो हेतुः साधने तद्विधो भवेत् ॥ ३०

G. 5. 65. 7
B. 5. 64. 33
L. 5. 63. 7

repeating it in its proper place. On the other hand, D3 reads for the first time 34 (with 1348* and an addl. colophon) after 24, repeating it in its proper place.

25 T1 damaged up to प्रा in $^{a}$ (cf. v.l. 24). B3 om. from 25 up to colophon. —$^{a}$) Ś1 Ñ1 D1-4.7-11 Cm.t समनुप्राप्ते; D5 T2 [s]प्यननुप्राप्ते; M1 स ननु प्राप्ते; M2 ह्यनुसंप्राप्ते (for ह्यननुप्राप्ते). Ñ2 V B1.2.4 D6 तेषामागमनं श्रुत्वा. —$^{b}$) Ś1 Ñ1 D10 वानरर्षभः; Ñ2 V2 B1.2.4 D1-4.6-9.11 G1 M1 Cm वानरेश्वरः. —$^{c}$) Ś1 Ñ1 D1-4.7-11 T2 -संतप्तं; Ñ2 V B1.2.4 D6 -[अ]भिहतं (for -[उ]पहतं).

26 B3 om. 26 (cf. v.l. 25). —$^{a}$) G1 समाश्वास्य हि (for °श्वसिहि). —$^{b}$) Ñ2 V B1.2.4 D6 सीता (for देवी). —$^{c}$) Ñ2 V B1.2.4 G1 M1.2 आगंतुम्; M3 नानुगंतुम् (hypm.) (for नागन्तुम्). Ñ2 V B1.2.4 D3.6 तैः शक्यम् (by transp.); D4.11 शक्यं ते (for शक्यं तैर्). —$^{d}$) Ś1 Ñ1 B1 D1.2.4.6-11 T1 G1 अतीत-; Ñ2 अतीव (for अतीते). Ś1 Ñ1 D1.2.4.10.11 समयैर्भ(D4 °ये भ)यात्; Ñ2 V B1.2.4 D5.6 T2 G1 M1.2 समयेन हि(V2 च; D5 T2 °येहनि); D3 समयेन्यथा; D7-9 समयैरिह (for समये हि नः). ❀ Cr: समयेऽतीते सति नेहागन्तुं शक्यम्।; Ck: - - - समये सतीति सर्वतः पाठः। अतीते समये नहीति पठति योजनाशक्त्या पाठस्य. ❀ —After 26, Ś1 Ñ D1-4.6-11 ins.; while V1 cont. after 1342*:

1341* अङ्गदस्य प्रहर्षात्तु जानामि शुभदर्शन ।

[Ś1 D10 प्रहर्षं. Ñ1 D7-9 च (for तु). D3 रघुनंदन; D8 शुभदर्शिने; D9 शुभदर्शनः.]

27 B3 om. 27 (cf. v.l. 25). —$^{a}$) D5 स (for न). —$^{b}$) V B1.2 मत्कृ(B2 [marg. also] त्वत्कृ)ते; B4 मत्कृत्ये; D1.10 कृते हि; T2 कार्ये हि; T3 कृत्ये वा (for कृत्ये हि). Ñ1 D8 अकृत्वैवं नियोजितः; D3 अकृत्वा कृत्यमुत्तमं. —$^{c}$) Ś1 Ñ1 D1.2.4.10.11 T2 G2 महाप्राज्ञः (for °बाहुः). —$^{d}$) D1.4 प्रवरोत्तमः; D7-9 अंगदो वरः (for प्रवरोऽङ्गदः). —After 27, Ś1 Ñ V1 D1.2.4.6.10.11 T2 ins.:

1342* दर्शनीयो महाबाहुर्वालिसूनुः कृतश्रमः ।

—Thereafter V1 cont. 1341*.

28 B3 om. 28 (cf. v.l. 25). —$^{a}$) M1 न च (for यदि). Ś1 Ñ B2 D1.6.10.11 हि; B4 ह; D2 कृत् (sic); D4 तु; D5 च (for [अ]पि). Ś1 Ñ V B1.2.4 D1.2.4.6.10.11 -कार्योसौ; D3 -कृत्योसौ (for -कृत्यानाम्). —$^{b}$) Ś1 Ñ1 D1-4.10.11 मत्समीपमनु(D3 °मिहा)व्रजेत्; Ñ2 V B1.2.4 D6 मत्सकाशमुप(Ñ2 B4 D6 °पा)क्रमेत्. —$^{c}$) Ñ2 V B1.2.4 D6 स भवेद्; D5 भवेच्च; D8 भवेत्स; T2 M1 भवेयुर्; M2 भवेत; Ct as in text (for भवेत्तु). T2 M1 -वदनाः; Cv.m.g.k.t as in text (for °नो). —$^{d}$) Ś1 Ñ1 भ्रांतो; Ñ2 V B1.2.4 D1.2.4.10.11 श्रांतो; D3 क्लांतो; D5 श्रांतम् (sic); D8 भ्रांति- (for भ्रान्त-). Ś1 Ñ V1 D1.4.10 विपुल-; D3 विक्लव-; D5 उद्विप्लुत- (hypm.); T2 -विश्लथ- (for -विप्लुत-). Ś1 Ñ1 B2 D1-4.10.11 -लोचनः; T2 M1 -मानसाः; Cv.m as in text (for -मानसः).

29 B3 om. 29 (cf. v.l. 25). —$^{a}$) B1 -पैतामहैश्च. Ś1 Ñ V B1.2.4 D1.2.4.6.10.11 [ए]त्र (for [ए]तत्). —$^{b}$) D3 पूर्वजैर् (for °कैर्). B2 अपि; D2 परि- (for अभि-). Ś1 Ñ1 D1.4.5.10.11 पूर्वजैः(D1.4.8 °कैः) परि(D8 स्वभि)रक्षितं. —$^{d}$) D8 Cm अदृष्ट्वा; T1.3 G3 अदृष्टः; G1 अदुष्टः (for अहृष्टः). Ś1 Ñ1 D1.2.4.5.7.9-11 T2 अदृष्ट्वा जनकात्मजां; Ñ2 V B1.2.4 D6 अदृष्ट्वा कपिकुंजरः; D3 अकृत्वा कृत्यमुत्तमं. ❀ Ck: संहृष्ट इति पाठः। से मधुवनं संहृष्टः सन् न हन्यात्, यद्यकृतकृत्य इति शेषः। . . . . . . न्यादृष्ट इति पाठः। हन्यादहृष्ट इति वा पाठः. ❀

30 B3 om. 30 (cf. v.l. 25). —$^{b}$) Ñ2 V B2 D8 मा शुचः; B1 मद्वचः; B4 D9 सुव्रतः (for सुव्रत). —$^{c}$) B2 सीता (for देवी). —$^{d}$) Ñ2 V B1.4 D3.6 हनूमतः. —For 30$^{cd}$, Ś1 Ñ1 D1.2.4.10.11 subst.; while Ñ2 V B1.2.4 D6 ins. after 33; whereas D3 ins. after 30$^{ab}$:

1343* सर्वथा खलु वैदेही लक्षिता नात्र संशयः ।

—Ś1 Ñ1 D1-4.10.11 cont.; Ñ2 B1.2.4 D6 ins. after 30; V1 ins. after the first occurrence of 30$^{ef}$; whereas D7-9 T2 ins. after 33:

G. 5. 65. 9
B. 5. 64. 33
L. 5. 63. 0

हनूमति हि सिद्धिश्च मतिश्च मतिसत्तम ।
व्यवसायश्च वीर्यं च सूर्ये तेज इव ध्रुवम् ॥ ३१
जाम्बवान्यत्र नेता स्यादङ्गदश्च बलेश्वरः ।
हनूमांश्चाप्यधिष्ठाता न तस्य गतिरन्यथा ॥ ३२
मा भूश्चिन्तासमायुक्तः संप्रत्यमितविक्रम ॥ ३३
ततः किलकिलाशब्दं शुश्रावासन्नमम्बरे ।
हनूमत्कर्मदृप्तानां नर्दतां काननौकसाम् ।
किष्किन्धामुपयातानां सिद्धिं कथयतामिव ॥ ३४
ततः श्रुत्वा निनादं तं कपीनां कपिसत्तमः ।
आयताञ्चितलाङ्गूलः सोऽभवद्धृष्टमानसः ॥ ३५
आजग्मुस्तेऽपि हरयो रामदर्शनकाङ्क्षिणः ।
अङ्गदं पुरतः कृत्वा हनूमन्तं च वानरम् ॥ ३६

---

1344* यथा हि दर्पितोदग्राः संगताः काननौकसः ।
नैषामकृतकार्याणामीदृशः स्यादुपक्रमः ।
वनभङ्गेन जानामि मधूनां भक्षणेन च ।

[(l. 1) Ñ2 V1 B1.2 D6 तथा; D7–9 यदा (for यथा). D10 om. हि (subm.). Ś1 Ñ1 D10 दर्पिता व्यग्राः (for °तोदग्राः). B4 तथा ह्युदग्रा दृश्यंते (for the prior half). Ñ2 V1 B1.2.4 D6 सांगदाः; D4 संमताः (for संगताः). D3 समायाता वनौकसः (for the post. half). —(l. 2) Ś1 Ñ1 D1–4.10 व्यतिक्रमः; Ñ2 D6.11 पराक्रमः (for उप°). —(l. 3) B1.2.4 D6 मधुनो (for मधूनां).]

—Thereafter Ñ2 V1 B1(within brackets).2.4 D6 cont.:

1345* दृष्ट्वा ह्येते हरिवरा जानकीं ध्रुवमागताः ।

[D6 [ए]तां (for [ए]ते). B1.2 हि हरयो and एव च (for हरिवरा and आगताः respy.).]

—Ś1 Ñ1 D1.2.4.10.11 om. $30^{e}$–33. D3 om. $30^{ef}$. V1 reads $30^{ef}$ twice. —$^{e}$) Ñ2 V1(second time as in D5).2 B1.2.4 D6 नान्यो(B4 °न्य)स्य; D5.7–9 T2 G2 M1.2 Ct न ह्यस्य (for न ह्यन्यः). T1.3 G3 साधने; Ct कर्मणो (as in text). —$^{f}$) T1.3 G3 कर्मणोस्य हनूमतः; M3 साधनेस्य हनूमतः.

31 B3 om. 31 (cf. v.l. 25). Ś1 Ñ1 D1.2.4.10.11 om. 31 (cf. v.l. 30). M1 damaged for $^{ab}$. —$^{a}$) B1.2 ह; B4 [अ]स्ति; D5.7.9 [इ]ह (for हि). D8 मतिश्चैव (for हि सिद्धिश्च). —$^{b}$) D9 om. (hapl.) मतिश्च. Ñ2 V B1.2.4 D3.6 रघुनंदन; G1 मतिसत्तमे (for मतिसत्तम). D8 कर्मसिद्धिश्च सत्तम. —$^{c}$) Ñ2 B1.2 G3 व्यवसायं. Ñ2 V B1.2.4 D3.5–9 T2 G1 M1.2 शौर्यं (for वीर्यं). —$^{d}$) B1.2.4 D3.5 T1 M1 सूर्य- (for सूर्ये). D7.9 श्रुतं चापि प्रतिष्ठितं.

32 B3 om. 32 (cf. v.l. 25). Ś1 Ñ1 D1.2.4.10.11 om. 32 (cf. v.l. 30). —$^{a}$) Ñ2 V1 B1.2.4 D6 [अ]भूद् (for स्याद्). —$^{b}$) V1 D6–9 T2 हरीश्वरः (for बले°). —$^{c}$) V2 B1.2.4 D6 अप्यधिष्ठाता; D3 च प्रतिष्ठाता. —$^{d}$) Ñ2 V B1.2.4 D3.5–9 T2 M2 तत्र; T1.3 G3 तेषां; Cg as in text (for तस्य).

33 B3 om. 33 (cf. v.l. 25). Ś1 Ñ1 D1.2.4.10.11 om. 33 (cf. v.l. 30). —$^{a}$) D3 मैवं शोक- (for मा भूश्चिन्ता-). Ñ2 V1 B1.2.4 D6 नैवं चिंतयितुं युक्तं(V1 °क्तः); V2 नैव वंचयितुं शक्यं. —$^{b}$) D3 तिष्ठस्व (for संप्रति). V B1.4 D5.9 G3 -विक्रमः. —After 33, Ñ2 V B1.2.4 D6 ins. 1343*, while D3 ins.:

1346* त्यज शोकं च चिन्तां च सीतां प्राप्स्यस्यसंशयम् ।

—After 33, D7–9 T2 ins. 1344*, while T1.3 G3 ins.:

1347* इत्येवमुच्यमाने तु हरिराजेन राघवे ।

34 B3 om. 34 (cf. v.l. 25). D3 repeats 34 here (cf. v.l. 24). —$^{a}$) B1 अतः (for ततः). Ś1 Ñ1 D1.2.3(both times).4.10.11 किल(D10 °लि)किलाशब्दः; T1.3 G3 M1.2 किलिकिलाशब्दं. —$^{b}$) Ñ2 V B1.2.4 D6 स तदा (for [आ]सन्नम्). Ś1 Ñ1 D1.2.3(first time).4.10.11 शुश्रुवे(D1.3.4 श्रूयते) विमलें(D11 स तदां)बरे; D3(second time) शुश्रुवे स ततोंबरे; T2 शुश्रुवे सन्नमंबरे. —$^{c}$) Ñ2 B1.2.4 D3(first time).6 -हृष्टानां; D2.11 -तृप्तानां (for -दृप्तानां). D3(second time) हनुमत्कर्मणा तेन. —D11 om. $34^{d}$–$35^{a}$. —$^{d}$) Ñ V B1.2.4 D5–7.9 G2 M1 नदतां; D3(second time) दृप्तानां (for नर्दतां). Ś1 D1.2.4.10 संगतानां वनौकसां. —After $34^{cd}$ (first occurrence), D3 ins.:

1348* स तेषां तु महान्नादः सिंहानामिव नर्दताम् ।

—After $34^{cd}$ (second occurrence), D3 ins.:

1349* अतिक्रम्य बहून्देशानन्योन्यपरिसर्पणात् ।

—$^{e}$) D3(first time) उपयाति स्म (for °यातानां). —$^{f}$) Ś1 D10 इह (for इव). —After 34 (first occurrence), D3 ins. an addl. colophon.

[*Sarga name*: अंगदप्रत्यागमनः. —*Sarga no.*: 6S.]

35 B3 om. 35 (cf. v.l. 25). D11 om. $35^{a}$ (cf. v.l. 34). —$^{a}$) D5.8 T3 G3 तत्र (for ततः). D4 तद; D5 तु (for तं). Ñ2 V B1.2.4 D6 कपीनां तु(B1.2 च) (for निनादं तं). —$^{b}$) Ñ2 V B1.2.4 D6 निन(B4 °ना)दं (for कपीनां). Ś1 Ñ1 D1.2.4.10.11 -कुंजरः (for -सत्तमः). —$^{c}$) Ś1 Ñ1 D10 -[उ]च्छ्रित-; D3 -[उ]चित- (for -[अ]ञ्चित-). —$^{d}$) D3 प्रीति-; M2 हृत- (for हृष्ट-).

36 B3 om. 36 (cf. v.l. 25). —$^{a}$) B4 हि (for

तेऽङ्गदप्रमुखा वीराः प्रहृष्टाश्च मुदान्विताः ।
निपेतुर्हरिराजस्य समीपे राघवस्य च ॥ ३७
हनूमांश्च महाबाहुः प्रणम्य शिरसा ततः ।
नियतामक्षतां देवीं राघवाय न्यवेदयत् ॥ ३८

निश्चितार्थं ततस्तस्मिन्सुग्रीवं पवनात्मजे ।
लक्ष्मणः प्रीतिमान्प्रीतं बहुमानादवैक्षत ॥ ३९
प्रीत्या च रममाणोऽथ राघवः परवीरहा ।
बहुमानेन महता हनूमन्तमवैक्षत ॥ ४०

G. 5. 65. 19
B. 5. 64. 45
L. 5. 63. 15

इति श्रीरामायणे सुन्दरकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

ऽपि). Ś1 Ñ1 D1.2.4.10.11 आगतास्ते तु (D1.2.4.11 °स्तेथ) (for आजग्मुस्तेऽपि). D3 तेप्याजग्मुः कपिवरा.—$^b$) Ś1 Ñ1 D1.2.4.6.10.11 रामसुग्रीवदर्शनं (Ś1 D2.10 °शासनात्). —Ñ1 D1.4.5.7–9 T2 repeat $36^{cd}$ here (cf. v.l. 24 and 23).—$^c$) D8 (first time) लेंगदं (for अङ्गदं). —$^d$) Ñ1 (second time) पूजितं (for वानरम्).—After $36^{cd}$ (first occurrence), Ñ1 D1–4 ins. an addl. colophon.

[*Sarga name*: Ñ1 अंगद * * (illeg.); D1.4 अंगदवाक्यं.—*Sarga no.* (figures, words or both): Ñ1 illeg.; D1.4 om.]

37 B3 om. 37 (cf. v.l. 25).—$^a$) Ñ2 V B1.2.4 D1.6 सर्वे (for वीराः).—$^b$) D7.9 M1 मदान्विताः (for मुदा°). Ś1 Ñ1 D1.2.4.10.11 प्र (D1.4.11 सं; D2 संप्र [hypm.]) हृष्टाः परया मुदा; Ñ2 V B1.2.4 D6 संप्र (V2 सं; B4 सुसं) हृष्टमुखास्तदा (V2 B1 °था); D3 हरयः प्रीतिमानसाः.—M1 damaged for $37^{cd}$.—$^c$) Ñ2 V D3.6 कपि- (for हरि-).—$^d$) Ñ2 V B1.2.4 D6 पादयोः; G1 समीपं (for समीपे). Ś1 Ñ1 D1–4.10.11 राघवस्य च संनिधौ (Ñ1 D1.4 पादयोः). ❀ Ck: राघवस्य चेत्यनन्तरम्, "बहुमानेन महता हनुमन्तमवैक्षत" सुग्रीवो रामश्चेति शेषः। सार्धश्लोकद्वयं क्वचित्प्रक्षिप्तम्। स्थूलं चेदं तदुज्झितम्. ❀

38 B3 om. 38 (cf. v.l. 25).—$^a$) B2 D1.2.4.11 तु (for च). Ś1 D2.10.11 महाकायः; Ñ1 तदा रामं; D1.4 ततो रामं (for महाबाहुः). D3 हनूमानथ तेजस्वी.—$^b$) D6 प्रणतः (for प्रणम्य). D3 तयोः (for ततः).—After $38^{ab}$, Ñ2 V B1.2.4 D6 ins.:

1350* अभ्यवादयत प्राज्ञो रामं कमललोचनम्।

[B1 (before corr. as above marg. after).2 प्रह्वो (for प्राज्ञो).];
while D3 ins.:

1351* रामलक्ष्मणयोर्भ्रात्रोः सुग्रीवं चाभ्यवादयत्।

—V1 B1.2.4 D3 om. $38^{cd}$.—$^c$) D6 * * * *क्षतां देवीं. —$^d$) D2.5.7 निवेदयत् (sic).—After 38, D7–9 G1 ins.:

1352* दृष्टा देवीति हनुमद्वदनादमृतोपमम्।
आकर्ण्य वचनं रामो हर्षमाप सलक्ष्मणः।

39 B3 om. 39 (cf. v.l. 25). T2 illeg. up to सुग्रीवं in $^b$.—$^a$) Ś1 Ñ V B2 D1–4.6.10.11 G2 M2.3 निश्चितार्थस् (for °तार्थं).—$^b$) Ś1 Ñ V B1.2.4 D2.3.6.10.11 G2 M2.3 सुग्रीवः. D3.6 पवनात्मजं.—D4 om. $39^{cd}$. —$^c$) Ś1 Ñ1 D1.3.10.11 चैव; D2 चैनं; D5.7.9 M2 प्रीतो; T2 पूर्वं; G3 M1 प्रीतिं (for प्रीतं). Ñ2 V B1.2.4 D6 च परं हृष्टो (for प्रीतिमान्प्रीतं).—$^d$) Ñ2 V B1.2.4 D6 हनूमंतम् (for बहुमानाद्).

40 B3 om. 40 (cf. v.l. 25).—$^a$) Ś1 Ñ1 D7.9.10 परमो (D10 °यो) पेतो (for रममाणोऽथ). Ñ2 V B1 (m. also).2.4 D3.6 प्रीत्या परमया युक्तो (V2 B4 प्रीतो; B1 [orig.] हृष्टो); D1.2.4.5.11 स प्रीत्या परयोपेतो.—$^b$) V2 B1.4 D6 रामश्च (for राघवः). Ś1 Ñ1 D1.2.4.10.11 सहलक्ष्मणः (for परवीरहा). D3 तथा रामोपि बुद्धिमान्. ❀ Cg: अस्मिन्सर्गे सार्धैकोनचत्वारिंशच्छ्लोकाः. ❀—After 40, D1.3.4 ins.:

1353* सोत्कम्पहृदयश्चैव शोकहर्षसमाकुलः।

Colophon: B3 om. (cf. v.l. 25).—*Sarga name*: Ś1 D10 वानरसमागमः; Ñ1 श्रीरामदर्शनं; Ñ2 V B1.2.4 D6 सुग्रीववाक्यं; D1.4 सुग्रीवदर्शनः; D2.11 अंगदोपयानं; D3 वानरागमनः.—*Sarga no.* (figures, words or both): V1 B1 Ñ1 B2 D1.2.4.10.11 om.; Ś1 66; Ñ2 D6 67; V1 B1 65; V2 56; B4 70; D3 69; D5.7–9 T1.3 G M1.3 64; T2 M2 63.—After colophon, G M1.2 conclude with श्रीरामाय नमः.

# ६३

G. 5. 66. 1
B. 5. 65. 1
L. 5. 64. 1

ततः प्रस्रवणं शैलं ते गत्वा चित्रकाननम् ।
प्रणम्य शिरसा रामं लक्ष्मणं च महाबलम् ॥ १
युवराजं पुरस्कृत्य सुग्रीवमभिवाद्य च ।
प्रवृत्तिमथ सीतायाः प्रवक्तुमुपचक्रमुः ॥ २
रावणान्तःपुरे रोधं राक्षसीभिश्च तर्जनम् ।
रामे समनुरागं च यश्चापि समयः कृतः ॥ ३
एतदाख्यान्ति ते सर्वे हरयो रामसंनिधौ ।
वैदेहीमक्षतां श्रुत्वा रामस्तूत्तरमब्रवीत् ॥ ४
क्व सीता वर्तते देवी कथं च मयि वर्तते ।
एतन्मे सर्वमाख्यात वैदेहीं प्रति वानराः ॥ ५
रामस्य गदितं श्रुत्वा हरयो रामसंनिधौ ।
चोदयन्ति हनूमन्तं सीतावृत्तान्तकोविदम् ॥ ६
श्रुत्वा तु वचनं तेषां हनूमान्मारुतात्मजः ।
उवाच वाक्यं वाक्यज्ञः सीताया दर्शनं यथा ॥ ७
समुद्रं लङ्घयित्वाहं शतयोजनमायतम् ।
अगच्छं जानकीं सीतां मार्गमाणो दिदृक्षया ॥ ८
तत्र लङ्केति नगरी रावणस्य दुरात्मनः ।
दक्षिणस्य समुद्रस्य तीरे वसति दक्षिणे ॥ ९

## 63

1 a) Ś1 Ñ2 V B D2.3.10.11 ते तु; Ñ1 ते तं; D1.4 तं ते; D6 तं तु (for ततः).—b) Ś1 Ñ1 D1.2.4.10.11 आगताश्च (for ते गत्वा). Ñ2 V B D6 आगत्य (V °म्य) हरियूथपाः (B2 °पुंगवाः); D3 आगम्य शुभकाननं.—d) Ñ2 V B1–3 D6 महारथं (for °बलम्). D3 भ्रातरं चास्य लक्ष्मणं.

2 M1 om. 2–$3^{b}$.—a) T1 पु * * त्य (damaged) (for पुरस्कृत्य).—b) Ñ1 चाभिवंद्य सः (for अभिवाद्य च).—c) Ś1 Ñ1 D1.2.4.10.11 आख्यातुं (D10.11 °तं) तत्र (Ñ1 D1.4 ते तु); D3 आख्यातुमथ (for प्रवृत्तिमथ).—d) Ś1 Ñ1 D1–4.10.11 M2 प्रवृत्तिम्; Ñ2 V B D6 आख्यातुम् (for प्रवक्तुम्). B4 D4.7.9 उपचक्रमे (for उपचक्रमुः).

3 D4 M1 om. $3^{ab}$ (for M1, cf. v.l. 2).—a) Ś1 D10 घोरे; D11 रोषं (for रोधं). D1.2 रावणांतःपुरं घोरं.—b) Ś1 D2.8.10 T2 राक्षसीनां (for राक्षसीभिश्च).—c) T1 अनु * * (damaged) (for अनुरागं). Ś1 Ñ V B D1–4.6.10.11 अनुरागं च वैदेह्या (Ñ2 D6 सीताया).—d) D5 T1.3 G3 M3 [अ]यं (for [अ]पि). D1.4 कृतो यश्चापि संशयः; D7.9 यथा च नियमः कृतः.

4 a) Ś1 D10 समाचचक्षिरे वीरा; Ñ1 D1.2.4 एवं चा (Ñ1 D2 °वमा) चक्षिरे वीरा; Ñ2 V B D6.11 तदाचचक्षिरे सर्वे (Ñ2 D11 वीरा; B4 सर्वं); D3 एवमाख्यातवंतस्ते; D7–9 T2.3 G3 एतदाख्याय ते (G3 तत्) सर्वे (D7.9 सर्वं).—b) V B D6 वानरा (for हरयो). D6 राज- (for राम-).—After $4^{ab}$, T2 ins.:

1354* स्थिताः प्राञ्जलयः सर्वे संप्रहृष्टतनूरुहाः ।

—D11 om. (hapl.) $4^{c}$–$6^{b}$.—d) B3 ईक्षतां (sic); D2 अहतां (for अक्षतां). Ś1 Ñ V B1.2.4 D1.3.4.6.10 रामः श्रुत्वा (by transp.); B3 रामः सत्वान् (for श्रुत्वा रामस्). Ś1 Ñ1 V B D1–4.10 M2 च (for तु). Ñ2 D6 वचनम् (for तूत्तरम्).

5 D11 om. 5 (cf. v.l. 4).—a) B2 ह्य (for देवी). G3 कच्चिदावर्तते देवि.—b) Ś1 Ñ1 D1.2.4.10 वा (for च). D1.4 transp. मयि and वर्तते.—c) Ñ1 D3.5 T2 G1 M1 आख्यातं. T1.3 G3 एतत्सर्वं समाख्यात.—d) B3 राक्षसीभिश्च तर्जनं = $3^{b}$.

6 D11 om. $6^{ab}$ (cf. v.l. 4).—a) Ś1 Ñ1 D1.10 तु (D1 च) वचः; Ñ2 V B D2–4.6 वचनं (for गदितं).—c) Ś1 D10 चोदयंतो; Ñ1 देशयंति; Ñ2 V2 D6.11 अचोदयन्; V1 B3 अवेदयन्; B1.2 D3 अनोदयन् (B1 [marg. also] अचोदयन्); B4 अवोचयन्; D2 नोदयंति (for चोदयन्ति). ❀ Ck : अत्र मध्ये द्वौ श्लोकौ . . . . (damaged). ❀

7 a) Ñ2 V B2.4 D6 तद्; D3 च (for तु). B3 तच्छ्रुत्वा (for श्रुत्वा तु).—After $7^{ab}$, D5.7–9 S ins.:

1355* प्रणम्य शिरसा देव्यै सीतायै तां दिशं प्रति ।

—c) D2 वाक्यज्ञं.—d) Ñ1 B1 (marg. also as in text) D1.4 प्रति; V2 B4 D2 तथा; D11 तदा (for यथा).—After 7, Ś1 Ñ1 D1.3.4.7–10 T2 ins. l. 1–2 of 1359* (Ñ1 D10 repeat them in their proper place).

8 a) B3 तु (for [अ]हं).—b) V शतयोजनविस्तृतं.—c) B2.4 D3.6 आगच्छं.—d) Ś1 Ñ1 D1.2.4.10.11 यदृच्छया; Ñ2 V B1.3.4 D3.6 विहायसा (for दिदृक्षया). B2 मार्गमाणं विहायसा.

9 a) Ñ2 V B D6 लंका नाम पुरी त (Ñ2 D6 य) त्र (B3 om. from तत्र up to राक्षसी- in $11^{a}$).—c) Ñ1 D11 दक्षिणे तु (for दक्षिणस्य).—d) B4 प्रकृतिः; D3 भवति (for वसति). Ñ1 दारुणे; D11 दुर्गमे (for दक्षिणे).

तत्र दृष्टा मया सीता रावणान्तःपुरे सती ।
संन्यस्य त्वयि जीवन्ती रामा राम मनोरथम् ॥ १०
दृष्टा मे राक्षसीमध्ये तर्ज्यमाना मुहुर्मुहुः ।
राक्षसीभिर्विरूपाभी रक्षिता प्रमदावने ॥ ११
दुःखमापद्यते देवी तवादुःखोचिता सती ।
रावणान्तःपुरे रुद्धा राक्षसीभिः सुरक्षिता ॥ १२
एकवेणीधरा दीना त्वयि चिन्तापरायणा ।
अधःशय्या विवर्णाङ्गी पद्मिनीव हिमागमे ॥ १३
रावणाद्विनिवृत्तार्था मर्तव्यकृतनिश्चया ।
देवी कथंचित्काकुत्स्थ त्वन्मना मार्गिता मया ॥ १४
इक्ष्वाकुवंशविख्यातिं शनैः कीर्तयतानघ ।
सा मया नरशार्दूल विश्वासमुपपादिता ॥ १५
ततः संभाषिता देवी सर्वमर्थं च दर्शिता ।
रामसुग्रीवसख्यं च श्रुत्वा प्रीतिमुपागता ॥ १६
नियतः समुदाचारो भक्तिश्चास्यास्तथा त्वयि ।
एवं मया महाभागा दृष्टा जनकनन्दिनी ।
उग्रेण तपसा युक्ता त्वद्भक्त्या पुरुषर्षभ ॥ १७

G. 5. 66. 18
B. 5. 65. 19
L. 5. 64. 18

10 B3 om. 10 (cf. v.l. 9).—a) D3 नात्र (for तत्र). Ñ V B1.2.4 D1-9.11 T2 G1 M1.2 transp. दृष्टा and सीता.—After 10ab, G2 reads 12cd for the first time, repeating it in its proper place.—c) D7.9 transp. संन्यस्य and त्वयि. Ñ1 D1-4.10.11 भावं (D1.4 °रं) सा; Ñ2 V B1.2.4 D6 भद्रं ते (for जीवन्ती). Ś1 संन्यस्य भावं त्वयि सा.—d) Ś1 Ñ1 D1.2.4.8.10.11 M1 राम (for रामा). G1.2 M2 transp. रामा and राम. Ś1 Ñ1 D1.2.4.10 -मनोरथा; D3.11 मनोरमा (for मनोरथम्). Ñ2 V B1.2.4 D6 प्राणात्रा(B2 D6 °त्रा)स मनोरथैः.

11 B3 om. up to राक्षसी in a (cf. v.l. 9).—a) B4 D8 दृष्टा सा; D2.11 संरुद्धा; D5.10 दृष्टा मे (for दृष्टा मे). Ñ1 जानकी; V2 रक्षसां (for राक्षसी-).—b) Ś1 Ñ1 D1-4.10.11 भर्त्स्यमाना (for तर्ज्यमाना). Ś1 Ñ V B D1-4.6.10.11 पुनः पुनः (for मुहुर्मुहुः).—D4 om. (hapl.) from 11c up to 12c.—c) D9 (also) विरूपाक्षिभी (hypm.) (for विरूपाभी).

12 D4 om. up to 12c (cf. v.l. 11).—ab) T2 G1 M1.3 Cg आसा(G1 °पा)द्यते; Cr.k.t as in text (for आपद्यते). ❀ Cg: आसाद्यते आसीदति। आर्षो यत्. ❀ D5.7.9 त्वया वीर(D5 सह) सुखोचिता; D8 T G3 M3 त्वया (T2 तदा; G3 त्वयि; M3 तथा) दुःखोचिता सती (for b). Ś1 Ñ1 D1-3.10.11 दुःखं सा(D2 दुःखेन) वर्तते सीता सुखासुचिता सती; Ñ2 V B D6 दुःखमास्ते भृशं सीता नित्यं देवी सुखो(B3 यथो)चिता. ❀ Cv: तवादुःखोचिता सतीति पाठः. ❀ G2 repeats 12cd here (cf. v.l. 10).—c) D2 -[अं]तःपुरं.

13 a) B3 सा तु (for दीना).—b) B3 दीना (for त्वयि). Ś1 Ñ1 D2.10.11 त्वचिंता त्वत्-; Ñ2 V B1.2.4 D1.4.6 त्वचित्ता त्वत्-; D3 भर्तृश्चिंता- (for त्वयि चिन्ता-).—d) D8 हिमोदये (for हिमागमे).

14 a) B3.4 D6 -[आ]त्मा (for -[अ]र्था).—b) Ś1 Ñ1 मृत्यवे; V2 B3.4 D1-4.6.10.11 मर्तव्ये; Ck as in text (for मर्तव्य-). ❀ Cg: मर्तव्ये मरणे कृतनिश्चया. ❀—G3 om. 14cd. Ś1 Ñ1 D1-4.10.11 transp. 14cd and 15ab.—c) Ś1 Ñ V B D2-4.6.10.11 कथंचिदेव(Ś1 Ñ1 D10 °दपि); D1 T1.3 कथंचिद्देवी (by transp.) (for देवी कथंचित्).—d) G2 त्वन्मया (for त्वन्मना). Ś1 Ñ1 D1-4.10.11 विश्वासमुप(D2 °सं समु)पादिता; Ñ2 B3 D6 सा तत्रा (B2 सामया)सादिता मया; V B1.3 तत्र सासादिता मया; B4 तत्र संभाविता मया.

15 Ś1 Ñ1 D1-4.10.11 transp. 14cd and 15ab. M1 partly illeg. for 15ab.—a) V2 -कुल- (for -वंश-). Ś1 Ñ1 B4 D1-4.10.11 -वंशं(B4 D1.3 °श-) वि(Ś1 ख्या)ख्यातं (for -वंशविख्यातिं).—b) Ś1 Ñ1 V1 B D1-4.8.10.11 मया; Ñ2 V2 D6 तदा (for [अ]नघ).—D3 om. (hapl.) 15cd.—c) Ś1 Ñ1 B1-3 D1.2.4.6.10.11 रघु- (for नर-). V2 नरशार्दूले. V1 B4 कथंचिदेव काकुत्स्थ.—d) V2 B3 असिपादिता; B2 अभिपालिता (m. also प्रतिपादिता) (for उपपादिता). Ś1 Ñ1 D1.2.4.10.11 समाश्वाससमुपागता; D7.9 शनैर्विश्वासिता तदा.—After 15, T3 ins.:

1356* सा प्रकृत्यैव तन्वङ्गी तद्वियोगाच्च कर्शिता ।
प्रतिपत्पाठशीलस्य विद्येव तनुतां गता ।

[ = 1259*.]

16 Ñ2 reads 16 in marg.—a) B4 D3 संभाविता. B1 सीता (for देवी). Ś1 Ñ1 D1.2.4.10.11 समाश्वास्य ततो देवी(D11 °वीं).—b) Ñ1 om. अर्थं च. Ś1 D10 ग्राहिता; Ñ2 V B D1.2.4.6.11 श्राविता (for दर्शिता). D3 सर्वं कथयिता मया.—c) V1(also) -कर्म च (for -सख्यं च). Ñ2 रामसुग्रीवयोः सख्यं.—d) Ś1 कीर्तिम्; D7-9 हर्षम् (for प्रीतिम्). Ñ2 V B2.4 D6 उपागमत्; D1.2.4 परां गता (for उपागता).

17 a) Ś1 D3.10 T2 M2 नियमः; Ñ V B1-3 D1.2.4.6.11 विनयः(D4 °यं); B4 निरुद्धः; D3 नियतिः; Ct as in text (for नियतः). Ñ1 om. समुदाचारो.—b) Ś1 Ñ2 V1 B1-3 D1-4.6.10.11 G1 M2 तस्यास; Ct as in

G. 5. 66. 29
B. 5. 65. 20
L. 5. 64. 28

**अभिज्ञानं च मे दत्तं यथावृत्तं तवान्तिके । चित्रकूटे महाप्राज्ञ वायसं प्रति राघव ॥ १८**

text (for चास्यास्). Ñ1 B4 भर्तृ(B4 °र्तुर्)भक्तिस्; V2 यथा भक्तिस् (for भक्तिश्चास्यास्). D7.9 Ct सदा; G1 M2 यथा (for तथा). T1.3 G2.3 भक्तिर्भर्तरि चोत्तमा. —After 17ab, Ś1 Ñ V B D1–4.6.10.11 T2 ins.:

1357* यत्र हन्ति दशग्रीवं तन्महात्मा स राक्षसः ।

[Ś1 Ñ1 D1.2.4.10 T2 हंति यत्र (by transp.); D11 हंति यस्तं. V1 B सु-; V2 T2 स (for तन्). Ś1 Ñ1 D10 स रावणः; B3 D6 स राक्षसं; B4 स राघवः; T2 दशाननः (for स राक्षसः).]

—c) Ñ2 B1 D5.7.9 महाभाग; D11 तदा दृष्टा (for महाभागा). Ś1 Ñ1 D1.2.4.10 एवं तदा(Ś1 D10 -वृत्ता) मया दृष्टा. —d) Ś1 Ñ1 D1.4.10.11 सीता (for दृष्टा). —M1 partly illeg. for 17ef. —f) Ś1 Ñ B1.3.4 D1–4.6.11 T1.3 G3 M2 -भक्ता; Ct as in text (for -भक्त्या). D1.3.4 पुरुषोत्तम; D8 रघुनंदन (for पुरुषर्षभ). —After 17, Ś1 Ñ1 V1 B4 D2.10.11 ins.:

1358* सा धारयति लोकेषु माहात्म्यं गुणभूषिता ।
सर्वथा सीतया दग्धो राक्षसोऽसौ महाबलः ।
निमित्तमात्रं त्वं तत्र वधे तस्य भविष्यसि ।
मणिं च दिव्यरूपं मे प्रादाच्छोकाकुलेक्षणा ।
यदत्र प्रतिपत्तव्यं तत्सर्वमुपपाद्यताम् । [5]

[Ñ1 om. l. 1. —(l. 1) V1 B4 -सूचितं (for -भूषिता). —(l. 2) B4 [आ]सीत्तथा (for सीतया). Ñ1 रावणो (for राक्षसो). Ś1 D10 न संशयः (for महाबलः). —(l. 3) D2 transp. त्वं and तत्र. —Ś1 om. l. 4–5. V1 illeg. from l. 4 up to 1359*. —(l. 4) Ñ1 तु (for च). Ñ1 B4 ते (for मे). —(l. 5) D2.11 उपपद्यतां.]

—Thereafter Ś1 (except l. 1–2) Ñ1 V1 (illeg., cf. v.l. 1358*) B4 D2.10.11 cont.; Ś1 Ñ1 D1.3.4.7–10 T2 ins. l. 1–2 after 7 (Ñ1 D10 for the first time, repeating them here); while D3 ins. l. 3–7 after 21; whereas Ñ2 V2 B1–3 D6 ins. after 17:

1359* तं मणिं दिव्यरूपं च दीप्यमानं स्वतेजसा ।
दत्त्वा रामाय हनुमांस्ततः प्राञ्जलिरब्रवीत् ।
तासामन्तरमासाद्य राक्षसीनां वरानना ।
अब्रवीन्मां तदा सीता शोकबाष्पपरिप्लुता ।
वक्तव्यस्ते नरव्याघ्रो रामः सत्यपराक्रमः । [5]
निखिलेनेह यद्दृष्टं राक्षसीनां च यच्छ्रुतम् ।
तर्जितं राक्षसेन्द्रस्य गर्जितं भीषणं तथा ।
द्वौ मासौ जीवितव्यं मे स चापि समयः कृतः ।

[(l. 1) Ś1 Ñ1 D7–10 (Ñ1 D10 first time) कांचनं दिव्यं; D1.3.4 कनकाबद्धं (for दिव्यरूपं च). Ś1 स्वरोचिषा; Ñ1 (second time) सुतेजसा; D10 (first time) सुरोचिषा (for स्वतेजसा). —(l. 2) Ś1 transp. दत्त्वा and रामाय. D10 (first time) दत्त्वा रामं हनूमांश्च (for the prior half). Ñ1 (second time) D2.11 तदा; B4 तत्र; D10 (second time) पुनः (for ततः). —B3 om. l. 3. —(l. 3) Ñ2 B1 D6 वरांगना (for वरानना). —(l. 4) Ñ1 D2.11 सा (for मां). Ñ2 V2 तथा; B1.2 ततः (for तदा). Ś1 D10 om. from शोक- up to यद्दृष्टं in l. 6. B2.3 D3 बाष्पशोक- (by transp.) (for शोकबाष्प-). Ñ1 B1 D2.11 राक्षसीभिः सुरक्षिता (for the post. half). —(l. 5) D3 विज्ञाप्यश्च (for वक्तव्यस्ते). Ñ1 महाबाहुः; D2.11 महाबाहो (for नरव्याघ्रो). D3 रामो वायुसुत त्वया (for the post. half). —(l. 6) Ñ1 तु; D2.11 च (for [इ]ह). B2 पैद्; D11 तद् (for यद्). B3 निखिलं चेह यद्दृष्टं (for the prior half). Ś1 D10 संनिधौ; B3 तर्जनं; D11 तच्छ्रुतं (for यच्छ्रुतम्). —(l. 7) Ś1 Ñ1 B1 D2.3.10.11 गर्जितं; B3 तर्जनं (for तर्जितं). Ś1 Ñ1 B1 D2.3.10.11 तर्जनं (for गर्जितं). B4 यथा; D3 त्वया (for तथा). —(l. 8) B2 D2.11 जीवितव्यौ. V2 जीवितं मेच. Ś1 Ñ1 यच्चापि; D2.10.11 यश्चापि (for स चापि).]

18 Ś1 Ñ V B D2.6.10.11 read 18 after 23. —b) D9 तवांतिकं; Cg as in text (for तवान्तिके). —d) Ś1 Ñ1 D1.2.4.10.11 मानद (for राघव). —For 18, Ñ2 V B D6 subst.; while Ś1 Ñ1 D2.10.11 ins. after 18:

1360* भूयश्चेदमभिज्ञानं वैदेह्याः शृणु राघव ।
उत्तरे चित्रकूटस्य वृत्तं पादे मनोरमे ।

[(l. 1) D2 [ए]तद् (for [इ]दम्). V2 भूयश्च मम विज्ञानं (for the prior half). —(l. 2) B4 चित्रकूटे स्म (for °कूटस्य). —D10 om. from the post. half of l. 2 up to the prior half of l. 1 of 1361*. Ś1 Ñ1 D2 पादे वृत्तं (by transp.); D11 पादे वृत्ते (for वृत्तं पादे). Ñ2 V1 मनोहरे (for °रमे). B4 बहुपादपसंकुले (for the post. half).]

—Thereafter all the above MSS. cont.:

1361* बाधमानस्य वैदेहीं मांसार्थे वायसस्य तु ।
क्षिप्तामिषीकां काकस्य तस्यार्थे दुष्टकर्मणः ।
ऐषीकमस्त्रमपि तत्काकार्थे संनिपातितम् ।
जहि पापमिदं रक्षः क्रूरं दारापहारिणम् ।

[(l. 1) V1 B1.3.4 रोठ(B4 रुच्य)मानस्य; V2 बाध्य°; B2 रो(also रु in marg.)दयादस्य (sic) (for बाधमानस्य). Ś1 Ñ1 D2.11 रट(D2 लोभ; D11 रोठ)मानस्य काकस्य; D10 om. (for the prior half). B2 सीतार्थे (for मांसार्थे). B3 च (for तु). Ś1 Ñ1 D2.10.11 स्मर्तुमर्हसि; B4 राघवस्य च (for वायसस्य तु). —(l. 2) Ś1 Ñ1 D2.10.11 तत्रास्य (for काकस्य). B4 क्षिप्तेषीका च (for क्षिप्तामिषीकां). Ś1 Ñ1 D2.10.11 रोषा(Ñ1 कोपा)देकांगनाशिनीं (for the post. half). —D3 om. l. 3. —(l. 3) Ś1 Ñ V1 D6 एषीकम् (for ऐषीकम्).

विज्ञाप्यश्च नरव्याघ्रो रामो वायुसुत त्वया ।
अखिलेनेह यद्दृष्टमिति मामाह जानकी ॥ १९
इदं चास्मै प्रदातव्यं यत्नात्सुपरिरक्षितम् ।
ब्रुवता वचनान्येवं सुग्रीवस्योपशृण्वतः ॥ २०
एष चूडामणिः श्रीमान्मया ते यत्नरक्षितः ।
मनःशिलायास्तिलकस्तं स्मरस्वेति चाब्रवीत् ॥ २१
एष निर्यातितः श्रीमान्मया ते वारिसंभवः ।
एतं दृष्ट्वा प्रमोदिष्ये व्यसने त्वामिवानघ ॥ २२
जीवितं धारयिष्यामि मासं दशरथात्मज ।
ऊर्ध्वं मासान्न जीवेयं रक्षसां वशमागता ॥ २३

G. 5. 66. 28
B. 5. 65. 25
L. 5. 64. 27

---

Ñ1 D11 ते; V2 यत् ( for तत् ). Ś1 D10 अभिके ( for अपि तत् ). Ś1 D10 भार्यार्थे; D11 कार्यार्थे ( for काकार्थे ). —( l. 4 ) B1.2 इनं ( for इदं ). B4 भार्या- ( for दारा- ). Ś1 D2.10 -[ अ ]पहारकं ( for °रिणम् ). ]

—After 18, D3 reads $21^{cd}$.

19 D3 om. 19. Ś1 Ñ V B D2.6.10.11 read 19 after 21.—$^{a}$) Ñ2 V B D6.11 G3 विज्ञाप्यः स; T2 विज्ञाप्यत (sic) ( for °प्यश्च ). Ñ1 महाराजो ( for नरव्याघ्रो ). D7.9 विज्ञाप्यः पुनरप्येष. —$^{b}$) Ś1 Ñ V B1.2.4 D2.6.10.11 यत्नाद् ( for रामो ). B3 दूतेन सुहृदा त्वया; D1.4 रामो वानरपुंगव. —$^{c}$) B3 निखिलेन. D1 [ इ ]ति ( for [ इ ]ह ). M1 या; Cr as in text ( for यद् ). D7.9 Ct यथा- ( for [इ]ह यद् ). D5 T2 वृत्तम्; Ct as in text ( for दृष्टम् ). D4 अखिलं यत्त्वया दृष्टम्. —$^{d}$) T1 damaged from second मा up to त in $20^{a}$. V2 B3 साह; G3 अति ( sic ); M2 प्राह; Cr as in text ( for आह ).

20 T1 damaged up to त in $^{a}$ ( cf. v.l. 19 ). —$^{a}$) Ś1 Ñ1 D1-5.7.9-11 T2 M3 अयं चास्मै( D1.4 °पि ) प्रदातव्यो; Ñ2 V B D6 अयं तस्मै प्रदातव्यो. —$^{b}$) D8 यत्तत् ( for यत्नात् ). Ś1 च सुपरिक्षितः; Ñ B4 D1-7.9-11 T2 M3 °रक्षितः; V1 B1-3 °पालितः ( for सुपरिरक्षितम् ). V2 यत्नार्थे परिपालितः. —After $20^{ab}$, T1.3 G2.3 ins.:

1362* मणिरत्नं कपिश्रेष्ठ शिरोभूषणमुत्तमम् ।

[ G2.3 हरि- ( for कपि- ). ]

—D2.11 om. ( hapl. ) $20^{c}-21^{b}$. D1.4 om. $20^{cd}$. —$^{c}$) Ś1 Ñ1 D10 ब्रुवंत्या ( for ब्रुवता ). Ñ2 V B D6 स च मद्वचनाद्वाच्यः. —$^{d}$) Ś1 Ñ1 D5.10 [ अ ]पि ; V B1 [ ए ]व ( for [ उ ]प- ).

21 D2.11 T1.3 G3 om. $21^{ab}$ ( for D2.11, cf. v.l. 20 ). —$^{a}$) Ś1 Ñ V B D1.4.6.10 दिव्यो ( for श्रीमान् ). —$^{b}$) D1.4 यत्नात् ( for मया ). Ś1 Ñ V B D1.3.4.6.10 M3 सुपरि-; D8 ते परि- ( for ते यत्न- ). —After $21^{ab}$, Ñ2 V B2-4 D6 ins.; while D11 ins. after $20^{ab}$ ( owing to om. ):

1363* तत्र निर्यातितः सौम्य येनाहं जीविता विभो ।

[ B4 निर्यापितः. D11 प्रभो ( for विभो ). ]

—B1 transp. $21^{cd}$ and $22^{ab}$. D3 reads $21^{cd}$ after 18. —$^{c}$) Ś1 Ñ V B D T2 M1 Cr.k.t तिलकं ( for तिलकस् ). —After $21^{c}$, D3 ins.:

1364* गण्डपार्श्वे निवेशितम् ।
अयं च मे मणिर्दत्तस्तव हेतो रघूत्तम ।
राजन्नेतच्च मे श्रुत्वा;

while T1.3 G2.3 M3 ins.:

1365* गण्डपार्श्वे निवेशितः ।
त्वया प्रणष्टे तिलके.

[ ( l. 2 ) T1 damaged from प्रणष्टे up to वा in $22^{d}$. ]
—D7 om. $21^{d}$ except तत्. —$^{d}$) B2.4 D7-9 M1 Ck.t तत् ( for तं ). Ś1 Ñ1 D10 संस्मरेरिति; V2 D1.2.4.11 T2 संस्मरस्वेति; Cr as in text ( for तं स्मरस्वेति ). D2 सा ( for च ). D3 सर्वं श्रद्धातुमर्हसि; T3 G2.3 M3 तं किल स्मर्तुमर्हसि. —After 21, Ś1 Ñ V B D2.6.10.11 read 19; while D3 ins. l. 3 – 7 of 1359*.

22 T1 damaged up to वा in $^{d}$ ( cf. v.l. 1365* ). B1 transp. $21^{cd}$ and $22^{ab}$. D3 transp. $^{ab}$ and $^{cd}$. —$^{a}$) B1 तत्र ( for एष ). B4 D5 निर्यापितः ( for °तितः ). —After $22^{a}$, D3 ins.:

1366* मया सुपरिरक्षितः ।
एष निर्यापितः श्रीमान्.

—After $22^{ab}$, B1.2 ins.:

1367* मणिर्जनकराजस्य दुहित्रा प्रेषितोऽनघ ।;

while D3 ins.:

1368* अतःपरं न मे काचिज्जीविताशा नरेश्वर ।

—G3 om. $22^{cd}$. —$^{c}$) Ś1 Ñ2 V B2-4 D6.10 T2 G2 एनं; B1 D3.11 एवं; D8 एतद् ( for एतं ). Ś1 Ñ V B D1-4.6.10.11 प्रहृष्या( B2 °हर्षा )मि( V2 °मो ) ( for प्रमोदिष्ये ). —D11 om. ( hapl. ) $22^{d}-23^{a}$. —$^{d}$) Ś1 D2 इह ( for इव ). Ñ2 V1 B3 D6 पीडिता; V2 [ ऽ ]पि हि च; B1.2.4 [ ऽ ]पीह च ( for त्वामिव ).

23 D11 om. $23^{a}$ ( cf. v.l. 22 ). —$^{c}$) Ñ2 V B D2.6 G2 मासादूर्ध्वं ( by transp. ). D3 जीविष्ये ( for जीवेयं ). —$^{d}$) V B राक्षसी- ( for रक्षसां ). Ñ1 D2.11 च समागता; D4 वशमागमं. Ś1 D10 राक्षसेन समागता. —After 23, Ś1 Ñ V B D2.6.10.11 read 18.

G. 5. 66. 32
B. 5. 65. 26
L. 5. 64. 31

इति मामब्रवीत्सीता कृशाङ्गी धर्मचारिणी ।
रावणान्तःपुरे रुद्धा मृगीवोत्फुल्ललोचना ॥ २४
एतदेव मयाख्यातं सर्वं राघव यद्यथा ।
सर्वथा सागरजले संतारः प्रविधीयताम् ॥ २५

तौ जाताश्वासौ राजपुत्रौ विदित्वा
तच्चाभिज्ञानं राघवाय प्रदाय ।
देव्या चाख्यातं सर्वमेवानुपूर्व्या-
द्वाचा संपूर्णं वायुपुत्रः शशंस ॥ २६

इति श्रीरामायणे सुन्दरकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

---

24 ^b) Ś1 Ñ1 D1.2.4.10.11 तन्वंगी; Ñ2 V B D6 धर्मज्ञा; D3 सुकृशा (for कृशाङ्गी). D5 वरवर्णिनी (for धर्मचारिणी). —^c) D1.4 सा हि (for रुद्धा). —^d) D2 [उ]लोल- (for [उ]त्फुल्ल-). —After 24, D3 ins.:

1369* सा प्रकृत्या च तन्वङ्गी त्वद्वियोगाच्च कर्शिता ।
अनध्ययनशीलस्य विद्येव तनुतां गता ।

—D3 cont.; Ś1 Ñ1 D1.2.4.10.11 T2 ins. after 24; while Ñ2 V B D6 ins. after 25:

1370* उपायो दृश्यतां कश्चिद्यथा नदनदीपतिम् ।
नचिरेण भवान्घोरं ससैन्यः सागरं तरेत् ।

[(l. 2) D2 अपरेण (for नचिरेण). Ś1 D10 महा- (for भवान्). D6 सागरे. D10 तरेः (for तरेत्). D3 सह सैन्येन महता नचिरात्संतरिष्यसि.]

—Thereafter Ñ2 V B D6 cont. Ś1 Ñ1 D1.2.4.11 ins. after 26, while D3 ins. after 25:

1371* वार्तां श्रुत्वा राजपुत्रौ प्रहृष्टौ
दृष्ट्वा सिद्धिं वानरेन्द्रश्च राजा ।
नेत्राश्लेषं लक्ष्मणश्चामितात्मा
कृत्वा हृष्टा वायुपुत्रं शशंसुः ।

[(l. 1) Ś1 Ñ1 D1-4.11 प्रीत्या युक्तौ (for वार्तां श्रुत्वा). V2 तौ राजपुत्रौ (for राजपुत्रौ). Ś1 Ñ1 D1.2.4 निरीक्ष्य; V2 om.; B4 तौ प्रहृष्टो (for प्रहृष्टौ). —(l. 2) Ś1 सिद्धार्थौ तौ; Ñ1 D1-4.11 संसिद्धार्थौ (D2.11 °र्थो) (for दृष्ट्वा सिद्धिं). Ś1 वानराणां च; V2 B2 वानरेंद्रस्य; B4 वानरेंद्रैश्च (for वानरेन्द्रश्च). —B4 om. l. 3-4. —(l. 3) V2 तैस्तैराश्लेषं; D6 गात्राश्लेषं (for नेत्राश्लेषं). B1 लक्ष्मणे (for लक्ष्मणश्च). —(l. 4) V2 B1 दृष्ट्वा; B3 हृष्टो (for हृष्टा). V राजपुत्रं (for वायु°). V2 प्रशशंसुः (for शशंसुः). —For l. 3-4, Ś1 Ñ1 D1-4.11 subst.:

1371(A)* गात्रैराश्लिष्य वानरं तं कृतार्थं
भूयो वृत्तं कर्म तच्चाशशंस ।

[(l. 1) Ś1 आश्लिष्यैनं; D3 गात्रैः श्लिष्यंतौ (for गात्रैराश्लिष्य). Ś1 चैव (for तं). D2 वानरेंद्रं; D3 वायुपुत्रं (for वानरं तं). —(l. 2) Ñ1 वृत्तः; D2.11 वृत्तं (for वृत्तं). D3 तत्तच्छशंस (for तच्चाश°). D1.4 वाहोरात्रकर्म तथ्यं शशंस.]

25 T1 damaged for 25^{abc}. —^a) G2 श्रुत्वा; M1 एवं (for एव). D9 मम; M2 यथा (for मया). Ś1 Ñ V B D2.6.10.11 एतत्ते (D10 °त्तु) सर्वमाख्यातं; D3 एवमेतत्समाख्यातं. —^b) Ś1 Ñ V B D2.6.10.11 मया (for सर्वं). Ś1 Ñ1 D2.10 तद्यथा; Ñ2 V B D6 तत्त्वतः (for यद्यथा). —^c) D1.4 रावण (for सागर-). —^d) D1.4 संविचिंत्यतां; D2.3.11 प्रतिचिंत्य(D11 °ति)तां (for प्रविधीयताम्). Ś1 Ñ1 D10 संत(Ñ1 प्रका)रः प्रविचिंत्यतां; Ñ2 V B1-3 D6 संता(Ñ2 V1 °त)रं प्रवि(B1.3 °ति)चिंतय; B4 संतारमनुचिंतय. —After 25, Ñ2 V B D6 ins. 1370* and 1371*; while D3 ins. 1371* only.

26 ^a) Ś1 Ñ V B3 D1-4.6.10.11 om. तौ. Ñ1 अतश्वासौ (for जाताश्वासौ). —^b) Ś1 Ñ1 D10 तस्साभिज्ञं; V2 तां चाभिज्ञां; D4 *चाभि°; D11 तथा विज्ञानं (for तच्चाभिज्ञानं). —^c) B1 D6 चाख्यानं; T1.3 G3 व्याख्यातं. Ś1 Ñ1 D1.2.4.10 देव्या वृत्तं; Ñ2 B2-4 D3 देव्या(B3 °वा)ख्यातं; D11 देव्यामेवं (for देव्या चाख्यातं). Ś1 Ñ1 B3 D1.2.5.6.10.11 T3 M3 °पूर्व्या; B1 °पूर्वं; D3.4 °पूर्वात् (for [आ]नुपूर्व्याद्). —^d) G1 संपन्नं (for संपूर्णं). Ś1 Ñ1 D1-4.10.11 सम्यक्पूर्णं; Ñ2 V B D6 तूष्णीमुक्त्वा (for वाचा संपूर्णं). D11 G3 वायुपुत्रैः. Ñ2 V B D6 तदाभूत् (for शशंस). —After 26, Ś1 Ñ1 D1.2.4.11 ins. 1371*.

Colophon. —*Sarga name*: Ś1 D1.2.4.10.11 मणिनिर्यातनं(D1.4 °नः); Ñ1 हनुमन्निवेदनं; Ñ2 B4 D6 मणिसमर्पणं; V B1-3 D3 अभिज्ञानमणि(B3 om. मणि)समर्पणं (D3 °दर्शनः). —*Sarga no.* (figures, words or both): Ñ1 B2 D1.2.4.10.11 om.; Ś1 V1 66; Ñ2 D6 68; V2 57; B1 67; B3 61; B4 71; D3 70; D5.7-9 T1.3 G M1.3 65; T2 M2 64. —After colophon, G M1.3 conclude with **श्रीरामाय नमः**.

# ६४

एवमुक्तो हनुमता रामो दशरथात्मजः ।
तं मणिं हृदये कृत्वा प्ररुरोद सलक्ष्मणः ॥ १
तं तु दृष्ट्वा मणिश्रेष्ठं राघवः शोककर्शितः ।
नेत्राभ्यामश्रुपूर्णाभ्यां सुग्रीवमिदमब्रवीत् ॥ २
यथैव धेनुः स्रवति स्नेहाद्वत्सस्य वत्सला ।
तथा ममापि हृदयं मणिरत्नस्य दर्शनात् ॥ ३
मणिरत्नमिदं दत्तं वैदेह्याः श्वशुरेण मे ।
वधूकाले यथा बद्धमधिकं मूर्ध्नि शोभते ॥ ४
अयं हि जलसंभूतो मणिः प्रवरपूजितः ।
यज्ञे परमतुष्टेन दत्तः शक्रेण धीमता ॥ ५
इमं दृष्ट्वा मणिश्रेष्ठं तथा तातस्य दर्शनम् ।
अद्यास्म्यवगतः सौम्य वैदेहस्य तथा विभोः ॥ ६
अयं हि शोभते तस्याः प्रियाया मूर्ध्नि मे मणिः ।
अद्यास्य दर्शनेनाहं प्राप्तां तामिव चिन्तये ॥ ७
किमाह सीता वैदेही ब्रूहि सौम्य पुनः पुनः ।
परासुमिव तोयेन सिञ्चन्ती वाक्यवारिणा ॥ ८

G. 5. 67. 8
B. 5. 66. 8
L. 5. 65. 8

## 64

1 T1 damaged after रा in $^{b}$ up to हृ in $^{c}$. D6 om. $1^{cd}$. —$^{d}$) Ś1 Ñ V D1–4.7–11 G2 M1 रुरोद सह- (for प्ररुरोद स-). ❀ Ck : सलक्ष्मण इत्येकं पदम्. ❀

2 $^{a}$) Ñ2 B3 D6 निरीक्ष्य च; V B1 (before corr. as in Ñ2; m. also after corr.).2 निरीक्ष्य तं; B4 स निरीक्ष्य; D2.11 तं च(D11 स तं) दृष्ट्वा. Ñ2 मणिं (for मणि-). T1 G3 -वरं (for -श्रेष्ठं). —$^{b}$) Ś1 V B3.4 D2.5.7.8.10 -कर्पितः; Ñ1 B2 D6 -मूर्छितः (for -कर्शितः). —$^{c}$) Ñ2 V B1.2 (m. also वारि-).3.4 D6 बाष्प- (for अश्रु-). —$^{d}$) Ś1 Ñ1 D1.2.4.10.11 सुग्रीवं वाक्यम्; Ñ2 V B D3.6.8 इदं वचनम् (for सुग्रीवमिदम्).

3 $^{ab}$) D2 प्रस्नौति; D10.11 स्रवते (for स्रवति). D1.4 यथा धेनुः प्रसंस्नौति (for $^{a}$). B3 स्नेहस्य (sic); D9 om. (hapl.) (for वत्सस्य). D3 यथा हि प्रस्नुते धेनुर्वत्सं दृष्ट्वा तु वत्सला. —$^{cd}$) D7–9 G1.3 -श्रेष्ठस्य; Cg.k as in text (for -रत्नस्य). Ś1 Ñ V B D1.2.4.6.10.11 एवं मे(Ś1 Ñ1 स [sic]) मणिरत्नस्य वैदेह्या इव दर्शनं. ❀ Ck : मणिरत्नस्य दर्शनादित्यनन्तरम्, अद्यास्म्यवगतः सौम्येत्यादि। अत्र द्वित्रिश्लोकाः प्रक्षिप्ताः क्वचित्कोशे.. .. .. ..(damaged) संख्यातोऽभ्यधिकं बहुसंख्यश्लोकदर्शनं तच्छान्तं व्याकृष्य निश्चेष्यामः. ❀

4 B4 om.(hapl.) 4–6 (see $3^{cd}$ and $6^{d}$ var.). —$^{a}$) D3 दिव्यं (for दत्तं). —$^{b}$) D3 वैदेहै. Ñ2 V B1.2 D2.6.11 वै; B3 च (for मे). —$^{c}$) Ś1 Ñ1 D10 पुरा विद्धं; Ñ2 V1 D6 T1 G2.3 तथा बद्धम्; V2 B1–3 तदा बद्धम्; D1.2.4.11 T3 पुरा बद्धम्; D3 तदा दत्तम्; D5.8 T2 यथा(T2 पुरा) लब्धम्; M2 मया बद्धम्; Cg.t as in text (for यथा बद्धम्). —$^{d}$) B1–3 D2.6 [अ]शोभत (for शोभते). Ś1 D10 मूर्ध्नि तस्याश्च शोभनं.

5 B4 om. 5 (cf. v.l. 4). —$^{a}$) D8 इदं (for अयं). B1 जनकः; D1.4 हि मणि- (sic) (for हि जल-). D3 -संभूतं. —$^{b}$) Ñ2 V B1–3 D6 T2 G1.2 M2 परम-; M3 सज्जन-; Ct as in text (for प्रवर-). Ś1 Ñ1 D10 -भूषण: (for -पूजितः). D1–4.11 मणिः परमभूषणः(D3 °भास्वरः; D4 °शोभनः); D8 मणिप्रवरमुत्तमं. —$^{c}$) Ñ2 B1–3 D6 राज्ञे; V राज्ञः; D11 यज्ञात् (for यज्ञे). D3 यज्ञे परमया तुष्ट्या. —$^{d}$) D3 दत्तं. D3 मे पितुः (for धीमता).

6 B4 om. 6 (cf. v.l. 4). —$^{a}$) B2 D4.8.10.11 G3 M2 इदं; D2 इयं (sic) (for इमं). D11 दत्त्वा (sic) (for दृष्ट्वा). —$^{b}$) Ś1 Ñ V B1–3 D1–4.6.10 T3 M3 यथा. Ś1 Ñ1 D10.11 तत्त्वार्थ- (for तातस्य). —B3 om. (hapl.), while T3 reads twice $6^{cd}$. Ś1 D10 transp. $6^{cd}$ and $7^{ab}$. —$^{c}$) Ś1 D10 [अ]स्युपगतं; Ñ2 V B1 D5.6 T2 [अ]स्म्यु(V2 [अ]न्यु)पगतः; B2 [अ]प्युप°; D2 [अ]स्यनु°; D8 [अ]प्यवगतं; G2 [अ]प्युपागतं; M2 [अ]व्यप°; Cr.m.g.k.t as in text (for [अ]स्म्यवगतः). D1.4 अथाप्युपगतः सौम्य; D3 अद्याहमवगच्छामि; T3 (first time) तस्याप्यपगतं सौम्य; T3 (second time) यद्यास्त्यपगतः सौम्य. —$^{d}$) D5 यथा; T1 तदा (for तथा). T2 G1.2 M2 विभो. Ś1 D3.10 T3 (first time) वैदेह्याश्चापि दर्शनं; Ñ V B1.2 D1.2.4.6.11 वैदेह्या इव(Ñ1 अपि; D1.4 ह्यपि) दर्शनं.

7 Ś1 D10 transp. $6^{cd}$ and $7^{ab}$. —$^{ab}$) D11 ते (sic) (for हि). D4 मूर्ध्नि रोमणि; T1 G3 मम मूर्धनि (for मूर्ध्नि मे मणिः). D3 वैदेह्या वारिसंभवः (for $^{b}$). Ñ2 V B D6 अयं मणिवरः कालं प्रियया धारितश्चिरं. —$^{c}$) Ś1 Ñ1 D1.2.4.10.11 G1.2 M3 अस्याद्य (by transp.); D3 एतस्य. —$^{d}$) V2 B1.2.4 Ś1 Ñ1 D1–4.10.11 तां प्राप्ताम् (by transp.); V2 B1.2.4 Ś1 Ñ1 D9 G3 इह (for इव). D3 लक्षये (for दृष्टां ताम्. Ś1 Ñ1 D9 G3 इह (for इव). D3 लक्षये (for चिन्तये). Ñ2 V1 B3 D6 दृष्टां तामिति(V1 °मेव) चिंतये (D6 °यन्). —After 7, D3 reads 12–13.

8 V2 B4 om.(hapl.?) 8–10. —$^{a}$) D3 सौम्य वै सीता-(for सीता वैदेही). —$^{b}$) D5 ब्रूयाः (for ब्रूहि). D3 सर्वं (for सौम्य). —$^{cd}$) D3.9 G2.3 M3 पिपासुम्; T1

G. 5. 67. 9
B. 5. 66. 9
L. 5. 65. 9

इतस्तु किं दुःखतरं यदिमं वारिसंभवम् ।
मणिं पश्यामि सौमित्रे वैदेहीमागतं विना ॥ ९
चिरं जीवति वैदेही यदि मासं धरिष्यति ।
क्षणं सौम्य न जीवेयं विना तामसितेक्षणाम् ॥ १०
नय मामपि तं देशं यत्र दृष्टा मम प्रिया ।
न तिष्ठेयं क्षणमपि प्रवृत्तिमुपलभ्य च ॥ ११
कथं सा मम सुश्रोणी भीरुभीरुः सती तदा ।
भयावहानां घोराणां मध्ये तिष्ठति रक्षसाम् ॥ १२

शारदस्तिमिरोन्मुक्तो नूनं चन्द्र इवाम्बुदैः ।
आवृतं वदनं तस्या न विराजति राक्षसैः ॥ १३
किमाह सीता हनुमंस्तत्त्वतः कथयस्व मे ।
एतेन खलु जीविष्ये भेषजेनातुरो यथा ॥ १४
मधुरा मधुरालापा किमाह मम भामिनी ।
मद्विहीना वरारोहा हनुमन्कथयस्व मे ।
दुःखाद्दुःखतरं प्राप्य कथं जीवति जानकी ॥ १५

## इति श्रीरामायणे सुन्दरकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

---

पिपासुर् ; G1 विपांसुम्; Ct as in text ( for परासुम् ). Ñ2 V1 B1-3 D6 शोकाग्निना दह्यमानं; D1.4.11 पुरा शोकेन दह्यंतं; D2 पुरा शोकाग्निधक्ष्यंतं; D3 T3 पुरा शोकेन दह्यामि ( T3 तप्यंतं ) ( for $^{c}$ ). Ñ2 V1 B1-3 D1-6.11 T2.3 सिंच मां; Ct as in text ( for सिञ्चन्ती ). Ś1 Ñ1 D10 पुरा शोकाग्निनिर्दग्धं सिंच मां( D10 मा ) बाष्पवारिणा.

9 V2 B4 om. 9 ( cf. v.l. 8 ). —$^{a}$) Ś1 Ñ V1 B1-3 D1-4.6.10.11 अतस् ( for इतस् ). —$^{b}$) Ś1 ममेवं; Ñ1 D7.9 यमिमं; Ñ2 D2 M2 यदिदं; B1.2 यदेनं; B3 यदि*; D10 समेमं ( sic ); T2 यदीमं ( for यदिमं ). —M1 damaged for $^{cd}$. —$^{c}$) Ś1 Ñ V1 B1-3 D1-4.10.11 हनुमन् ; D6 वैदेहीं ( for सौमित्रे ). —$^{d}$) D6 हनूमन् ( for वैदेहीम् ). Ś1 Ñ1 V1 B1.2 D1.2.4.5 T आगतां. D11 चिरात् ( for विना ). D3 विना तां दीर्घलोचनां; G1.3 न च पश्यामि जानकीं; G3 वैदेहीमातरं( sic ) विना.

10 V2 B4 D11 om. 10 ( for V2 B4, cf. v.l. 8 ). —$^{a}$) Ñ2 V1 B1-3 D6 जीविष्यति चिरं सीता. —$^{b}$) D8 मासं प्राणान् ( for यदि मासं ). T3 तरिष्यति; G धरिष्यते; Cm.g.t धरिष्यति( as in text ). —$^{c}$) D7.9 वीर ( for सौम्य ). —$^{d}$) Ś1 Ñ2 V1 B1-3 D1.2.4.6.10 इति चिंतये; Ñ1 इति निश्चयः; D3 इति मे मतिः ( for असितेक्षणाम् ).

11 B3 om. 11. —$^{a}$) D3 सौम्य ( for अपि ). Ñ2 V D6 हनुमंस्तत्र; B1.2 तत्र हनुमन् ; B4 चापि तं यत्र ( for अपि तं देशं ). —$^{b}$) Ñ2 V B2 D6 [आ]स्ते सा ( for दृष्टा ). D3 [अ]सितेक्षणा ( for मम प्रिया ). B1 यत्रास्ते मम सा प्रिया; B4 दृष्टा मम प्रिया कपे. —$^{c}$) Ś1 Ñ V B1.2.4 D1-4.6.10.11 मुहूर्तं ना( Ś1 Ñ1 V1 नै )वतिष्ठेयं. —$^{d}$) D5 अवलंब्य ( for उपलभ्य ). Ś1 Ñ1 V1 B1.2.4 D1-4.10.11 हि; Ñ2 D6 वै ( for च ). V2 उपलभ्य ते ( for °भ्य च ).

12 D3 reads 12-13 after 7. —$^{a}$) D3 कष्टं ( for कथं ). Ś1 D10 वा वद; Ñ1 सा हृत-; B3 D2 सा वद; D11 सुखद ( for सा मम ). —$^{b}$) D8 M3 सदा ( for तदा ). Ś1 D1.3.4.10 T3 G1.2 M1 भीरु( D3 धीरा; D10 G2 भीरुर् ; G1 भृशं )भीरुतरा सती; Ñ1 D2.11 भीरुर्हीना मया सती; Ñ2 V B2-4 D6 भीरुरेकाकिनी सती; T2 भीरुः सा रुदती सदा. —$^{c}$) Ś1 D1.3.4.10 मया विहीना पापानां. —$^{d}$) Ś1 Ñ1 D1.4.10.11 वसति; D2 वहति ( for तिष्ठति ). B3 जानकी.

13 D3 reads 12-13 after 7. B3 om. $13^{ab}$. —$^{ab}$) B1.2 D1.2.4.6 तिमिरान्मुक्तो. D11 शारदैस्तिमिरैर्मुक्तो ( for $^{a}$ ). Ś1 D1.4.10 [अं]बरे ( for [अ]म्बुदैः ). D3 शारदं तोयदैर्विद्धं चंद्रबिंबमिवांबरे. —$^{c}$) Ś1 D1.4.10 अद्य तद्; D7.9 Cm.t आवृतो; Ck as in text ( for आवृतं ). Ñ1 D2.11 तदवश्यं( Ñ1 °स्थं ) मुखं तस्या. —$^{d}$) B2 न वै राजति; B3 विराजयति ( for न विराजति ). Ś1 D1.4.10 [अ]संशयं; D7.9 सांप्रतं ( for राक्षसैः ).

14 $^{a}$) D3 सर्वं चैतदशेषेण. —$^{b}$) B3 तद्वचः; D3 हनूमन् ( for तत्त्वतः ). D5 T G3 M2.3 कथयाद्य. Ś1 D1.2.4.10 ब्रूहि सौम्य पुनः पुनः. —D8 reads $14^{c}$ - $15^{d}$ in marg. —$^{c}$) Ś1 D10 जीवामि; D2 जीवेयं ( for जीविष्ये ). —$^{d}$) B3 भिषजेन; D5 भैषज्येन ( for भेषजेन ). Ś1 Ñ V1 B D1.4.6.10 यथातुरः ( by transp. ); V2 D11 तथातुरः; D2( with hiatus ) इवातुरः.

15 D8 reads in marg. up to $15^{d}$ ( cf. v.l. 14 ). Ś1 om. 15. —$^{a}$) Ñ V B D1-4.6.10.11 मधुरं मधुरा( B4 °रया [ hypm. ] )भाषा. —$^{b}$) T1 कि***म ( damaged ). Ñ1 D1.2.4.10 जानकी; Ñ2 V B1.2.4 D6 सा प्रिया; D11 भाविनी ( for भामिनी ). B3 कथयस्व मे ( for मम भामिनी ). D3 किं मामाह शुचिस्मिता. —B3 om. $15^{cdef}$. —$^{c}$) D3 मद्विना सा; D11 यदि हीना ( for मद्विहीना ). —After $15^{cd}$, D3 ins. :

# ६५

एवमुक्तस्तु हनुमान्राघवेण महात्मना ।
सीताया भाषितं सर्वं न्यवेदयत राघवे ॥ १

इदमुक्तवती देवी जानकी पुरुषर्षभ ।
पूर्ववृत्तमभिज्ञानं चित्रकूटे यथातथम् ॥ २

सुखसुप्ता त्वया सार्धं जानकी पूर्वमुत्थिता ।
वायसः सहसोत्पत्य विरराद स्तनान्तरे ॥ ३

पर्यायेण च सुप्तस्त्वं देव्यङ्के भरताग्रज ।
पुनश्च किल पक्षी स देव्या जनयति व्यथाम् ॥ ४

ततः पुनरुपागम्य विरराद भृशं किल ।
ततस्त्वं बोधितस्तस्याः शोणितेन समुक्षितः ॥ ५

वायसेन च तेनैव सततं बाध्यमानया ।
बोधितः किल देव्या त्वं सुखसुप्तः परंतप ॥ ६

G. 5. 68. 5
B. 5. 67. 6
L. 5. 66. 5

---

1372* एवं विलपमानं तं रामं वायुसुतः पुनः ।
आश्वासयामास तदा हनुमांस्तं कृताञ्जलिः ।

—Ñ2 V B1.2.4 D2.3.5.6.8.11 T1 G M om. $15^{ef}$.—$^{e}$) D1.4 प्राणा; D10 प्राप्ता ( for प्राप्य ).

Colophon. V1 D3 om. ( cont. the Sarga ). —*Sarga name*: Ś1 Ñ2 V2 B1.3.4 D6.10 रामपरिदेवनं; Ñ1 B2 श्रीरामपरिदेवनं; D1.2.4 रामदेव( D2 °वेद [ meta. ] )नः; D11 मणिनिर्यातनं. —*Sarga no.* ( figures, words or both ): Ñ1 B2 D1.2.4.10.11 om.; Ś1 67; Ñ2 D6 69; V2 58; B1 68; B3 62; B4 72; D5.7-9 T1.3 G M1.3 66; T2 M2 65.—After colophon, D2 concludes with राम; G M1.2 with श्रीरामाय नमः.

## 65

V1 D3 continue the previous Sarga.

1 D3 T1 om. 1.—$^{a}$) Ś1 D10 स हनुमान्; Ñ1 हनुमता.—$^{b}$) G2 M2 राघवं प्रत्यभाषत.—M1 om. $1^{cd}$.—$^{c}$) Ś1 D10 वैदेह्या ( for सीताया ). Ñ1 श्रुत्वा; G2 सत्यं ( for सर्वं ).—For 1, G3 subst. :

1373* एवमुक्तस्तु हनुमान्राघवं प्रत्यभाषत ।

